श्रीहरिः ।

# मीमांसादर्शनम् ।

श्रीशबरस्वामिविरचितभाष्यसहितम् ।

चतुर्थप्रभृति-षष्ठाध्यायपर्यन्तम् । ४-६ ।

पं० रत्नगोपालभट्टेन संशोधितम् ।

चौखम्भासंस्कृतपुस्तकालयाऽध्यक्ष-
हरिदासात्मजहरिकृष्णदासगुप्तेन
स्वकीये विद्याविलास यन्त्रे
संमुद्रितम् ।

—:o:—

# MÎMÂNSÂDARŚANA,

With the commentary of Sabara swami.

FOUR TO SIX CHAPTERS.

Edited by

Pandita Ratna Gopâla Bhatta.

PRINTED AT THE VIDYÂ VILÂSA PRESS,
BY HARIKRISHNA DÂSA GUPTA.
BENARES CITY.
1910.

To be had from the Chowkhamba Sanskrit Book Depôt,
Benares City.

श्रीहरिः ।

# मीमांसादर्शनम् ।

श्रीशबरस्वामिविरचितभाष्यसहितम् ।

चतुर्थप्रभृति-षष्ठाध्यायपर्यन्तम् । ४-६ ।

पं० रत्नगोपालभट्टेन संशोधितम् ।

चौखम्भासंस्कृतपुस्तकालयाऽध्यक्ष-
हरिदासात्मजहरिकृष्णदासगुप्तेन
स्वकीये विद्याविलास यन्त्रे
संमुद्रितम् ।



—:o:—

# MÎMÂNSÂDARŜANA,

With the commentary of Sabara swami.

FOUR TO SIX CHAPTERS.

Edited by

Pandita Ratna Gopâla Bhatta.

PRINTED AT SHE VIDYÂ VILÂSA PRESS,

BY HARIKRISHNA DÂSA GUPTA.

BENARES CITY.

1910.

श्रीहरिः ।

# मीमांसादर्शनाधिकरणसूची ॥ अ० ४ । ५ । ६ ॥

अधिकरणसंख्या । पृष्ठसंख्या ।

श्रीगणेशाय नमः ।
अथ मीमांसादर्शने शाबरभाष्ये चतुर्थे अध्याये
प्रथमः पादः ॥ ४ ॥ १ ॥

## अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा ॥ १ ॥

तृतीयेऽध्याये श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानैः शेषविनियोगलक्षणमुक्तम् । इहेदानीं क्रत्वर्थपुरुषार्थौ जिज्ञास्येते । कः क्रत्वर्थः । कः पुरुषार्थ इति । यापि प्रयोजकाप्रयोजकफलविध्यर्थवादाऽङ्गप्रधानचिन्ता, साऽपि क्रत्वर्थपुरुषार्थजिज्ञासैव । कथम् । अङ्गं क्रत्वर्थः, प्रधानं पुरुषार्थः । फलविधिः पुरुषार्थः, अर्थवादः क्रत्वर्थः । प्रयोजकः कश्चित् पुरुषार्थोऽप्रयोजकः क्रत्वर्थः । तस्मात् क्रत्वर्थपुरुषार्थयोर्जिज्ञासेति सूत्रितम् । तत्र, अथातःशब्दौ प्रथमे एवाध्याये प्रथमसूत्रे वर्णितौ । अथेति प्रकृतं शेषविनियोगलक्षणमपेक्षते । अत इति क्रत्वर्थपुरुषार्थजिज्ञासाविशेषं प्रकुरुते । क्रतवे यः स क्रत्वर्थः । पुरुषाय यः स पुरुषार्थः । जिज्ञासाशब्दोऽपि तत्रैव समधिगतः । ज्ञातुमिच्छा जिज्ञासेति । तदेतत् प्रतिज्ञासूत्रं, क्रत्वर्थपुरुषार्थयोर्जिज्ञासेति ॥ १ ॥ ॥ प्रतिज्ञाऽधिकरणम् ॥ १ ॥

## यस्मिन् प्रीतिः पुरुषस्य तस्य लिप्साऽर्थलक्षणाऽविभक्तत्वात् ॥ २ ॥

अथ किंलक्षणः क्रत्वर्थः, किंलक्षणः पुरुषार्थ इति लक्षणं वाच्यम् । तथा हि लघीयसी प्रतिपत्तिः, पृष्टाकोटेन उपदेशे गरीयसी । तदुच्यते । यस्मिन् प्रीतिः पुरुषस्य, यस्मिन् कृते पदार्थे पुरुषस्य प्रीतिर्भवति स पुरुषार्थः पदार्थः । कुतः । तस्य लिप्सा अर्थेन च भवति, न शास्त्रेण । क्रत्वर्थो हि शास्त्राद् अवगम्यते, नान्यथा । अविभक्तो हि पुरुषार्थः प्रीत्या । यो यः प्रीतिसाधनः स पुरुषार्थः पुरुषाऽर्थे लक्षिते तद्विपरीतः क्रत्वर्थ इति क्रत्वर्थस्य लक्षणं सिद्धम् ॥ ॥ प्रथमवर्णकम् ॥ १ ॥

एवं वा सूत्रं वर्ण्यते । दर्शपूर्णमासयोराम्नायते । अनतिदृश्यं स्तृणाति, अनतिदृश्यमेवैनं प्रजया पशुभिः करोतीति । तथा, आहा-

र्यपुरीषां पशुकामस्य वेदिं कुर्यात्, वत्सजानुं पशुकामस्य वेदिं कुर्यात्, गोदोहनेन पशुकामस्य प्रणयेदित्येवमादीनि । तत्र संशयः । किमेवञ्जातीयकाः क्रत्वर्थाः, उत पुरुषार्था इति । किं प्राप्तम् । क्रत्वर्था इति । कुतः । प्रत्यक्ष उपकारस्तेभ्यो दृश्यते क्रतोः, पुरीषहरणं वेदिस्तरणं च । तदुक्तं, द्रव्यगुणसंस्कारेषु बादरिरिति । तस्मात् क्रत्वर्थाः इत्येवं प्राप्तम् ॥ एवं प्राप्ते ब्रूमः । यस्मिन् प्रीतिः पुरुषस्य स पुरुषार्थ एवेति । प्रीतिस्तेभ्यो निर्वर्त्तते । तस्मादेते पुरुषार्था इति । ननु प्रत्यक्ष उपकारः क्रतोर्दृश्यते इत्युक्तम् । उच्यते । सत्यं दृश्यते, न तु क्रतोरुपकाराय एभ्य सङ्कीर्त्तितेभ्यः फलेभ्य एते श्रूयन्ते । न च य उपकरोति स शेषः । यस्तु यदर्थः श्रूयते स तस्य शेष इत्युक्तं, शेषः परार्थत्वादिति ॥ ॥ द्वितीयवर्णकम् ॥ २ ॥

एवं वा, द्रव्यार्जनमुदाहरणम् । इह द्रव्यार्जनं तैस्तैर्नियमैः श्रूयते । ब्राह्मणस्य प्रतिग्रहादिना, राजन्यस्य जयादिना, वैश्यस्य कृष्यादिना । तत्र सन्देहः । किं क्रत्वर्थो द्रव्यपरिग्रहः, उत पुरुषार्थ इति । किं प्राप्तम् । क्रत्वर्थो नियमात् । यद्येष पुरुषार्थः स्यान्नियमोऽनर्थको भवेत् । प्रत्यक्षेणैतदवगम्यते । नियमादनियमाच्चार्जितं द्रव्यं पुरुषं प्रीणयतीति । तस्मात् क्रत्वर्थः । कामश्रुतिभिश्चास्य सहैकवाक्यता दृष्टा । इतरथाऽनुमेयेन फलवाक्येन सहैकवाक्यतां यायात् । लिङ्गं चापि भवति । अग्नये क्षामवते पुरोडाशमष्टाकपालं निर्वपेत्, यस्याहिताग्नेः सतोऽग्निर्गृहान् दहेत्, यस्य हिरण्यं नश्येदाग्नेयादीनि निर्वपेदित्येवमादि । तद्धि द्रव्योपघाते चोद्यते । यदि द्रव्यपरिग्रहः कर्मार्थस्तत एतदपि सति सम्बन्धे कर्मार्थमित्युच्यते । इतरथाऽसति सम्बन्धे कर्मार्थमित्यनुमीयते । फलं चास्य कल्प्येत । तस्माद् यजतिश्रुतिगृहीतं द्रव्यार्जनं येन विना यागो न निर्वर्त्तते, स यागस्य श्रुत्या परिगृहीत इति गम्यते । तस्मात् क्रत्वर्थ इति ॥ एवं प्राप्ते ब्रूमः । पुरुषार्थ इति । एतस्मिन् कृते पदार्थे प्रीतिः पुरुषस्य भवति, तस्मादस्य लिप्सा अर्थलक्षणा शरीरधारणार्था । यस्य शरीरं भ्रियते, व्यक्तं तस्यास्ति द्रव्यम् । शरीरिणश्च यागः श्रूयते । तस्माद् विद्यमानद्रव्यस्य विनियोग उच्यते । न द्रव्यार्जनं श्रुतिगृहीतं, विनापि हि द्रव्यार्जनवचनत्वेन शब्दस्य यागो निर्वर्त्तेत एव । तस्मात् पुरुषार्थो द्रव्यपरिग्रहः । अपि च, यदि शास्त्रात् कर्मार्थं द्रव्यार्जनं, त-

न्नान्यत्र विनियुज्येत तथार्जितम् । तत्र सर्वतन्त्रपरिलोपः स्यात् । अपि च, उपक्रान्तानि सर्वकर्माणि द्रव्यार्जनेन भवेयुः । तत्रैतन्नोपपद्यते । अपि वा एष सुवर्गाल्लोकाच्छिद्यते, यो दर्शपूर्णमासयाजी सन्नमावास्यां वा पौर्णमासीं वा अतिपातयेदिति । एवञ्च सति, प्रयोगकालाद् बहिरेतदङ्गं सदनुपकारकं स्यात् । न चाऽऽधानवद् भवितुमर्हति । तत्र हि वचनं, वसन्तेऽग्निमादधीतेति । न चैतदङ्गम् ॥

अथ यदुक्तं, नियमवचनमनर्थकं, पुरुषार्थे द्रव्यपरिग्रहे सतीति । उच्यते । नैतावता पुरुषार्थता व्यावर्त्तते । प्रत्यक्षा हि सा । त्वया च परोक्षं युक्तिबुद्ध्या व्यपदिश्यते । न च परोक्षं प्रत्यक्षस्य बाधकं भवति । तस्मान्नियमवचनात् काममपरमदृष्टं कल्प्येत, न तु दृष्टहानम् । तस्माद् यत् पुरुषस्य प्रयोजनं प्रीतिः, तदर्थं धनस्यार्जनमित्येवं च सति, व्रीहिणा यागः कर्त्तव्यः, प्रीत्यर्थमर्जितेन वा क्रत्वर्थमर्जितेन वा । नात्र कश्चिद् विशेषः । प्रीत्यर्थमुपार्जितोऽपि व्रीहिः व्रीहिरेव, कर्म्मार्थमुपार्जितोऽपि व्रीहिः व्रीहिरेव । तस्मान्न प्रयोगचोदनागृहीतं द्रव्यार्जनम् ॥

अथ यदुक्तम्, अनुमेयेनाप्रकृतेन वा शब्देन युष्मत्पक्षे तु नियमस्यैकवाक्यता, अस्मत्पक्षे तु दृष्टेन प्रयोगवचनेनेति । नैष दोषः । अस्मत्पक्षेऽपि दृष्टेन भुजिना, न फलवचनेन । कथं तर्हि । नियमाददृष्टं भवतीति गम्यते । यथैव भवदीये पक्षे । आह । अस्मत्पक्षे फलवत एकवाक्यभावात् फलवत उपकरोतीति गम्यते । उच्यते । अस्मत्पक्षेऽपि फलवत एवैकवाक्यभावः । एतावांस्तु विशेषः । तव श्रुतं फलं, मम तु दृष्टमिति ॥

अथ यल्लिङ्गमुक्तं, गृहदाहादिषु कर्म श्रूयते इति । तत्रोच्यते । यद्यपि न क्रत्वर्थं द्रव्यार्जनं, तथापि दाहे निमित्ते फलाय वा कर्माङ्गभावाय वा जामवत्यादीनां विधानमुपपद्यते एव । तस्मात् पुरुषार्थं द्रव्यार्जनं, प्रीत्या हि तदविभक्तमिति ॥२॥ तृतीयवर्णकम् ॥३॥ क्रत्वर्थपुरुषार्थलक्षणाधिकरणं वर्णकान्तरद्वयसहितम् ॥२॥

**तदुत्सर्गे कर्माणि पुरुषार्थाय शास्त्रस्याऽनतिशङ्क्यत्वान्न च द्रव्यं चिकीर्ष्यते तेनार्थेनाभिसम्बन्धात् क्रियायां पुरुषश्रुतिः ॥ ३ ॥**

इह प्रजापतिव्रतानि उदाहरणम् । नोद्यन्तमादित्यमीक्षेत नास्तं यन्तमित्यादीनि । तत्र सन्देहः । किं क्रत्वर्थानि प्रजापतिव्रतानि उत पुरुषार्थानीति । किं प्राप्तम् । क्रत्वर्थानीति । कुतः । एवं हि फलं न कल्पयितव्यं भविष्यतीति । ननु श्रूयते एवैतेषां फलमेतावता हैनसाऽयुक्तो भवतीति । उच्यते । नैतत् फलपरं वचनं, वर्त्तमानापदेश एवैष शब्द इति । तेन यत्रादित्य ईक्षितव्यः प्राप्तस्तत्रायं प्रतिषेध । उद्यतोऽस्तंयतश्च नियमो वा स्यात् कश्चित् कर्माङ्गभूतः ॥ एवं प्राप्ते ब्रूमः ॥ तदुत्सर्गे ॥ प्रीत्युत्सर्गेऽपि कर्म्माणि पुरुषार्थाय भवेयुरेवञ्जातीयकानि । कर्त्तुरेतानि उपदिश्यन्ते, न कर्मणः । अर्थप्राप्तेन कर्त्रा सम्बन्धो यः, स विधित्सितः । न कर्मसम्बन्धोऽविद्यमान एव। शास्त्रं चानतिशङ्क्यं पितृमातृवचनादपि प्रमाणतरम् । स्वयं हि तेन प्रत्येति । इन्द्रियस्थानीयं हि तत् । न चैवमादिभिर्द्रव्यस्य कश्चिद् दृष्ट उपकारः साध्यते । तस्मात् तेन पुरुषार्थेनाऽभिसंयोगात् क्रियायामेवञ्जातीयकायां पुरुषः श्रूयते । अपि च पुरुषप्रयत्नः पदार्थविधिमात्रं लक्षयितुमुच्चार्य्येत । स्वयमविवक्षितः स्यात् ॥

अथ यदुक्तं, यत्रादित्यस्येक्षणं प्राप्तं, तत्रोद्यतोऽस्तंयतश्च प्रतिषेध इति । सत्यं प्रतिषेधो न्याय्यः । तथा श्रुतिरनुगृह्येत, इतरथा नियमो लक्ष्येतेति । किन्त्विह नियमः शब्देन श्रूयते, तस्य व्रतमिति तेन नियम एषः— नोद्यन् आदित्य ईक्षितव्य इति । अपि चैतावताहैनसाऽयुक्तो भवतीति पुरुषसम्बद्धो दोषः कीर्त्यते, न कर्मसम्बद्धः। तस्मात् पुरुषार्थानि प्रजापतिव्रतानीति । गोलक्षणान्यप्येवमेव कर्त्तरीकर्ण्यः कर्त्तव्या इत्येवमादीनि ॥ ३ ॥

## अविशेषात्तु शास्त्रस्य यथाश्रुतिफलानि स्युः ॥ ४ ॥

उच्यते । यद्येवम्, इमान्यपि पुरुषार्थानि स्युः । समिधो यजति, तनूनपातं यजति, नानृतं वदेदित्येवमादीनि । अत्रापि पुरुषप्रयत्नसङ्कीर्त्तनम्, अत्रापि न द्रव्यं चिकीर्ष्यते इति ॥ ४ ॥ ॥ आ० ॥

## अपि वा कारणाग्रहणे तदर्थमर्थस्यानभिसम्बन्धात् ॥ ५ ॥

अपि वा नैतदस्ति, समिदादीन्यपि पुरुषार्थानि प्राप्नुवन्तीति । कारणाग्रहणे पुरुषार्थानि प्रजापतिव्रतानि भवेयुः । न तत्र श्रुत्यादिकं किञ्चित् कारणं गृह्यते, येन कर्मणामङ्गभूतानीति गम्यते ।

तस्मात् तानि पुरुषार्थानि । अर्थस्य कर्मणो नाऽभिसम्बन्धः प्रजापतिव्रतैः । इह तु समिदादीनां प्रकरणं नाम कारणं गृह्यते । येन कर्मार्थानीति विज्ञायते । तस्माद् विषम उपन्यासः । पुरुषप्रयत्नश्चैवं सत्यऽनुवादः ॥ ५ ॥ आ० नि० ॥

## तथा च लोकभूतेषु ॥ ६ ॥

लोकेऽपि, निष्पन्नकार्यादिषु प्रयोजनवत्सु यद् असंयुक्तं फलेन श्रूयते, तत् तदङ्गं विज्ञायते इति मन्यमाना उपवासं जपं वोपदिश्यैव कृतिनो मन्यन्ते, न ब्रुवते, इदमस्य प्रयोजनवतोऽङ्गमिति । तथाचाऽपरेऽपि मन्यमाना न दुरुक्तं मन्यन्ते । तस्मात् समिदादीनि कर्माङ्गानि, न प्रजापतिव्रतानीति सिद्धम् ॥ ६ ॥ युक्तिः ॥ प्रजापतिव्रतानां पुरुषार्थताधिकरणम् ॥ ३ ॥

## द्रव्याणि त्वविशेषेणानर्थक्यात् प्रदीयेरन् ॥ ७ ॥

स्तो दर्शपूर्णमासौ, तत्राम्नायते, स्फ्यश्च कपालानि च अग्निहोत्रहवणी च शूर्पं च कृष्णाजिनं च शम्या चोलूखलं च मुसलं च दृषच्चोपला चैतानि वै दश यज्ञायुधानीति । तत्र संशयः । किमेतानि द्रव्याणि प्रदातव्यानि, उत स्वेन स्वेनार्थेन सम्बन्धनीयानि । तदेतत्सिद्ध्यर्थमिदं चिन्तनीयम् । किमेष विधिः, उत अनुवाद इति । विधौ सति प्रदानमनुवादे सति यथार्थसम्बन्धः । किं प्राप्तम् । विधिरिति । तथा हि प्रवृत्तौ विशेषः, इतरथा वादमात्रमनर्थकम् । प्रदाने चैषां यज्ञायुधशब्दोऽनुगृहीतः । यज्ञस्यायुधानि यज्ञस्य साधनानीति । इतरथा उद्धननादीनामायुधानि भवेयुः श्रवणेन, लक्षणया यज्ञस्य । संख्या चैवमवकल्पते । यागेनैकेन सम्बन्धात् । इतरथा नानाऽर्थसम्बन्धाद्दशेति संख्या नावकल्पते । तस्मात् प्रदीयेरन् । अविशेषेण विहितं प्रकरणेन प्रधानस्य भवितुमर्हति ॥ ७ ॥ ॥ पूर्व० ॥

## स्वेन त्वर्थेन सम्बन्धो द्रव्याणां पृथगर्थत्वात्तस्माद् यथाश्रुति स्युः ॥ ८ ॥

न चैतदस्ति विधिः, प्रदेयानीति । अनुवादः । प्राप्तत्वात् । स्फ्येनोद्धन्ति कपालेषु श्रपयत्यग्निहोत्रहवण्यां निर्वपति शूर्पेण विविनक्ति, कृष्णाजिनमुलूखलस्याधस्तादवस्तृणाति, शम्यायां दृषदमुपदधाति, प्रोक्षिताभ्यामुलूखलमुसलाभ्याम् । अवहन्ति, प्रोक्षिताभ्यां

दृषदुपलाभ्यां पिनष्टीत्येवं स्वेन स्वेन वाक्येनोद्धननादिषु प्राप्नुवन्ति। प्राप्तानां वचनमनुवादः । प्रकरणमपि वाक्येन बाध्यते, यज्ञायुधशब्दश्चानुवादपक्षे न्याय्यो, न विधिपक्षे। गौणो हि स आयुधशब्दः स्फयादिषु, संख्यापि पाठाभिप्राया भविष्यति। विस्पष्टं चैतदुद्धननादिभिः स्फयादीनि प्रयुक्तानीति । भवति हि तत्र विधिः स्फयेनोद्धन्तीत्येवमादिः । न तु यज्ञायुधानि कर्त्तव्यानीति । तस्माद् उद्धननादिषु वाक्येन प्राप्तानामनुवाद इति ॥ ८ ॥ सि० ॥

## चोद्यन्ते चार्थकर्मसु ॥ ९ ॥

अर्थकर्मसु चोद्यन्ते पुरोडाशादीनि, तान्यपि विकल्पेरन् । तत्र पक्षे बाधो, न समुच्चयः । पुरोडाशादीनां निरपेक्षाणां यजिसम्बन्धात्, स्फयादीनां च । एवं वा चोद्यन्ते, चार्थकर्मसु चोद्यन्ते, परिधानीये कर्म्मणि, आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति । यदि प्रदीयेरंस्तत्र न भवेयुः । तस्मादपि न प्रदातव्यानीति ॥ ९ ॥

## लिङ्गदर्शनाच्च ॥ १० ॥

लिङ्गदर्शनेन च, चतुर्दश पौर्णमास्यामाहुतयो ह्रूयन्ते, त्रयोदशामावास्यायामिति। तस्मादप्यनुवाद इति ॥१०॥ युक्तिः॥ यज्ञायुधानामनुवादताधिकरणम् ॥ ४ ॥

## तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात् ॥ ११ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयो, यो दीक्षितो, यदग्नीषोमीयं पशुमालभते इति । तथा, अनड्वाहौ युनक्तीति । तथा अश्वमेधे, वसन्ताय कपिञ्जलानालभते इति । तत्र सन्देहः । किं विवक्षितमेकत्वं द्वित्वं बहुत्वं च, उताऽविवक्षितमिति ? । तत्रैकत्वमयज्ञाङ्गभूतं, न विवक्षितमित्यर्थः । अर्थस्य गुणभूतत्वात् । न आलम्भस्य गुणभूता संख्या नियोजनस्य वा । कस्य तर्हि ? । पशोरनडुहोः कपिञ्जलानां च । विभक्तिर्हि श्रुत्या प्रातिपदिकार्थगतं संख्यार्थं ब्रूते। वाक्येन सा यज्ञाङ्गं ब्रूयात् । वाक्याच्च श्रुतिर्बलीयसी । तस्मान्न यज्ञाङ्गं विवक्षितमिति ॥ आह । मा भूद् यज्ञाङ्गम् । पश्वादीनामङ्गमविवक्षित तथापीति। उच्यते। न पश्वादीनामङ्गेनोक्तेनानुक्तेन वा किञ्चित् प्रयोजनमस्ति, यज्ञाङ्गेन ह्यविपन्नेन प्रयोजनम् । विपन्नेऽपि हि पश्वाद्यङ्गे अविगुण एव क्रतुर्भवति। यज्ञाच्च फलं, न पश्वादेः । तस्मात्

पश्वादेर्गुणेन अज्ञातेन ज्ञातेन वा न किञ्चित् प्रयोजनमस्तीति न तद् विवक्षितम् । यद्धि प्रयोजनवत् तद् विवक्षितमित्युच्यते ॥११॥ पूर्व० ॥

## एकश्रुतित्वाच्च ॥ १२ ॥

भवति च किञ्चिद् वचनं, येन विज्ञायते न तद् विवक्षितमिति । यदि सोममपहरेयुरेकां गां दक्षिणां दद्यादिति । यदि हि विवक्षितं भवेद् नैकामिति ब्रूयात् । गामित्येकवचनस्य विवक्षितत्वात् । तथा, अवी द्वे धेनू द्वे इत्यत्रापि द्वे इति वचनं ज्ञापकम् । अविवक्षितम्, अवी इति द्वित्वमिति । त्रीन् ललामानित्यत्रापि त्रीनिति वचनं लिङ्गं, ललामानिति बहुवचनमविवक्षितमिति ॥ १२ ॥

## प्रतीयते इति चेत् ॥ १३ ॥

एवं चेत् पश्यसि, अविवक्षिता संख्येति । तन्न । प्रतीयते हि संख्या आख्यातवचनस्याङ्गभूता । यथा पशुमानयेत्युक्ते एक एवानीयते । पशू इति द्वौ । पशूनिति बहव आनीयन्ते, यश्च प्रतीयते स शब्दार्थः तस्माद् यज्ञस्याङ्गभूता संख्येति शब्दाद् गम्यते । न च शब्दाद् गम्यमानम् ऋते कारणाद् अविवक्षितं भवति ॥ १३ ॥ आ० ॥

## नाशब्दं तत्प्रमाणत्वात् पूर्ववत् ॥ १४ ॥

नतैदेवं, सत्यं प्रतीयते, न त्वयं शब्दार्थो, व्यामोहादेषा प्रतीतिः । कुत एतत् । वाक्याद्धि यज्ञाङ्गमित्यवगम्यते । वाक्यं च श्रुत्वा बाध्यते । तस्मादशब्दार्थोऽयं यज्ञ एकत्वादीति । अशब्दार्थोऽपि हि प्रतीयते । यथा, पूर्वो धावतीति, स पूर्व इत्युच्यते । यस्य अपरोऽस्ति, तेन पूर्व इत्युक्ते अपरो गम्यते । न त्वपरो, धावतीति श्रवणात् प्रतीयते । एवमिहापि पशुमित्येकत्वं गम्यते, न तु यज्ञे । यथैव हि पूर्वमित्युक्तेऽपरो गम्यते एव केवलं, न तु स विधीयते कस्मिँश्चिदर्थे । एवमिहापि संख्या प्रतीयते एव केवलं, न तु कर्त्तव्यतया यज्ञे विधीयते न पशौ ॥ कथं न पशौ विधीयते इति चेत् । विधायकस्याभावात् । आख्यातशब्दो विधायको भविष्यतीत्येतदपि नोपपद्यते, द्रव्यदेवतासम्बन्धस्य स विधायकः सन् आलभते इति न संख्यासंख्येयसम्बन्धं विधातुमर्हतीति । भिद्येत हि तथा वाक्यम् । तस्माद् विवक्षिता संख्या इति ॥ १४ ॥ आ० नि० ॥

## शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं यथान्येषाम् ॥ १५ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति । न यज्ञे संख्याशब्देन श्रूयते इति । आख्यातवाच्ये हि अर्थे उपलभ्यते, लोके पशुमानयेत्येकवचने सति एकत्वपशुविशिष्टमानयनं प्रतीयते । पशू आनयेति द्वित्वविशिष्टं गम्यते । तत्र हि एकत्वमपैति, द्वित्वमुपजायते । यस्यागमे यदुपजायते, स तस्यार्थ इति गम्यते । तस्य ज्ञानं, यथान्येषां शब्दानाम् । अश्वमानयेति उक्ते अश्वानयनं प्रतीयते । गामानयेति गवानयनम् । तत्राऽश्वोऽपैति गौश्चोपजायते, तेन ज्ञायते, अश्वशब्दस्याऽश्वोऽर्थो गोशब्दस्य गौरिति ॥ यदुक्तं, श्रुत्या वाक्यार्थो बाध्यते इति । उच्यते । न श्रुतिर्ब्रूते, वाक्यार्थो नास्तीति । केवलं तु प्रातिपदिकार्थगतां संख्यामाह । तादृशी संख्या वाक्येन यज्ञे विधीयते । प्रातिपदिकार्थो हि आख्यातवाच्येन सम्बद्ध्यते, विभक्त्यर्थोऽपि । तथाहि । तद्विशेषणविशिष्ट आलम्भो गम्यते । तत्रैकार्थत्वादेकवाक्यमवकल्पते । पशौ हि संख्यायां विधीयमानायामेक आख्यातशब्दो न शक्नुयादाख्यातार्थं विधातुं, संख्यासंख्येयसम्बन्धं च । तस्माद् यज्ञे विवक्षिता संख्येति ॥ १५ ॥ सि० ॥

## तद्वच्च लिङ्गदर्शनम् ॥ १६ ॥

किम् ? इति । कर्णा याम्या अवलिप्ता रौद्रा, नभोरूपाः पार्जन्याः तेषामैन्द्राग्नो दशम इति । यदि त्रित्वं विवक्षितं तदा ऐन्द्राग्नो दशमो भवति । तथा कृष्णा भौमाः, धूम्रा आन्तरिक्षाः, बृहन्तो दिव्याः शबला वैद्युताः, सिध्मास्तारका इति प्रकृत्य आह, अर्द्धमासानां वा एतद् रूपं यत् पञ्चदशिन इति । तस्मादपि पश्यामो, विवक्षिता संख्येति । यत्तूक्तम् । एकां गामित्यविवक्षां दर्शयतीति । अत्रोच्यते । गोसंख्यासम्बन्धं विधातुमेतदुच्यते । इतरथा हि । गोदक्षिणासम्बन्धो विहितो गम्येत । तस्माद् विवक्षितेऽपि वाच्यमेतत् । अवी द्वे धेनू द्वे त्रीन् ललामानिति चानुवादाः ॥ १६ ॥ ॥ युक्तिः ॥ पश्वेकत्वादेर्विवक्षाधिकरणम् ॥ ५ ॥ पश्वेकत्वन्यायः ॥

## तथा च लिङ्गम् ॥ १७ ॥

एवं च कृत्वा समानश्रुतिकं लिङ्गमपि विवक्षितं भविष्यति । त-

त्रेदं दर्शनमुपपद्यते । वसन्ते प्रातराग्नेयीं कृष्णग्रीवामालभते, ग्रीष्मे माध्यन्दिने सिंहीमैन्द्रीं शरदि अपराह्णे श्वेतां बार्हस्पत्यामिति । तत्र श्रूयते । गर्भिणयो भवन्तीति । गर्भः स्त्रीणां गुणः । तेन स्त्रियो दर्शयतीति भविष्यति । तथा अश्व ऋषभो वृष्णिर्वस्तः पुरुष इति, ते प्राजापत्या इति । तत्र श्रूयते । मुष्करा भवन्ति सेन्द्रियत्वायेति । मुष्करत्वं पुंसां गुणः । तेन पुंप्राप्तिं दर्शयतीति ॥ अधिकरणान्तरं वा । तथा च लिङ्गमिति । संख्याधिकरणं लिङ्गाधिकरणेऽतिदिश्यते। लिङ्गमविवक्षितम् । श्रुत्या वाक्यस्य बाधितत्वात् । न च विवक्षितमिव श्रूयते इति, भवति लिङ्गम् । स्त्री गौः सोमक्रयणीति स्त्रीवचनात् सोमक्रयणीत्यविवक्षितमेव लिङ्गं प्रतीयते । ननु कथं मृगीमानयेति न मृग आनीयते । नैवम् । अशब्दं तु तत्, पूर्वो धावतीति यथा । लिङ्गं विवक्षितं वा वाक्यार्थस्य श्रुत्याऽप्रतिषिद्धत्वात् । तथा च लिङ्गं, गर्भिणयो भवन्तीति । तथा च, मुष्करा भवन्तीति । यदुक्तं, स्त्री गौः सोमक्रयणीति । तत्र स्त्रीत्यविवक्षितम् । तथा प्रजापतये पुरुषान् हस्तिन आलभते इति पुरुषग्रहणमविवक्षितम् । विस्पष्टो हि न्याय उक्तो लिङ्गविवक्षायाम् । तस्माद् विवक्षितं लिङ्गमिति ॥ १७ ॥ ॥ ॥ युक्तिः ॥ पूर्वोऽधिकरणांशः ॥ लिङ्गस्य विवक्षितत्वाऽधिकरणं च ॥ ६ ॥

## आश्रयिष्वविशेषेण भावोऽर्थः प्रतीयेत ॥ १८ ॥

अत्राश्रयिणः पदार्था उदाहरणम् । उत्तमः प्रयाजः पशुपुरोडाशः स्विष्टकृदित्येते यागा उदाहरणम् । एषु सन्देहः । किं यजिमात्रं संस्कारो देवतायाः, उत यजिना अदृष्टं देवतायां क्रियते इति । किं प्राप्तम् । आश्रयिषु अविशेषेण भावोऽर्थः प्रतीयते इत्याश्रयिष्वेवञ्जातीयकेष्वपूर्वस्य भावोऽर्थः प्रत्येतव्योऽविशेषादन्यैराख्यातशब्दैः। यजतिददातिजुहोतीति । उक्तमेतद् भूतं भव्यायोपदिश्यते इति ॥१८॥

## चोदनायान्त्वनारम्भो विभक्तत्वान्न ह्यन्येन विधीयते ॥ १९ ॥

अस्यां तु चोदनायामनारम्भोऽपूर्वस्य । विभक्तोऽयमाख्यातशब्दो, यो दृष्टार्थस्ततो नापूर्वम् । यः खल्वऽदृष्टार्थस्ततोऽपूर्वमिति । दृष्टार्थश्चायम् । अस्मिन् हि यागे क्रियमाणे देवता स्मर्य्यते, स्विष्टकृ-

स्यपि द्रव्यं प्रतिपाद्यते । न चान्येन शब्देनात्र अपूर्वं विधीयते । तस्माद् यागमात्रं संस्कार इति ॥ १९ ॥ ॥ आ० ॥

**स्याद्वा द्रव्यचिकीर्षायां भावोऽर्थे च गुणभूतताऽऽश्रयाद्धि गुणीभावः ॥ २० ॥**

स्याद् वा अपूर्वमतः, सत्यामपि देवताचिकीर्षायां, तस्मिन् देवतासंस्कारार्थे गुणभूतता यागस्य द्रव्यप्रतिपादनेन च । मन्त्रेण तत्र देवता स्मर्य्यते । तस्मिन् मन्त्रेण दृष्टेऽर्थे क्रियमाणे त्यागोऽपरोऽदृष्टार्थः श्रूयते तस्य न किञ्चिद् दृष्टमस्ति । देवताश्रयात्तु देवतागतं तदपूर्वमिति गम्यते ॥ २० ॥ ॥ सि० ॥ आश्रयिणामदृष्टार्थताधिकरणम् ॥ ७ ॥

**अर्थे समवैषम्यतो द्रव्यकर्मणाम् ॥ २१ ॥**

अतिक्रान्तस्तृतीयविषयः । अतः प्रभृति द्रव्याणां कर्मणां चार्थे प्रयोजने समवैषम्यं वक्ष्यते । क्वचित् साम्यं, क्वचिद् वैषम्यम् । आमिक्षावाजिनयोर्वैषम्यं, क्रयपांशूनां वैषम्यं, दण्डस्य मैत्रावरुणधारणे यजमानधारणे च साम्यम् । एवं तत्र तत्र द्रष्टव्यं साम्यं वैषम्यं चेति ॥ २१ ॥ ॥ प्रतिज्ञाधिकरणम् ॥ ८ ॥

**एकनिष्पत्तेः सर्वं समं स्यात् ॥ २२ ॥**

चातुर्मास्येषु वैश्वदेवे श्रूयते, तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति । तत्र सन्देहः । किं तप्ते पयसि दध्यानयनमामिक्षा प्रयोजयति, न वाजिनम्, उत उभयमिति । किं प्राप्तम् ? । उभयमिति । कुतः । यस्मिन् कृते, यन्निष्पद्यते प्रयोजनवत्, तत् तस्य प्रयोजकमिति गम्यते । दध्यानयने च कृते उभयं निष्पद्यते । आमिक्षापि । तत एव वाजिनमपि । तत्रान्यतरार्थे क्रियेत, यदि विनिगमनायां हेतुर्भवेत् । अगम्यमाने विशेषे उभयार्थमानयनमिति गम्यते । तस्मादेका असौ उभाभ्यामपि प्रयोजिता निष्पत्तिरिति ॥ २२ ॥ ॥ पूर्व० ॥

**संसर्गरसनिष्पत्तेरामिक्षा वा प्रधानं स्यात् ॥ २३ ॥**

नैतदस्ति, उभयं प्रयोजकमिति । आमिक्षा प्रयोक्त्री । कुतः । नात्र यद्दधिपयोभ्यां निर्वर्त्यते, तद्धविः । यदि तद्धविः स्यादुभयं ताभ्यामेव निष्पद्यते इति गम्येत विशेषः । किं तर्हि हविरिति । पयो

दधिसंसृष्टम् । कुत एतत् । सा वैश्वदेवीत्युच्यते, न ततो यन्नि-ष्पद्यते इति ॥ ननु स्त्रीलिङ्गनिर्देशाद् आमिक्षा हविः । सा च ततो निष्पद्यते । वाजिनञ्च हविः । तदपि निष्पद्यते इति । नेत्युच्यते । तदेव हि पयः तप्तं दधिसंयुक्तमामिक्षा भवति तस्मात् स्त्रीलिङ्गम् अदोषः । आह । यदि पयो दधिसंसृष्टं हविः । किं तर्हि । उच्यते । आमिक्षा प्रयोजिकेति । उच्यते । आमिक्षायां दधिपयसी विद्येते, न वाजिने । कथमवगम्यते । संसर्गरसनिष्पत्तेः । तत्र हि दधिपयसोः संसृष्टयो रस उपलभ्यते, तेन तत्र दधिपयसी इत्यनुमानं भवति । वाजिने तिक्तकटुको रसः ॥ आह । तप्ते पयसि दध्यानि आनायमाने उभयं भवति । दध्ना च पयः संसृज्यते वाजिनाच्च विविच्यते । तत्र संसर्गश्चिकीर्षितो, न विवेक इति । कुत एतत् । उच्यते । शाब्दः संसर्गो दध्ना, अशाब्दो वाजिनेन विवेकः पयस इति । सर्वनाम च पूर्वोक्तेन शब्देनैकवाक्यतां याति । इतरस्मिन् पक्षे पयसि दध्यान-यनं वाजिनविवेकलक्षणार्थं स्यात् । श्रुतिलक्षणाविषये च श्रुतिर्न्या-य्या । तस्माद् आमिक्षार्थं दध्यानयनम् । आमिक्षाशब्दश्चात्रानुवादः । आमिक्षैव सा भवति यत्र तप्ते पयसि दध्यानीयते । तस्मादामिक्षा प्रयोजकत्री, वाजिनमप्रयोजकमिति ॥ २३ ॥ ॥ सि० ॥

## मुख्यशब्दाभिसंस्तवाच्च ॥ २४ ॥

न चोभयं प्रयोजकं न्याय्यम् । नात्र वचनमस्ति । इदं प्रयोजक-मिदं नेति । असति प्रयोजकेऽनर्थकं भवतीति प्रयोजकं कल्प्यते । तत्रैकस्मिन्नपि प्रयोजके सिद्धेऽर्थवति उपदेशे नान्यदपि प्रयोजकं भवितुमर्हति । न च न गम्यते विशेषः । कथं गम्यते । मुख्यशब्दा-भिसंस्तवान्मुख्यशब्दः संस्तोतुं न्याय्य इति । प्राथम्यात्तु तस्य तावत् प्रयोजकत्वज्ञानम् । तस्मिन् सति प्रयोजके, परिक्षतत्वादानर्थक्यस्य, न द्वितीयमपि प्रयोजकम् । प्रथमा च आमिक्षा, द्वितीयं वाजिनम् । तस्मादामिक्षा प्रयोजकत्री ॥ अपि च मुख्यशब्देन चामिक्षा स्तूयते । मिथुनं वै दधि च शृतं च अथ यत् संसृष्टं मण्डमिव मस्त्विव परि च ददृशे गर्भ एव स इति, गर्भस्तुता आमिक्षा । मिथुनस्य च गर्भः प्रयोजको, न गर्भोदकम् । तस्मादपि आमिक्षा प्रयोजिकेति मन्यामहे । किं भवति प्रयोजनम् । यद्युभयं प्रयोजकं, वाजिने नष्टे,

पुनस्तप्ते पयसि दधि आनेतव्यम् । अथ वाजिनम् अप्रयोजकं, नष्टे वाजिने लोपो दध्यानयनस्य ॥ २४ ॥ हेतुः ॥ तप्ते पयसि दध्यानयनस्याऽऽमिक्षाप्रयुक्तताधिकरणम् ॥ ९ ॥ वाजिनन्यायः ॥

## पदकर्माप्रयोजकं नयनस्य परार्थत्वात् ॥ २५ ॥

ज्योतिष्टोमे श्रूयते, अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीति । तत्रेदमपरं श्रूयते । षट्पदान्यनुनिष्क्रामतीति । तथा, सप्तमं पदं गृह्णातीति । इदमपरम् । यर्हि हविर्धाने प्राची प्रवर्त्तयेयुस्तर्हि तेनाक्षमभ्यञ्ज्यादिति । तत्र सन्देहः । किं सोमक्रयण्यानयनं पदपांस्वर्थम् ? उत क्रयप्रयुक्तमिति । किं प्राप्तम् । नयनादुभयं निष्पद्यते, क्रयः पदं च । तस्मादुभयं प्रयोजकम् । न हि गम्यते विशेष इति । तदुक्तम् । एकनिष्पत्तेः सर्वं समं स्यादिति ॥ एवं प्राप्ते ब्रूमः । पदकर्म अप्रयोजकमिति । कुतः । यस्मान्नयनं क्रयार्थम् । न हि नयनमन्तरेण विशिष्टे देशे क्रय उपपद्यते । तस्मात् क्रयेण तावन्नयनं प्रयुक्तमिति गम्यते । क्रयप्रयुक्तं चेद्, न पदप्रयुक्तमपि भवितुमर्हति।

अपि चैकहायन्याः पदपांसवो ग्रहीतव्या इति नास्ति शब्दः। ननु प्रकृतैकहायनी पदपांसुग्रहणवाक्येन सम्भन्त्स्यते। नेति। ब्रूमः। एकहायन्या क्रीणातीति विशिष्टेन वाक्येन क्रये उपदिष्टा एकहायनी प्रकृतत्वात् पदपांसुवाक्येन सम्बद्ध्यते, प्रकरणाच्च वाक्यं बलीयः । अथेदानीमेकहायनी क्रयणार्थं सङ्कीर्त्तिता सती सन्निहितत्वात् प्रसङ्गमुपजीवता पदपांसुवाक्येन सम्बद्ध्येत । याऽसौ परार्था, एतस्याः पदं ग्राह्यमिति । तस्मात् क्रयप्रयुक्तं नयनम्, अप्रयोजकं पदमिति ॥ किं पुनश्चिन्तायाः प्रयोजनम् । यद्युभयम् । एकहायनीनयनस्य प्रयोजकम् । यदैकहायन्याः सप्तमं पदं ग्रावणि निधीयते, तदा पुनरेकहायनी नीयेत सप्तमाय पदाय । यदा पदं न प्रयोजकं, तदा नैकहायनी पुनः षट्पदान्यनुनिष्क्रामयितव्येति ॥ २५ ॥ ॥ गवाऽऽनयनस्य पदकर्माप्रयुक्तताधिकरणम् ॥ १० ॥

## अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्तत्वात्तदर्थो हि विधीयते ॥ २६ ॥

दर्शपूर्णमासयोः श्रूयते,कपालेषु पुरोडाशं श्रपयतीति। तथा, पुरोडाशकपालेन तुषानुपवपतीति । तत्र संदेहः । किमुभयं कपालानि प्रयो-

जयति पुरोडाशश्रपणं तुषोपवापश्च,उत श्रपणं प्रयोजकं, न तुषोपवाप इति । किं प्राप्तम् । विनिगमनायां हेतोरभावादुभयमिति प्राप्ते।उच्यते अर्थाभिधानंप्रयोजनसम्बद्धमभिधानं यस्य यथा पुरोडाशकपालमिति पुरोडाशार्थं कपालं पुरोडाशकपालम्। कथमेतदवगम्यते । पुरोडाशस्तावत् तस्मिन् काले नास्ति, येन वर्त्तमानः सम्बन्धः कपालेन स्यात्। तेनैव हेतुना न भूतः। स एष कपालस्य पुरोडाशेन भविष्यता सम्बन्धः। भविष्यता सम्बन्धश्च तन्निमित्तस्य भवति। तस्मात् पुरोडाशेन प्रयुक्तं यत् कपालं, तेन तुषा उपवप्तव्या इति । एवञ्च सति चरौ पुरोडाशाभावे यदा तुषानुपवप्तुं कपालमुपादीयते,न तत् पुरोडाशकपालं स्यात् । न चेन्न तेन तुषा उपवप्तव्या भवन्ति । तस्मान्न तुषोपवापः कपालानां प्रयोजकः । प्रयोजकं तु श्रपणमिति ॥ २६ ॥ कपालानां तुषोपवापाप्रयुक्तताधिकरणम् ॥ ११ ॥

## पशावनालम्भाल्लोहितशकृतोरकर्मत्वम् ॥२७॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । तत्र श्रूयते । हृदयस्याग्रेऽवद्यत्यथ जिह्वाया इत्येवमादि । तथा, लोहितं निरस्यति, शकृत्संप्रविद्ध्यति, स्थविमतो बर्हिरलङ्क्यापास्यतीति । तत्र सन्देहः । किं हृदयादिभिरवदानैरिज्या पशोः प्रयोक्त्री, उत शकृत्संप्रव्याधो लोहितनिरसनं च तदपि प्रयोजकमिति । किं प्राप्तम् । एकनिष्पत्तेः सर्वं समं स्यात् । उभयं प्रयोजकमिति ॥ एवं प्राप्ते ब्रूमः । पशौ शकृल्लोहितयोरप्रयोजकत्वम् । न हि तदर्थः पशोरालम्भः । शकृत्संप्रविद्ध्यति लोहितमपास्यतीत्युच्यते । न पशोरन्यस्य वेति । पशुरग्नीषोमीयो वाक्येन । यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । शकृल्लोहिते पशोः प्रकरणेन भवेतां, प्रकरणं च वाक्येन बाध्यते । नन्वेते शकृल्लोहिते प्रतिपाद्येते, तेन यागार्थस्य पशोर्नान्यस्येति निश्चयः। एवञ्चेत् अप्रयोजके शकृल्लोहिते इति। किं भवति प्रयोजनम् । साम्ये सति शकृल्लोहिताभावेऽन्यः पशुरालम्भनीयः, शकृल्लोहितयोरप्रयोजकत्वे लोपः ॥ २७ ॥ ॥ शकृल्लोहितयोः पशावप्रयोक्तृत्वाऽधिकरणम् ॥ १२ ॥

## एकदेशद्रव्यश्चोत्पत्तौ विद्यमानसंयोगात्॥२८॥

दर्शपूर्णमासयोः श्रूयते, उत्तरार्द्धात् स्विष्टकृते समवद्यतीति ।

तत्र सन्देहः । किं पुरोडाशस्याग्नेययागः प्रयोजकः, स्विष्टकृदप्रयोजकः? उत उभयमिति । किं प्राप्तम् । एकानुपपत्तेः सर्वं समं स्यादिति । एवं प्राप्ते ब्रूमः । एकदेशद्रव्यश्चैवजातीयकोऽप्रयोजको भवेत् । कुतः । विद्यमानसंयोगात् । नैकदेशकर्मावयविनं प्रयुङ्क्ते । विद्यमानस्यावयविन एकदेश उपादातव्य इति । तत्रार्थो भवति । नावयविनमुपाददीतेति । यथेक्षुखण्डमस्मै प्रयच्छ, मोदकशकलमस्मै प्रयच्छेति, नेक्षुमुपाददीतेति गम्यते । सत इक्षोः खण्डमुपाददीत, सतो मोदकाच्छकलमुपाददीतेति । तस्मादन्यार्थे द्रव्यं तस्योत्तरार्द्धादवदेयम् । अस्ति चाग्न्यर्थः पुरोडाशः । तस्मात् स्विष्टकृदप्रयोजक इति ॥ २८ ॥ सि० ॥

## निर्देशात्तस्यान्यदर्थादिति चेत् ॥ २९ ॥

इति चेत् पश्यसि, अप्रयोजकः पुरोडाशस्य स्विष्टकृदिति । नैतदेवम् । अग्निं प्रति निर्देशात् तस्य पुरोडाशस्य स्विष्टकृदर्थमन्यः पुरोडाश उत्पादयितव्यो यस्योत्तरार्द्धात् स्विष्टकृदिज्यते । तस्यान्यस्य सङ्कल्पितस्य नेष्टे यजमानः । कथमसौ तदन्यस्यै देवतायै दद्यात् । कथमग्निं प्रति निर्देश इति । इदं श्रूयते, अङ्गिरसो वा इत उत्तमाः सुवर्गं लोकमायंस्ते यज्ञवास्त्वभ्यायंस्ते पुरोडाशं कूर्मं भूत्वा सर्पन्तमपश्यंस्तमब्रुवन् इन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व आदित्याय ध्रियस्व स नाध्रियत तमब्रुवन् अग्नये ध्रियस्वेति सोऽध्रियत । यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति । तस्मात्तेन स्विष्टकृतो न सम्बन्धः । एवं चेत्तस्मादन्यद् द्रव्यमर्थादुत्पादयितव्यम् । न ह्यनुत्पन्नस्य द्रव्यस्योत्तरार्द्धो भवतीति ॥ २९ ॥ आ० ॥

## न शेषसन्निधानात् ॥ ३० ॥

नैतदेवं, सन्निहितो हि शेषः । यस्मिन्ननुत्पाद्यमानेऽर्थो न सिद्ध्यति, सोऽर्थादुत्पाद्यते । सन्निहिते च शेषे सति सिद्ध्यति उत्तरार्द्धाद् ग्रहणम् । तस्मान्नार्थाद् द्रव्यमुत्पादयितव्यं, यदेवान्यार्थं द्रव्यं सन्निहितं तस्यैवोत्तरार्द्धाद्ग्रहीतव्यम् । उत्तरार्द्धमात्रं हि स्विष्टकृत श्रूयते, नामुष्य द्रव्यस्येति । न चैतावता व्यवहारो भवति । सर्वो हि कस्यचिदुत्तरार्द्धः । स एष सन्निहितमपेक्षते । सन्निहितं

व परार्थम् । तस्मात् परार्थाद् द्रव्यात् स्विष्टकृदिज्या । अतश्च अप्रयोजिकेति । यदुक्तम् । अनीशा अनेन न शक्यं दातुमिति । तदुच्यते । वाचनिक एव शेषप्रतिपादनार्थ उत्सर्गः । स शक्यः कर्तुम् । दानं हि उत्सर्गपूर्वकः परस्य स्वत्वसम्बन्धः । स न शक्योऽनीशा अनेन ॥ ३० ॥ आ० ॥ नि० ॥

कर्मकार्यात् ॥ ३१ ॥

कर्मनिमित्तश्च स्विष्टकृतो भाग इति श्रूयते । कथम् । देवा वै स्विष्टकृतमब्रुवन् हव्यं नो वहेति । सोऽब्रवीद्वरं वृणै भागोमेऽस्त्विति । वृणीष्वेत्यब्रुवन् । सोऽब्रवीद् उत्तरार्द्धादेव मह्यं सकृत्सकृदवद्यादिति कर्म कुर्वतो भागोऽयमुत्तरार्द्धादिति स्तुतिर्भवति । यथाग्नेयस्योत्तरार्द्धादित्युच्यते । ततोऽस्ति कर्मार्थेन भागेन सादृश्यमिदं, तदाग्नेयं हव्यं यत् किल वहसीति । तत्र सति सादृश्ये स्तुतिरुपपद्यते । प्रयोजकत्वे चासति सादृश्ये स्तुतिसामञ्जस्यं न स्यात् । तस्मादप्रयोजकः पुरोडाशस्य स्विष्टकृद्याग इति ॥ ३१ ॥

लिङ्गदर्शनाच्च ॥ ३२ ॥

लिङ्गमपि भवति तद् यत् सर्वेभ्यो हविर्भ्यः समवद्यति । तस्मादिदमुदरे विश्वरूपमन्नं समवधीयते इति । यदि परार्थाद् द्रव्यात् सन्निहितादिज्यते तदा तत्सन्निधानाविशेषात् सर्वेभ्योऽवदीयत इत्युपपद्यते । प्रयोजकत्वे त्वेकस्मादेवावदीयेत । तस्मादप्यप्रयोजकः ॥ तथेदमपरं लिङ्गं, शेषादिडामवद्यति शेषात् स्विष्टकृते यजतीति । नन्वयं विधिः स्यात् । नेति ब्रूमः । नात्र विधिविभक्तिर्वर्त्तमानापदेशो ह्ययमिति ॥ ३२ ॥ ॥ ॥ युक्तिः ॥ पुरोडाशस्य स्विष्टकृदप्रयुक्तताऽधिकरणम् ॥ १३ ॥

अभिघारणे विप्रकर्षादनुयाजवत् पात्रभेदः स्यात् ॥ ३३ ॥

अस्ति वाजपेयो, वाजपेयेन स्वाराज्यकामो यजेतेति । तत्र श्रूयते, सप्तदश प्राजापत्यान् पशूनालभते, सप्तदशो वै प्रजापतिः प्रजापतेराप्त्यै इति । प्राजापत्यानां क्रतुपशूनां च समुच्चयो वक्ष्यते । प्राजापत्येषु चाम्नानादिति । अस्ति तु प्रकृतौ, प्रयाजशेषेण हवींष्यभिघारयतीति । तत्र सन्देहः । किं प्राजापत्यानां वपा अभिघारयितुं प्रयाजशेषस्य धारणार्थं पात्रमपरमुत्पादयितव्यं, ततस्तेन प्राजापत्यानां वपा अभिघारयितव्याः ? उत न शेषो धारयितव्यः, नैव ततः

प्राजापत्यानां वपा अभिघारणीया इति । किं प्राप्तम् । अभिघारणे प्रयाजशेषधारणार्थं पात्रमुत्पाद्यते । प्रातःसवने च प्रयाजशेषो विप्रकृष्टकाले माध्यन्दिने सवने, ब्रह्मसामकाले प्राजापत्यानामालम्भः श्रूयते । तान् पर्य्यग्निकृतानुत्सृजन्ति । ब्रह्मसाम्न्यालभते इति । व्यापृता च जुहूर्भवति । तस्मात् पात्रान्तरमुत्पादनीयमिति । यथाऽनुयाजेषु पृषदाज्यधारणार्थं पात्रमुत्पाद्यते, पृषदाज्येनानुयाजान् यजतीति वचनात् । एवमत्रापीति ॥ ३३ ॥ पूर्व० ॥

## न वाऽपात्रत्वादपात्रत्वं त्वेकदेशत्वात् ॥ ३४ ॥

न वा प्राजापत्यानां वपा अभिघार्य्याः । कुतः । शेषाभावात् । कथं शेषाभाव इति चेत् । अपात्रत्वात् । कथमपात्रता । एकदेशत्वात् । प्रयाजार्थस्य हि गृहीतस्यान्यस्य स एकदेशः शेषः । किमतो यद्येवम् । एकदेशव्यापारः श्रूयमाणो नावयविनमुपादेयत्वेन चोदयति । आह । उत्पत्तिं न चोदयेत् । धारणमुत्पन्नस्यार्थाद् भविष्यतीति । उच्यते । एकदेशत्वादभिघारणं द्रव्यमेव न प्रयुङ्क्ते इत्युच्यते । कृतार्थस्य द्रव्यस्यायमेकदेशः प्रतिपाद्यते, नाभिघारणमर्थकर्म्म । ननु हविषां, द्वितीयानिर्देशात् प्राधान्यं स्यात् । नेत्युच्यते । अदृष्टो हि हविषामुपकारः कल्प्येत । आज्यप्राधान्ये पुनर्जुह्वा रिक्तत्वं दृष्टं प्रयोजनम् । आज्यभागार्थेन आज्येन असंसर्गा, जुह्वा रिक्तया प्रयोजनं, नाभिघृतेन हविषा । तस्मात् प्राजापत्यानामभिघारिताभिर्वपाभिः प्रयोजनमेव नास्ति, किमर्थं शेषो धार्य्यते इति ॥३४॥सि०॥

## हेतुत्वाच्च सहप्रयोगस्य ॥ ३५ ॥

हेतुत्वाच्चाभिघारणस्य । सहालभते इति स्तुतिर्भवति । तीर्थं वै प्रातःसवनं, यत् प्रातःसवने पशव आलभ्यन्ते, तीर्थं एवैतानालभते, सयोनित्वायाथो वपानामभिघृतत्वायेत्यर्थान्तरेण वपाभिघारणमनुगृह्णन्नेहास्तीति दर्शयति ॥ ३५ ॥

## अभावदर्शनाच्च ॥ ३६ ॥

अभावं खल्वप्यभिघारणस्य दर्शयति, सव्या वा एतर्हि वपा यर्हि अनभिघृता, ब्रह्म वै ब्रह्मसाम, यद् ब्रह्मसाम्न्यालभते तेन असव्याः, तेन अभिघृता इति । सव्यशब्दो रूक्षे भाष्यते । सव्या वपा इत्यनभिघृततां दर्शयति ॥ ३६ ॥ ॥ हेतुः ॥

## सति सव्यवचनम् ॥ ३७ ॥

आह नैतद्दर्शनं, सत्येव हि अभिघारणे भवत्येतत् सव्यवचनम्। अस्ति हि वपाया अन्यदभिघारणम् । उपस्तृणात्याज्यं हिरण्यशकलं, वपा हिरण्यशकलं ततोऽभिघारयतीति । तस्मिन् सति कथं सव्या भवेयुः । ब्रूते च । तस्मान्नैतच्छक्यमवगन्तुम् । रूक्षास्ता वपा दृश्यन्ते इति।तेन नूनमभिघारणं प्रयाजशेषेणास्तीति । सत्यस्मिन्नभिघारणे प्रत्यक्षे रूक्षास्ता इति दर्शनं व्यामोह इति ॥ ३७ ॥ ॥ पूर्व० ॥

## न तस्येति चेत् ॥ ३८ ॥

एवं चेद् दृश्यते, सत्यभिघारणे सव्या इति वचनमलिङ्गमिति । नालिङ्गं, तस्यैतद्वचनं यत् स्नेहनं करोति । कतमत् तत् । यत् प्रथमम् । प्रथमं हि स्नेहनं करोति, न द्वितीयम् । स्निग्धस्य तद् भवति । न च स्निग्धस्य स्नेहनं क्रियते, यथा भवति लोके वादो, यदस्माभिः कान्तारान्निर्गतैर्देवदत्तस्य गृहे स्निग्धं भुक्तं, तेन वयमरूक्षाः कृता इति । सत्स्वप्यन्येषु स्निग्धेष्वेव भोजनेष्वेवं तस्याऽरूक्षकरणस्याभावाद् रूक्षा इति वचनमुपपद्यते, अस्मिँस्तु सति नोपपद्यते । तस्मादपि प्रयाजशेषेणाभिघारणं प्राजापत्यानां नास्तीति ॥ ३८ ॥

## स्यात्तस्य मुख्यत्वात् ॥ ३९ ॥

इदं परोत्तरं सूत्रम् । यदि प्रथमस्याभावात् सव्या इति वचनं भवत्यनुपपन्नं, तर्ह्यन्यस्य प्रथमस्य विद्यमानत्वात् । कतमत् तत् । यच्छ्रूप्यमाणाया अपरमुद्वासितायाः । अत्रोच्यते । स्यात्तस्य मुख्यत्वात् । यत् प्रयाजशेषेणाभिघारणम् । तस्यैवाभावादेतदुपपद्यते । सत्यपि श्रप्यमाणाया अभिघारणे उद्वासितायाश्च । यत् तावच्छ्रूप्यमाणायास्तदग्नेरर्चींषि दहन्ति, यदुद्वासितायास्तदग्न्यवयवा ऊष्मावयवाश्च नाशयन्ति । सैषा रूक्षैव । इदन्तु प्रयाजशेषेण शीतायाः क्रियते । तत् स्नेहयति । तेन स्निग्धायाः प्रदानकालमभिघारणं यत्, तन्न स्नेहयति । तदिदं स्नेहनस्याभिघारणस्याभावात् सव्यतावचनमुपपद्यते इति उक्तम् । तस्मान्न प्रयाजशेषा धार्य्यन्ते इति ॥ ३९ ॥ ॥ भा०नि०॥ अभिघारणे शेषधारणतत्पात्रयोरननुष्ठानाधिकरणम्॥१४॥

## समानयनं तु मुख्यं स्याल्लिङ्गदर्शनात् ॥ ४० ॥

दर्शपूर्णमासयोः श्रूयते, अतिहायेडो बर्हिः प्रति समानयतीति।

तत्र सन्देहः । किं समानयनमाज्यस्य धर्माणां च प्रयोजकमुताप्रयोजकमिति । किं प्राप्तम् । अप्रयोजकमिति । कुतः । प्रयाजानुयाजार्थस्याज्यस्यायमेकदेशः समानीयते इति पूर्वेण न्यायेनाऽप्रयोजकता प्राप्ता । तदुच्यते ॥ मुख्यं समानयनं लिङ्गदर्शनात् ॥ किं लिङ्गम् । चतुर्गृहीतान्याज्यानि भवन्ति । न ह्यत्रानुयाजान् यक्ष्यन् भवतीत्यातिथ्यायां श्रूयते । यदि प्रयाजार्थं समानयनं, ततस्तत्रैकं चतुर्गृहीतं समानीयते । एकमप्यनुयाजानां भवति । ततश्चातिथ्येष्टां तावत् सन्तिष्ठते इत्यनुयाजाभावे उपभृति समानयनार्थमेकं चतुर्गृहीतं प्राप्तं, न त्वनुयाजार्थम् । तत्र बहूनां चतुर्गृहीतानां दर्शनमुपपद्यते । इतरथा हि अनुयाजाभावे नैवोपभृति चतुर्गृह्येत । तत्र चतुर्गृहीतानीति बहुवचनं नोपपद्यते । तस्मात् प्रयोजकं समानयनमिति ॥ ननु लिङ्गमुपदिश्यते । का प्राप्तिः । उच्यते । दृष्टं तत्र प्रयोजनम् । प्रयाजौ द्वौ यष्टव्यौ । तत्र जुह्वामाज्येन प्रयोजनं नोपभृति रिक्तायाम् । उपभृतो रेचनमदृष्टार्थं, जुह्वां निधानं दृष्टार्थमेव । तेन प्रयाजहोमार्थमाज्यसमानयनमौपभृतमाज्यं प्रयोजयति । तदपि हि प्रयाजाऽर्थमनुयाजार्थञ्चेति वक्ष्यते ॥ ४० ॥

## वचने हि हेत्वसामर्थ्यं ॥ ४१ ॥

अथ कस्मान्न वचनमेतत्, चतुर्गृहीतान्याज्यानीति । उच्यते । वचने हि हेतुरसमर्थितः स्यात् । न हि अत्रानुयाजाद् यक्ष्यन् भवतीति । यदा समानयनं न प्रयाजार्थमिति गम्यते, तदा वचनम् । यदा वचनं, तदा नानुयाजाभावो हेतुः । असति हेतौ, न ह्यत्रानुयाजान् यक्ष्यन् भवतीति हेतुवन्निगदो नोपपद्येत । तस्मात् प्रयाजार्थं समानयनं प्रयोजकमौपभृतस्याज्यस्य । किं भवति प्रयोजनम् । प्रयाजार्थे समानयने यावत् प्रयाजार्थं, तावत् सर्वं समानेयमर्द्धमौपभृतस्य अप्रयोजकत्वे न नियोगतोऽर्द्धं यावत् तावद् वा ॥ ४१॥ आ०नि०॥ समानयनस्याज्यधर्मप्रयोजकताधिकरणम् ॥ १५ ॥

## तत्रोत्पत्तिरविभक्ता स्यात् ॥ ४२ ॥

दर्शपूर्णमासयोः श्रूयते, चतुर्जुह्वां गृह्णात्यष्टावुपभृति गृह्णातीति । तत्र सन्देहः । किं जौहवमौपभृतं चोभयमुभयार्थ– प्रयाजेभ्यश्चानुयाजेभ्यश्च, उत जौहवं प्रयाजेभ्यः, औपभृतमनुयाजेभ्यः ?

अथवा औपभृतं प्रयाजेभ्योऽनुयाजेभ्यश्चेति । किं प्राप्तम् । उभयमुभयार्थम् । कुतः । यद् यदाज्येन क्रियते, तस्मै भवितुमर्हत्यविशेषात् ॥ ४२ ॥ ॥पूर्व० ॥

**तत्र जौहवमनुयाजप्रतिषेधार्थम् ॥ ४३ ॥**

नैवम् । उभयमुभयार्थमिति । जौहवं प्रयाजार्थम्, औपभृतमुभयार्थम् । कथम् । यज्जुह्वां गृह्णाति, ऋतुभ्यस्तद् गृह्णाति, ऋतवो वै प्रयाजा इति जौहववचनमनुयाजप्रतिषेधार्थं प्रयाजान् सङ्कीर्त्तयति ॥ आह । ननु नास्त्यत्रानुयाजप्रतिषेधार्थं वचनम् । यदेतत् प्रयाजेभ्यस्तद् गृह्णातीति । प्रयाजेषूपदेशकमेतत् । नास्त्यस्यानुयाजप्रतिषेधे सामर्थ्यमिति । उच्यते । न ब्रूमः । प्रतिषेधकमेतदिति । किं तूत्पत्तिवाक्ये आज्यानां नैव प्रयोजनाभिसम्बन्धः । अनेन वचनेन प्रयाजप्रयोजनता क्रियते जौहवस्य । अनुयाजप्रयोजनताऽस्य वचनाभावादेव न गम्यते इति । अनुयाजप्रतिषेधार्थं वचनमित्युच्यते॥४३॥सि०

**औपभृतं तथेति चेत् ॥ ४४ ॥**

इति चेद् दृश्यते, जौहवमनुयाजेभ्यः प्रतिषिध्यते, औपभृतमुभयार्थमिति । भवतु जौहवं प्रयाजार्थं, न त्वौपभृतमुभयार्थम् । तदपि तथा स्याद् यथा जौहवम् । कथम् । एतदप्यनुयाजार्थमेव श्रूयते, यदुपभृति गृह्णाति अनुयाजेभ्यस्तद् गृह्णाति । छन्दांसि ह्यनुयाजा इति अनुयाजार्थताऽस्येति ॥ ४४ ॥ ॥ आ० ॥

**स्याज्जुह्वप्रतिषेधान्नित्यानुवादः ॥ ४५ ॥**

नैतदेवमुभयार्थं ह्यौपभृतम् । एवं हि श्रूयते । यदष्टावुपभृति गृह्णाति प्रयाजानुयाजेभ्यस्तद् गृह्णातीति । ननूक्तमनुयाजेभ्यस्तद् गृह्णातीत्यनुयाजार्थताऽस्येति । उच्यते । जुह्वप्रतिषेधान्नित्यानुवादः । उभयस्मिन्नौपभृते जौहवे चोभयार्थे प्राप्ते जौहवमनुयाजेभ्यः प्रतिषिद्धं, नौपभृतम् । तदौपभृतस्योभयार्थतायां सत्यामनुयाजार्थतावचनं नित्यानुवादो भवितुमर्हति, न शक्नोति प्रयाजार्थतां प्रतिषेद्धुम् । प्रत्यक्षश्रुता हि सा । तस्मादौपभृतमुभयार्थम् । समानयनं च ततो जुह्वां श्रूयते । तस्मादपि प्रयाजार्थता न शक्या बाधितुम् ॥ ॥ ४५ ॥ ॥ आ० नि० ॥ औपभृतजौहवयोः क्रमेणोभयानुभयार्थताऽधिकरणम् ॥ १६ ॥

## तदष्टसंख्यं श्रवणात् ॥ ४६ ॥

अष्टावुपभृति गृह्णातीति श्रूयते । तत्र सन्देहः । किं तदौपभृतमाज्यमष्टसंख्येन ग्रहणेन संस्क्रियते, उत चतुःसंख्या गुणभूता द्वयोर्ग्रहणयोरिति । किं तावत् प्राप्तम् । अष्टसंख्या गुणभूता, न चतुःसंख्ये द्वे इति । कुतः ॥ श्रवणात् ॥ अष्टसंख्या श्रूयते । चतुःसंख्या अष्टसंख्यया लक्ष्यते । श्रुतिलक्षणाविषये च श्रुतिर्न्याय्या, तस्माद् अष्टसंख्यं ग्रहणमेतदिति ॥ ४६ ॥ ॥ पूर्व० ॥

## अनुग्रहाच्च जौहवस्य ॥ ४७ ॥

अनुग्रहवादश्च भवति । चतुर्गृहीतं वा एतदभूत्तस्य आघारमाघार्य्य त्रिरितः प्राचीनं प्रयाजान् यजति समानयते चतुर्गृहीतत्वायेति चतुर्गृहीतानुग्रहः कथं स्यादिति । किं चतुर्गृहीतं भवति समानयनेन ? । नेति ब्रूमः । चतुर्गृहीतं प्रथममेव तत् । आघारेऽप्याघारिते, यद् अवशिष्टं चतुःसंख्यमेव तस्य ग्रहणमासीत् । किं तर्हि चतुर्गृहीतत्वायेति । चतुर्गृहीतस्यानुग्रहार्थम् । अल्पं हि चतुर्गृहीतं होमायापर्य्याप्तं तत्पर्याप्तं कथं स्यादिति । एवं चतुर्गृहीतशब्देनाल्पमिति लक्ष्यते । अल्पत्वं च बहुत्वं कस्यचिदपेक्ष्य भवति । यदि ह्यौपभृतमष्टसंख्यमेवं चतुर्गृहीतमल्पं भवति । तत्र चतुर्गृहीतशब्देन अल्पता शक्यते लक्षयितुम् । तस्मादपि पश्याम, औपभृते अष्टसंख्या गुणभूतेति ॥ ४७ ॥ युक्तिः ॥

## द्वयोस्तु हेतुसामर्थ्यं श्रवणं च समानयने ॥ ४८ ॥

तुशब्दः पक्षं व्यावर्त्तयति । द्वे एते चतुर्गृहीते । एवं हेतुः समर्थितो भवति । आतिथ्यायां चतुर्गृहीतानि आज्यानि भवन्ति । न हि अत्रानुयाजान् यक्ष्यन् भवतीति । असत्स्वप्यनुयाजेष्वेतदष्टगृहीतमेवौपभृतं भवेत् । यदाऽष्टसंख्या गुणभूता, न तदा द्वयोश्चतुर्गृहीतयोः सतोश्चतुर्गृहीतानि आज्यानीति बहुवचनमाज्येषूपपद्यते । तस्माच्चतुर्गृहीते द्वे इति ॥ आह, लिङ्गमेतत् । प्राप्तिरुच्यतामिति । तदभिधीयते । अनारभ्योच्यते, चतुर्गृहीतं जुहोतीति सर्वहोमेषु । तेन प्रयाजानुयाजेष्वपि न तदष्टगृहीतेन शक्यते बाधितुम् । नानाविषयत्वात् । अष्टगृहीतं हि ग्रहणे, चतुर्गृहीतं हि होमे । अस्ति हि सम्भवो यद् अष्टगृहीतं गृह्येत, चतुर्गृहीतं हूयेत । तदेतदिह अष्टत्वं ग्रहणे

भवति । कथं द्वे चतुर्गृहीते होमे सम्पादयेत् ? तस्माद् द्वे एते चतुर्गृहीते, अष्टगृहीते गृह्यमाणे गृह्येते द्वे न अगृहीत्वा अष्टगृहीतं कश्चित् सम्पादयेत् । तस्माद् द्वे एते चतुर्गृहीते इति ॥ अथ यदुक्तमष्टगृहीतं श्रूयते । श्रुतिश्च लक्षणाया गरीयसीत्युच्यते । उक्तमस्माभिरष्टसंख्यायाः प्रयोजनं, कथं द्वे चतुर्गृहीते स्यातामिति । अपिचाष्टावुपभृति गृह्णातीत्युपभृति समानीते द्वे चतुर्गृहीते कथं स्यातामिति । इतरथाऽसत्यष्टशब्दे नानापात्रयोर्गृह्येयाताम् । तस्मादष्टशब्दश्रवणमदोषः । साध्वेतत् । द्वे चतुर्गृहीते उपभृतीति । प्रयोजनं, द्वयोश्चतुर्गृहीतयोः सतोः समानयनेऽर्द्धं समानेतव्यं भवति । अष्टगृहीते सति न नियोगतोऽर्द्धम् । तथा यत्रानुयाजार्थं न ग्रहणं, तत्राप्यष्टगृहीतम् । यथा पूर्वः पक्षः । यथा च सिद्धान्तस्तथा चातुर्मास्येषु चतुर्गृहीतमुपभृति भवतीति ॥४८॥ ॥ सिद्धान्तः ॥ उपभृति द्विचतुर्गृहीताचरणाऽधिकरणम् ॥ १७ ॥ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये चतुर्थस्याध्यायस्य प्रथमः पादः समाप्तः ॥ ४ ॥ १ ॥ प्रयोजकपादोऽयम् ॥

अथ चतुर्थे अध्याये द्वितीयः पादः ॥ ४ ॥ २ ॥



## स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् ॥ १ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयो यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्रेदमाम्नातम् । खादिरे बध्नाति, पालाशे बध्नाति, रोहिते बध्नातीति । तत्सन्निधाविदमपरमाम्नायते । स्वरुणा पशुमनक्ति, यूपस्य स्वरुं करोतीति ॥

अथेदानीमिदं सन्दिह्यते, किं भेदेन यूपात् स्वरुरुत्पादयितव्यः, उत यूपं क्रियमाणमनुनिष्पन्नः शकलो ग्रहीतव्यः ? इति । तत्रेदं तावन्नः परीक्ष्यं, किं छेदनाद्युत्पत्तेः प्रयोजकः स्वरुः, उताप्रयोजकः ? । प्रयोजकश्चेद् भेदेन यूपान्निष्पाद्येत । न चेत् प्रयोजको, यूपं निष्पद्यमानमनुनिष्पन्नः शकलो ग्रहीष्यते इति । स कथं प्रयोजकः स्यात् । कथं वा न प्रयोजक इति । यद्येषा वचनव्यक्तिः, स्वरुशब्दवाच्यं भाव्यते । कथम् । जोषणादिना इतिकर्त्तव्यताविशेषेणेति । ततः, स्वरुणा पशुमनक्तीति स स्वरुरित्यवगतो ग्रहीष्यते । ततः प्रयोजकः । अथैवं विज्ञायते, स्वरुणा पशुमनक्तीति । अनवगतः

स्वरुः । एतावदस्य विज्ञायतेऽअनं तेन क्रियते इति । इदमपि, यूपस्य स्वरुं करोतीति यूपैकदेशं स्वरुकार्येऽअने विनियुङ्क्ते इति ततोऽप्रयोजकः ॥ किं तावत् प्राप्तम् । स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् । स्वरुर्न यूपैनैकनिष्पत्तिः स्यात् । यूपमनपेक्षमाणस्य स्वरोर्जोषणादिनोत्पत्तिः । कुतः । स्वकर्मशब्दत्वात् । स्वो हि अस्य कर्मशब्दः स्वरुताया विधायको भवति, स्वरुं करोतीति । एवञ्च यूपकाष्ठावयवस्य स्वरुत्वं क्रियते इति । यूपस्य स्वरुं करोतीति लक्षणया यूपशब्दः, खदिराद्यवयवस्येत्यर्थः । कुतः । स्वरुत्वभावना हि श्रुत्या गम्यते । स्वरुं करोतीति, स्वरुमुत्पादयतीति । यूपावयवोपादानं वाक्येन । वाक्याच्च श्रुतिर्बलीयसीति । तस्मादेवं सति न नियोगतो यूपकाष्ठादेव स्वरुरुत्पादयितव्यः । निरपेक्षादन्यस्मादपि वृक्षात् कर्त्तव्यो भेदेनेति ॥ १ ॥ ॥ पूर्व० ॥

## जात्यन्तराच्च शङ्कते ॥ २ ॥

इतश्च निरपेक्षस्य स्वरोरुत्पत्तिरिति गम्यते । कुतः । जात्यन्तरादपि आशङ्का भवति, वृक्षान्तरात् । कथम् । नान्यस्य स्वरुं कुर्यात्, यद्यन्यस्य वृक्षस्य स्वरुं कुर्यादन्येऽस्य लोकमन्वारोहेयुः, यूपस्य स्वरुं करोतीति । न हि यूपमनुनिष्पन्नस्य ग्रहणे जात्यन्तराशङ्काऽवकल्पते । यूपशकलो हि स्वरुकार्ये तदानीं विनियुज्येत । तस्मादपि भेदेन यूपात् स्वरुत्पादयितव्य इति ॥ २ ॥ ॥ युक्तिः ॥

## तदेकदेशो वा स्वरुत्वस्य तन्निमित्तत्वात् ॥ ३ ॥

वाशब्दः पक्षं व्यावर्त्तयति । यूपैकदेशो हि यूपमनुनिष्पन्नः शकलो ग्रहीतव्य इति । कस्मात् । एवमाम्नायते । यद्यन्यस्य वृक्षस्य स्वरुं कुर्यादन्येऽस्य लोकमन्वारोहेयुः । यूपस्य स्वरुं करोतीति । न चात्रायमर्थो विधीयते, स्वरुमुत्पादयतीति । किं तर्हि । स्वरुकार्यं कर्तुं यमुपादत्ते, तं यूपादिति । कुतः । स्वरुत्वस्य तन्निमित्तत्वात् । स्वरुत्वमत्र श्रूयते स्वरोः । यूपस्य स्वरुं करोतीति । कस्यात्मीयम् ? यूपस्येति । आत्मीयश्च समुदायस्यैकदेशो भवति । तस्मादिदमुच्यते । अप्राणिनः षष्ठी पञ्चम्यर्थे भवति । यथा शाकस्य देहि, शाकाद्देहीति । तथा क्वचित् तृतीयार्थे— घृतस्य यजति, घृतेन यजति । पञ्चम्यर्थे- घृताद् यजति, घृतस्य यजतीति । द्वितीयार्थे वा- सोमस्य

पिबति, सोमं पिबति, सोमात् पिबतीति ॥ ननूक्तं, यूपावयवोऽत्र वाक्येन विधीयते, श्रुत्या स्वरोरुत्पत्तिः, श्रुतिश्च वाक्याद् बलीयसीति । उच्यते । सत्यम् । एवं यूपस्येति तु शब्दोऽविवक्षितार्थो भवति । तत्र श्रुतिरपि बाध्यते, वाक्यमपि । न त्वस्मत्पक्षे किञ्चिद् अविवक्षितार्थं स्वरुं करोतीति स्वार्थं एवानुवादो भविष्यतीति । यूपशकलो विधायिष्यते । स्वरुशब्दश्चाञ्जनार्थेन शकले उपचरित इति गम्यते । अवयवप्रसिद्धिश्चैतमर्थं गमयिष्यति । भवति हि ब्राह्मणम्— अथ कस्मात् स्वरुर्नाम । एतस्माद् वेषोऽवच्छिद्यते । तदस्यैतत् स्वमिवारुर्भवति । तस्मात् स्वरुर्नामेति ॥ ३ ॥ ॥ सि० ॥

## शाकलश्रुतेश्च ॥ ४ ॥

इतश्च यूपमनुनिष्पन्नस्य ग्रहणम् । कुतः । शाकलश्रुतेः । शाकलश्रुतिर्भवति स्वरोः । यः प्रथमः शकलः परापतेत्, स स्वरुः कार्य्य इति । शाकलश्चैकदेशः । एकदेशश्चाप्रयोजकः । सम्बन्धिशब्दत्वात् । तावता च व्यवहारात् समुदायापेक्षिणः । तत्र प्रकरणादन्यार्थेन खदिरादिना जोषणादिकर्मविशिष्टेन यागार्थेन प्रकृतेनास्यैकवाक्यता । यूपाय खदिरादि जोषयते, छिनत्ति, तक्षति च । तत्र यः शकलः प्रथमः परापतितस्तं च स्वरुमञ्जनार्थं करोतीति । स्वरुशब्दं च तत्रानुवदन्नेवोपचरति । तस्मान्नैतदस्ति पृथङ्निष्पत्तिः स्वरुरिति । येनान्यस्मादपि वृक्षादिति शङ्क्यते । तस्माज्जात्यन्तराशङ्कावचनं नित्यानुवादो यूपशकलस्तुत्यर्थः ॥ ४ ॥

## प्रतियूपं च दर्शनात् ॥ ५ ॥

इतश्च न पृथङ्निष्पत्तिः स्वरुः । कुतः । एकादशिन्यां, प्रतियूपं च दर्शनात् । यथाऽनुपूर्वं स्वरुभिः पशून् समज्य मध्यमे रशनागुणे स्वे स्वे स्वं स्वं यूपशकलमुपगूहतीति स्वरुबहुत्वं दर्शयति । यदि च स्वरुः पृथङ्निष्पत्तिः स्यादेक एवैकादशिन्यां तन्त्रेण कार्य्यं साधयेत् । यूपमनुनिष्पन्नस्य तु ग्रहणे प्रकृतौ स्वयूपशकलेनाऽञ्जनं कृतमित्येकादशिन्यामपि चोदकः स्वयूपशकलमेव प्रापयतीति बहुत्वमुपपन्नं भवति । स्वयूपशकलग्रहणं च प्राकृतस्य ग्रहणादध्यवसीयते । यादृशोऽसौ प्राकृतस्तादृशोऽसौ ग्रहीतव्यो, न विशिष्ट इति । तस्मात् स्वरुरुत्पत्तेर्न प्रयोजक इति ॥ ५ ॥ युक्तिः ॥

## आदाने करोतिशब्दः ॥ ६ ॥

अथ यदुक्तमुत्पत्तिरस्य शब्देनोच्यते, स्वरुं करोतीति । एवञ्च करोतिशब्दोऽवकल्पिष्यते इति । उच्यते । आदाने करोतिशब्दो भविष्यति । स्वरुं करोति, स्वरुमादत्ते इति । यथा काष्ठानि करोति, गोमयानि करोतीति आदाने करोतिशब्दो भवति, एवमिहापि द्रष्टव्यम् ॥ ६ ॥ आ० नि० ॥ स्वरोश्छेदनाद्यप्रयोजकताऽधिकरणम् ॥ १ ॥

## स्वरुस्त्वनेकनिष्पत्तिः स्वकर्मशब्दत्वात् ॥ १ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । तत्र श्रूयते, स्वरुणा पशुमनक्तीति । अथैष सन्देहः । किं स्वरुरुत्पत्तिं प्रयोजयति, उत यूपमनुनिष्पन्नस्य ग्रहणमिति । किं प्राप्तम् । स्वरुस्त्वनेकनिष्पत्तिः स्यात् । प्रयोजयत्युत्पत्तिमिति । कुतः । स्वोऽस्य कर्मशब्दो भवति । स्वरुं करोतीति स्वरुमुत्पादयतीत्यर्थः । एवञ्चेद् उत्पत्तिरस्य शब्दवती । तस्मान्नैकया निष्पत्त्या यूपश्च स्वरुश्च निष्पाद्यते इति ॥ १ ॥ पूर्व०

## जात्यन्तराच्च शङ्कते ॥ २ ॥

यदि यूपमनुनिष्पन्नस्य ग्रहणं भवेत्, यूपकाष्ठस्यैव स्वरुः स्यात् । अन्यवृक्षाशङ्का नोपपद्येत, भवति च । यद्यन्यस्य वृक्षस्य स्वरुं कुर्य्यादन्येऽस्य लोकमन्वारोहेयुर्यूपस्य स्वरुं करोतीति । तस्मादपि पश्यामः, प्रयोजकः स्वरुरिति ॥ २ ॥ ॥ युक्तिः ॥

## तदेकदेशो वा स्वरुत्वात्तस्य तन्निमित्तत्वात् ॥ ३ ॥

यूपमनुनिष्पन्नो वा गृह्येत स्वरुः, तदेकदेशो हि एषः । षष्ठीनिर्देशाद्, यूपस्य स्वरुं करोतीति । यदि हि छेदनमुभयार्थं स्यान्न स्वरुयूपयोः कश्चित् सम्बन्धो भवेत् । तत्र षष्ठी नोपपद्येत । अस्ति तु षष्ठी । तस्माद् यूपैकदेशः स्वरुः, अवयवो यूपस्य । स्वरुर्नामैकदेशः कर्त्तव्यः, यथा पुरोडाशशकलमिति ॥ ३ ॥ सि० ॥

## शकलश्रुतेश्च ॥ ४ ॥

शकलश्रुतिश्च भवति, यः प्रथमः शकलः परापतेत् स स्वरुः कार्य्य इति । एकदेशाश्चाऽप्रयोजका भवन्ति । नैकदेशे श्रूयमाणे अवयवी कर्त्तव्य इति शब्दो भवति। विद्यमानस्याऽवयविन एकदेशो गृह्यते । तस्मादप्यऽप्रयोजकः ॥ ४ ॥

## प्रतियूपं च दर्शनात् ॥ ५ ॥

प्रतियूपं च खल्वपि स्वरवो दृश्यन्ते एकादशिन्याम् । यथाऽनुपूर्वं स्वरुभिः पशून् समज्य मध्यमे रशनागुणे स्वे स्वे स्वं स्वं यूपशकलमुपगूहतीति । स यदि स्वरुमान् यूपः कार्य्य इत्यर्थः, स्वरुं करोतीति । ततो बहूनां स्वरूणां दर्शनमुपपद्यते । प्रयोजकत्वे स्वरोः एक एव समञ्जनार्थं स्वरुरुत्पाद्यते। तस्मात् प्रयोजक इति ॥५॥ युक्तिः ॥

## आदाने करोतिशब्दः ॥ ६ ॥

अथ यदुक्तम्, उत्पत्तिरस्य शब्देनाभिधीयते स्वरुं करोतीति । करोतिशब्दश्चावकल्पिष्यते इति । उच्यते । आदाने करोतिशब्दो भविष्यति, स्वरुं करोतीति स्वरुमादत्ते इति । यथा काष्ठानि करोति, गोमयानि करोतीत्यादाने करोतिशब्दो भवत्येवमिहापि द्रष्टव्यम् ॥ ६ ॥ आ० नि० ॥ पूर्वाधिकरणसंक्षेपार्थः ॥

## शाखायां तत्प्रधानत्वात् ॥ ७ ॥

दर्शपूर्णमासयोः श्रूयते शाखामधिकृत्य, प्राचीमाहरत्युदीचीमाहरति प्रागुदीचीमाहरतीति । तत्र सन्देहः । किमयं दिग्वादः, उत शाखावाद इति । दिग्वाद इति प्राप्तम् । तथा श्रुतिशब्दः, शाखावादे लक्षणेति । तस्माद्दिग्वाद इति । एवं प्राप्ते ब्रूमः । शाखावाद इति । कुतः । यदि तावदयमर्थः, प्राची दिगाहर्त्तव्येति । ततोऽशक्योऽर्थः । अथ प्राचीं दिशं प्रत्याहरणीयेति, ततः का आहर्त्तव्येति । वाक्ये शाखाशब्दस्याभावादनुपपन्नोऽयं सम्बन्धः । अथ प्रकृता शाखेति, ततः प्राचीशब्देन तस्या एवाभिसम्बन्धो न्याय्यः । कुतः । प्रत्यक्षा हि प्राचीशब्देन हरतेरेकवाक्यता । प्रकरणाच्छाखाशब्देन भवेत् । उभयथाऽत्र प्राचीशब्दो लक्षणया प्रकृतां वा शाखां लक्षयेद्दिशो वाऽनीप्सितत्वात् । विहारदेशमीप्सितमयुक्तम् ॥ अपि च, प्राचीति सम्बन्धिशब्दोऽयम् । सम्बन्धिशब्दाश्च सर्वे सापेक्षा विना पदान्तरेण न परिपूर्णमर्थमभिवदन्ति । सामान्यपदार्थसम्बन्धे च संव्यवहारानुपपत्तिः । सर्वस्यैव देशस्य कुतश्चित् प्राग्भावात् । तथा शाखाशब्दोऽपि सम्बन्धिशब्दो, वृक्षस्येत्येतदपेक्षते । यदा वृक्षस्येत्येतदपेक्षते, तदा वृक्षस्य शाखा प्राची उदीची प्रागुदीची वेति भवति सम्बन्धः । तथाच संव्यवहारोऽवकल्पते । यत्तु शाखावादे ल-

क्षणेति उच्यते। भवति लक्षणयापि शब्दार्थः । तस्माच्छाखावाद इति ॥ ७ ॥ शाखाया आहार्यताधिकरणम् ॥ २ ॥

## शाखायां तत्प्रधानत्वादुपवेषेण विभागः स्याद् वैषम्यं तत् ॥ ८ ॥

दर्शपूर्णमासयोः समाम्नायते, मूलतः शाखां परिवास्योपवेषं करोतीति । तत्रायमर्थः सांशयिकः । किं शाखाछेदनस्योभयं प्रयोजकं—शाखा उपवेषश्च, उत शाखा प्रयोजिका उपवेषोऽनुनिष्पादीति । किं प्राप्तम् । उभयं छेदनान्निष्पद्यते । शाखा शाखामूलं चोभयं च प्रयोजनवत् । अग्रेण वत्सापाकरणादि करिष्यते, मूलत उपवेषः । तेन विशेषाभावादुभयं प्रयोजकमिति प्राप्ते, उच्यते । शाखायां ब्रूमः ॥ तत्प्रधानत्वात् ॥ शाखाप्रधानत्वादुपवेषेण विभागो भवेत् । शाखामनुनिष्पन्नो गृह्येत । कथं तत्प्राधान्यम् । शाखां परिवास्येति द्वितीयानिर्देशात् । ननूपवेषं करोतीत्यपि द्वितीया । उच्यते। नाऽसौ परिवासयतेः कर्म । कस्य तर्हि । करोतेः ॥ आह । कस्मादेवमभिसम्बन्धो न भवति । शाखां परिवास्य मूलत उपवेषं करोतीति । शाखाशब्दश्च यथैव अग्रे तथा मूलेऽपि । तत्र अयमर्थः । छेदनेनाग्रमूले विभजेत् । किं प्रयोजनम् । विभज्य मूलमुपवेषं करिष्यामीति । उच्यते । नैवम् । व्यवहितकल्पना हि एवं भवेत् । अव्यवधानेन शाखार्थं परिवासनम् । वृत्ते तस्मिन्नुपवेषकरणम् ॥ ननु प्रकृतत्वान्मूलमुपवेषशब्देन सम्बध्यते । उच्यते । उभयसम्बन्धे विरोधः । विरोधे च प्रकरणाद् वाक्यं बलीयः । अथ सन्निहितेन सम्बध्यते, तथापि शाखाप्रयुक्तेनेत्यापतति । सिद्धमेवोपवेषो न प्रयोजयति छेदनमिति । एतदत्र वैषम्यम् ॥ ८ ॥

## श्रुत्यपायाच्च ॥ ९ ॥

शाखया वत्सानपाकरोति, शाखया गाः प्रापयति, शाखया दोहयतीत्येवमादिषु शाखाग्रहणेषु नोपवेषस्य व्यापारस्ततः शाखाशब्दोऽपैति। न हि तन्मूलं शाखेत्याचक्षते। किमतो यद्येवं, यत्र शाखाशब्दस्तदर्थं छेदनम् । द्वितीयानिर्देशात् । अथापि मूले शाखाशब्दो भवेद्, एवमपि शाखाशब्दोपदिष्टेषु न मूलम् । अमूलपरिवासितत्वात् । यच्चैवं संस्कृतया शाखया क्रियते, तदर्थं छेदनम् । न चोप-

धानं मूलपरिवासितया क्रियते । तस्मान्न तदर्थं छेदनम् । किं भवति प्रयोजनम् । पौर्णमास्यामपि शाखोत्पाद्या । यथा पूर्वः पक्षः । यथा सिद्धान्तः । तथा नोत्पादयितव्येति ॥ ९ ॥ ॥ छेदनस्य शाखाप्रयुक्तताऽधिकरणम् ॥ ३ ॥

## हरणे तु जुहोतिर्योगसामान्याद् द्रव्याणां चार्थशेषत्वात् ॥ १० ॥

दर्शपूर्णमासयोरामनन्ति, सह शाखया प्रस्तरं प्रहरतीति । तत्र सन्देहः । किं शाखाप्रहरणं प्रतिपत्तिकर्म, उतार्थकर्मेति । किं प्राप्तम् । हरणे तु जुहोतिः स्यात् । अर्थकर्म इत्यर्थः । कुतः । योगसामान्यात् । योगोऽस्याः समानः प्रस्तरेण, सह शाखया प्रस्तरं प्रहरतीति । सहयोगे यत्र तृतीया तस्य गुणभावो, यत्र द्वितीया तस्य प्राधान्यम् । प्रस्तरे च विस्पष्टो यजिः । शाखापि तस्मिन्नेव यजौ प्रस्तरस्य विशेषणं, समानयोगित्वात् ॥ आह ॥ ननु तत्र तत्र गुणभूता शाखा । तस्याः प्रतिपत्तिर्न्याय्या । इतरथाऽनेकगुणभावः प्रसज्ज्येतेति । उच्यते । द्रव्याणां चार्थशेषत्वादुत्पत्त्या चिकीर्षितस्य शेषभूतान्येव द्रव्याण्यपदिश्यन्ते भूतं भव्यायोपदिश्यते इति । तस्मादनेकगुणतैव द्रव्याणां न्याय्येति ॥ १० ॥ ॥ पूर्व० ॥

## प्रतिपत्तिर्वा शब्दस्य तत्प्रधानत्वात् ॥ ११ ॥

प्रतिपत्तिर्वा शाखाप्रहरणम् । शब्दस्य तत्प्रधानत्वात् । शब्दोऽत्र शाखाप्रधानः । कथम् । द्वितीयाश्रवणात् । नन्वन्यत्रैव सा द्वितीया, प्रस्तरे, न शाखायाम् । उच्यते । प्रस्तरे द्वितीयार्थः शाखायामपि। कथम् । तुल्ययोगात् सह शाखया, एवं प्रस्तरः प्रहृतो भवति । यदि शाखापि प्रह्रियते । तेन तुल्ययोगे सहशब्दोऽयम् । यदि प्रस्तरः प्रहरणे प्रधानं, शाखापि प्रस्तरविशेषणं, तर्हि तुल्ययोगः । तस्माद् यः प्रस्तरे द्वितीयार्थः, स शाखायामपि । अतः शाखा प्रधानम् । अपिच तत्र तत्र शाखा गुणभूता । तस्यामन्यत्र उपदिश्यमानायामनेकगुणभावः । तत्र को दोषः । दृष्टं कार्य्यं हित्वा अदृष्टं कल्प्येत । कृतप्रयोजनायाः शाखाया अपनयनेन वेदिविवेचनात् सुखप्रचारे दृष्टं कार्य्यं, न तु प्रहरणे किञ्चित् सूक्ष्ममपि दृष्टमस्ति । तस्मात् प्रतिपत्तिर्न्याय्या ॥ आह । ननु तृतीयाश्रवणात् परार्थेन शाखोच्चारणेन भवितुं न्याय्य-

म् । उच्यते । भवेदेतन्न्याय्यं, यदि निर्ज्ञातकाला शाखा स्यात् । ततः प्रस्तरस्य कालपरिच्छेदाय कीर्त्यमाना परार्था उच्चार्येत । इह पुनरेतद्विपरीतम् । निर्ज्ञातकालः प्रस्तरोऽनिर्ज्ञातकाला शाखा । तस्मात् सत्यपि तृतीयाश्रवणे प्रस्तर एव शाखायाः कालं परिच्छेत्स्यति । यथा द्वितीयानिर्दिष्टस्तथा शाखा द्रष्टव्या । यथा तृतीयानिर्दिष्टा तथा प्रस्तरः । सामर्थ्यं हि बलवत्तरमिति ॥ ११ ॥ सि० ॥

## अर्थेऽपीति चेत् ॥ १२ ॥

आह । ननु गुणभावेऽपि द्वितीया भवति । यथा सक्तु मारुतैककपालेषु ॥ १२ ॥ आ० ॥

## न तस्यानधिकारादर्थस्य च कृतत्वात् ॥ १३ ॥

नैतत् सक्त्वादिभिस्तुल्यम् । तस्य सक्त्वादेरन्यत्रानधिकारात् । इह च शाखयाऽन्यस्यार्थस्य कृतत्वाद् वत्सापाकरणादेः । आह । ननु पुनरुक्तमेतत्— सक्त्वादीनां प्रदर्शनं समाधिश्चेति । उच्यते । न पुनरुक्तता महान् दोषः । बहुकृत्वोऽपि पथ्यं वेदितव्यं भवति । ग्रन्थभयेन पुनरुक्तं नेच्छन्ति । अर्थाग्रहणात्तु बिभ्यतः पुनः पुनरभिधीयमानं बहु मन्यन्ते एव । किं चिन्तायाः प्रयोजनम् । यदि अर्थकर्म पौर्णमास्यामपि शाखोत्पाद्या, अथ प्रतिपत्तिर्नोत्पादयितव्येति ॥१३॥ आ० नि० ॥ शाखाप्रहरणस्य प्रतिपत्तिकर्मताऽधिकरणम् ॥ ४ ॥

## उत्पत्त्यसंयोगात् प्रणीतानामाज्यवद्विभागः स्यात् ॥ १४ ॥

दर्शपूर्णमासयोराम्नायते, अपः प्रणयत्यापो वै श्रद्धा श्रद्धामेवालभ्य यजते इति । उभयत्र च प्रणीतानां व्यापारः । प्रणीताभिर्हवींषि संयौतीति । तथा, अन्तर्वेदि प्रणीताः निनयतीति । तत्र सन्देहः । किमुभयमासां प्रयोजकं संयवनं निनयनं च ? उत संयवनार्थानां निनयनं प्रतिपत्तिरिति । किं प्राप्तम् । उत्पत्तिसंयोगो नासां केनचित् प्रयोजनेन । उभाभ्यामुत्पन्नानां संयोगः । तस्मान्न गम्यते विशेषः । अगम्यमाने विशेषे उभयार्थानां विभागोऽयं, कश्चिद् यागः संयवने, कश्चिन्निनयने इति । आज्यवत् । यथा सर्वस्मै वा एतद् यज्ञाय गृह्यते यद् ध्रुवायामाज्यमिति ॥ १४ ॥ ॥ पूर्व० ॥

## संयवनार्थानां वा प्रतिपत्तिरितरासां तत्प्रधानत्वात् ॥ १५ ॥

संयवनार्थाः प्रणीताः । कुतः । तृतीयानिर्देशात् । संयवनेऽपां गुणभावो, द्वितीयानिर्देशाच्च निनयने प्राधान्यम् । चिन्तायाः प्रयोजनं— पुरोडाशाभावे प्रणीतानामभावो, यथा पयस्यायाम् ॥ १५ ॥ सि० ॥ निनयनस्य प्रतिपत्तिकर्मताधिकरणम् ॥ ५ ॥

## प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात् ॥१६॥

ज्योतिष्टोमे श्रूयते । वाग्वै देवेभ्योऽपाक्रामत् । यज्ञायातिष्ठमाना सा वनस्पतीन् प्राविशत्। सैषा वाग् वनस्पतिषु वदति । या दुन्दुभौ या च तूणवे या च वीणायाम्। यद् दीक्षिताय दण्डं प्रयच्छति वाचमेवावरुन्धे, क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छति, मैत्रावरुणाय दण्डं प्रयच्छतीत्येतदुदाहरणम् । तत्र संशयः । किं दीक्षितधारणे शेषभूतस्य दण्डस्य मैत्रावरुणधारणं प्रतिपत्तिः ? अथवा अर्थकर्मेति । किं प्राप्तम्। मैत्रावरुणाय दण्डदानं प्रतिपत्तिः । कुतः । दीक्षितधारणे कृतार्थत्वात् । दण्डेन दीक्षयन्तीति शेषभूतस्यान्यत्र व्यापारः प्रतिपत्तिर्न्याय्या । यथा, चात्वाले कृष्णविषाणां प्रास्यतीति कण्डूयने शेषभूतायाः प्रासनं प्रतिपत्तिः । एवमत्रापि द्रष्टव्यम् । द्वितीया च दण्डे विभक्तिः । तस्मात् प्राधान्यमिति ॥ १६ ॥ ॥ पूर्व० ॥

## अर्थकर्म वा कर्तृसंयोगात् स्रग्वत् ॥ १७ ॥

अर्थकर्म्म वा स्यात् ।कुतः ।कर्तृसंयोगात्। कर्तृसंयोगो भवति। मैत्रावरुणाय दण्डमिति । कर्तृदण्डसंयोगो भवति । तस्मिँश्च दण्डो गुणभूतः । पुरुषः प्रधानभूतः । पुरुषं हि स प्रचरितुं समर्थं करोति । कथम् । यथा पूर्वं तमोऽवगाहतेऽपः सर्पति गां च सर्पं च वारयति, अवलम्बनं च भवति । अतः पुरुषप्राधान्यान्न प्रतिपत्तिः । स्रग्वच्च द्रष्टव्यम् । यथा स्रजमुद्गात्रे ददातीत्यऽसत्यप्युपकारे पुरुषस्य प्रयोजनवत्त्वान्निष्प्रयोजनत्वाच्च स्रजो भवति पुरुषप्राधान्यम् । एवमिहापि द्रष्टव्यम् । तस्मान्न प्रतिपत्तिरिति ॥ अथ यदुक्तं, द्वितीयाश्रवणाद्दण्डप्राधान्यमिति । उच्यते । तथा युक्तं चानीप्सितमिति द्वितीया द्रष्टव्या । कुतः । मैत्रावरुणे चतुर्थीनिर्देशात् । सम्प्रदाने हि चतुर्थी भवति । सम्प्रदानं च कर्मणा अभिप्रेयते । तत्र दण्डादभिप्रेततरो

मैत्रावरुण इति गम्यते ॥ १७ ॥ ॥ सि० ॥

## कर्मयुक्ते च दर्शनात् ॥ १८ ॥

दण्डी प्रैषानन्वाहेत्यनूद्यते । तेन प्रचरतो दण्डं प्रदर्शयति । तद् अर्थकर्मणि सत्युपपद्यते । प्रतिपत्तौ तु दण्डो मैत्रावरुणाय दत्तस्ततोऽपवृज्येत । कृतं च कर्त्तव्यमिति न तेन प्रयोजनमिति न धार्येत । तत्रैतद्दर्शनं नोपपद्यते । तथा, अहिस्त्वां दशतीति मैत्रावरुणं ब्रूयात् अहिरिव ह्येष इति । तथा, मुशलयन्वाहेति । मुशलशब्दश्च दण्डे प्रसिद्धः । यथा, क नु खलु मुशलिनो माणवका गङ्गामवतरेयुरिति । तस्मादप्यर्थकर्म ॥ १८ ॥ युक्तिः ॥ दण्डदानस्याऽर्थकर्मताऽधिकरणम ॥ ६ ॥

## उत्पत्तौ येन संयुक्तं तदर्थं तच्छ्रुतिहेतुत्वात्तस्यार्थान्तरगमने शेषत्वात् प्रतिपत्तिः स्यात् ॥ १९ ॥

यदुक्तं, यथा कृष्णविषाणाप्रासनमिति । तत्रोच्यते । युक्तं तत्रोत्पद्यमानं यद् येन प्रयोजनेन सम्बद्धमुत्पद्यते, तत् तदर्थमेव न्याय्यम । तस्यान्यत्र गमने प्रतिपत्तिरित्येतदुपपद्यते, यदि न दृष्टं प्रयोजनं भवति । इह तु दृष्टं प्रयोजनं मैत्रावरुणस्य धारणं । तस्माद्विषममेतत् ॥ अथवा अधिकरणान्तरं, विषाणायाः कण्डूयनं प्रासनं च उभयमपि प्रयोजकमिति पूर्वः पक्षः । एकनिष्पत्तेः सर्वं समं स्यादिति । उत्तरः पक्षः, कण्डूयने तृतीयानिर्देशाद् विषाणाया गुणभावः । प्रासने च द्वितीयानिर्देशादन्यत्र च कृतार्थत्वात् प्राधान्यमिति ॥ १९ ॥ प्रासनस्य प्रतिपत्तिकर्मताऽधिकरणम् ॥७॥ पूर्वाधिकरणे आशङ्कानिरासः ॥

## सौमिके च कृतार्थत्वात् ॥ २० ॥

अस्ति ज्योतिष्टोमेऽवभृथो, वारुणेनैककपालेन अवभृथमभ्यवयन्तीति । तत्राम्नायते, वरुणगृहीतं वा एतद् यज्ञस्य यदृजीषं यद्ग्रावाणः यदौदुम्बरी यदभिषवणफलके, तस्माद् यत्किञ्चित् सोमलिप्तं द्रव्यं तेन अवभृथं यन्तीति । तत्र संशयः । किं सोमलिप्तानां द्रव्याणामवभृथगमनं प्रतिपत्तिः, अथवा अर्थकर्मेति । किं तावत् प्राप्तम । प्रतिपत्तिरिति । कुतः । कृतार्थत्वात् । कृतार्थान्येतानि द्रव्याणि तत्र तत्र, तेषामवभृथगमनं प्रतिपत्तिर्न्याय्या ॥ २० ॥ सि० ॥

## अर्थकर्म वाभिधानसंयोगात् ॥ २१ ॥

अर्थकर्म्म वा, अभिधानेन सयोगात् ॥ तेन, अवभृथं यन्तीति । तेन अवभृथसंज्ञकं निष्पादयन्तीति। तृतीया तेनेति, द्वितीया अवभृथमिति । तस्मात् सोमलिप्तं गुणभूतमवभृथः प्रधानभूत इति ॥२१॥पूर्व०

## प्रतिपत्तिर्वा तन्न्यायत्वाद्देशार्थावभृथश्रुतिः ॥ २२ ॥

प्रतिपत्तिर्वा । कुतः । तन्न्यायत्वादेष । एष हि न्यायो, यदन्यत्र कृतार्थमन्यत्र प्रतिपाद्यते । तदिह यदि सोमलिप्तं द्रव्यमवभृथे करणं विधीयते ततोऽर्थकर्म्म, अथ सोमलिप्तेन यानं विधीयते ततः प्रतिपत्तिः । न ह्यत्र सोमलिप्तं विधीयतेऽवभृथे । तथा सति अवभृथसोमलिप्तसम्बन्धोऽभ्यवयन्तीत्यनेनाख्यातेन विधीयेत । तत्र वाक्येन विधानं स्याद्, न तु श्रुत्या । यानेऽमुना विधीयमाने श्रुत्या विधानम् । तत्परिगृहीतं भवति । श्रुतिश्च वाक्याद् बलीयसी । तस्मात् प्रतिपत्तिः । अथ यदुक्तम्. अर्थकर्म्म अभिधानेन संयोगादिति । तत्र ब्रूमः । एवं सति देशार्था अवभृथश्रुतिः । अवभृथं यन्तीत्यवभृथेन देशं लक्षयति । यस्मिन् देशेऽवभृथस्तं देशं यन्तीति । तस्मात् प्रतिपत्तिरिति ॥ २२ ॥ उत्तरम् ॥ अवभृथगमनस्य प्रतिपत्तिकर्मताधिकरणम् ॥ ८ ॥

## कर्तृदेशकालानामचोदनं प्रयोगे नित्यसमवायात्॥२३॥

इदं श्रूयते, पशुबन्धस्य यज्ञक्रतोः षड् ऋत्विजः, दर्शपूर्णमासयोर्यज्ञक्रतोश्चत्वार ऋत्विजः, चातुर्मास्यानां क्रतूनां पञ्च ऋत्विजः, अग्निहोत्रस्य यज्ञक्रतोरेक ऋत्विक्, सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदश ऋत्विजः । तथा, समे दर्शपूर्णमासाभ्यां यजेत, प्राचीनप्रवणे वैश्वदेवेन यजेत, पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाममावास्ययेति । तत्र सन्देहः । किं कर्तृदेशकाला विधीयन्ते, उतानूद्यन्ते इति । किं तावत् प्राप्तम् । कर्तृदेशकालानाम् अचोदनमनुवादः । कुतः । प्रयोगे नित्यसमवायात् । प्रयोगे नित्यसमवेता एते इति । न ऋते कर्तृदेशकालेभ्यः प्रयोगः सिद्ध्यति । तेन प्रयोगचोदनायैव प्राप्तानामनुवादः । ननु विषमादिप्रतिषेधार्थमेतद्वचनं भविष्यति । नेति ब्रूमः । उपदेशकमेवञ्जातीयकं वचनं, न प्रतिषेधकम् । तस्मादनुवाद इति ॥ २३ ॥ ॥ पूर्व० ॥

## नियमार्था वा श्रुतिः ॥ २४ ॥

उच्यते, न चैतदस्त्यनुवाद इति । अनुवादमात्रमनर्थकम् । यदि विधिः, एवमपूर्वमर्थं प्रकरिष्यति । तस्माद् विधिरिति । ननु प्रयोगाऽङ्गत्वात् प्राप्त एवेति । उच्यते । नियमार्था श्रुतिर्भविष्यति । कोऽयं नियमः । अनियतस्य नियतता । प्रयोगाङ्गतया सर्वे देशाः प्राप्नुवन्ति, न तु समुच्चयेन । यदा समो, न तदा विषमः । यदा विषमो, न तदा समः । स एष समः प्राप्तश्चाप्राप्तश्च । यदा न प्राप्तः, स पक्षो विधिं प्रयोजयति । अतो विषमचिकीर्षायामपि समो विधीयते। तस्माद् विषमस्याप्राप्तिर्विधौ सति भवतीति समो विधीयते । एवमितरेष्वपि । तस्माद् विधिरिति ॥ २४ ॥ ॥ सि० ॥ कर्तृदेशकालविधीनां नियमार्थताधिकरणम् ॥ ९ ॥

## तथा द्रव्येषु गुणश्रुतिरुत्पत्तिसंयोगात् ॥ २५ ॥

अधिकरणप्रदेशोऽयम् । इदमामनन्ति । वायव्यं श्वेतमालभेत भूतिकामः । यथा, सोमारौद्रं घृते चरुं निर्वपेत् शुक्लानां व्रीहीणां ब्रह्मवर्चसकामः, यथा नैर्ऋतं चरुं निर्वपेत् कृष्णानां व्रीहीणामिति तत्र सन्देहः । किं श्वेतादिवर्णो विधीयते, उत अनूद्यते इति । किं प्राप्तम् । अनूद्यते । द्रव्यश्रुतिगृहीतत्वात् । विधिर्वा, पक्षे प्राप्तस्य नियमार्थ इति । पक्षोक्तं प्रयोजनमुभयोरप्यधिकरणयोः ॥ २५ ॥ ॥ द्रव्यगुणविधानस्य नियमार्थताधिकरणम् ॥ १० ॥

## संस्कारे च तत्प्रधानत्वात् ॥ २६ ॥

अयमप्यधिकरणप्रदेशः । दर्शपूर्णमासयोः श्रूयते । व्रीहीनवहन्ति, तण्डुलान् पिनष्टीति । तत् किमिमौ विधी, उतानुवादौ ? इति संशयेऽर्थप्राप्तत्वादनुवादाविति प्राप्ते नियमार्थत्वाद् विधी इति ॥२६॥ अवघातादिसंस्कारविधानस्य नियमार्थताधिकरणम् ॥ ११ ॥

## यजतिचोदना द्रव्यदेवताक्रियं समुदाये कृतार्थत्वात् ॥ २७ ॥

शेषविनियोग उक्तः । किं तत् प्रधानं ? यस्यैते शेषा इति। उच्यते। यजति ददाति जुहोतीत्येवँलक्षणम् । अथ किंलक्षणको यजतिर्जुहोतिर्ददातिश्च ? इति । यजतिचोदना तावद् द्रव्यदेवताक्रियम्।

द्रव्यं, देवता च, तस्य द्रव्यस्य क्रिया, यया तयोः सम्बन्धो भवति । समुदाये समुदितेष्वेषु यजतिशब्दो भवति। लोके, इष्टोऽनेन पशुपतिरिति । तेन मन्यामहे, द्रव्यदेवताक्रियस्यार्थस्य यजतिशब्देन प्रत्यायनं क्रियते इति । लक्षणकर्म्मणि प्रयोजनं न वक्तव्यम् । ज्ञानमेवात्र प्रयोजनमिति ॥२७॥ ॥ यागस्वरूपनिरूपणाऽधिकरणम् ॥१२॥

## तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात् ॥२८॥

अथ किंलक्षणको जुहोतिरिति । तदुक्तं यजत्युक्तेऽर्थे जुहोतिः श्रूयते, आसेचनाधिके । तस्माद् यजतिरेवासेचनाधिको जुहोतिः । हुतमनेनेत्येवञ्जातीयके वक्तारो भवन्ति लोके । वेदेऽपि यजतिचोदितं जुहोतिना अनुवदति । संग्रामिणं चतुर्होत्रा याजयेत् चतुर्गृहीतमाज्यं कृत्वा चतुर्होतारं व्याचक्षीत, पूर्वेण ग्रहेणार्द्धं जुहुयादुत्तरेणार्द्धमिति ॥ अथ ददातिः किंलक्षणक इति । आत्मनः स्वत्वव्यावृत्तिः, परस्य स्वत्वेन सम्बन्धः। यजति–ददाति–जुहोतिषु सर्वेपूत्सर्गः समानः । तत्र यजतिर्देवतामुद्दिश्योत्सर्गमात्रं, जुहोतिरासेचनाऽधिकः, ददातिरुत्सर्गपूर्वकः परस्वत्वेन सम्बन्ध इत्येष एषां विशेष इति ॥ २८ ॥ ॥ होमस्वरूपनिरूपणाधिकरणम् ॥ १३ ॥

## विधेः कर्मापवर्गित्वादर्थान्तरे विधिप्रदेशः स्यात् ॥२९॥

ज्योतिष्टोमे श्रूयते, यद् आतिथ्यायां बर्हिस्तदुपसदां, तदग्नीषोमीयस्येति। तत्र सन्देहः। किं परद्रव्यस्योपदेशः १ उत निरिष्टिकस्य२ अथवा धर्म्मविधिप्रदेशः ३, अथवा द्रव्यसाधारण्यमिति । किं प्राप्तम । १ परद्रव्यस्य उपदेशः । कुतः। परद्रव्यस्योपदेशसदृशः शब्दो, यद् आतिथ्यायां तदुपसदामिति।यथा, यो देवदत्तस्य गौः स विष्णुमित्रस्य कर्त्तव्य इति देवदत्तादाच्छिद्य विष्णुमित्राय दीयते इति । अतः परद्रव्यस्योपदेश इति । न चैतदस्ति । तथा सति आतिथ्यायां तस्य विधानं यत् पूर्वं, तदनर्थकं स्यात् ॥ २ एवं तर्हि निरिष्टिकस्योपदेशः । तेन आतिथ्यायां यद् विहितम्, आतिथ्यायां यदुपात्तमिति । तथा सत्यर्थवद् आतिथ्यायां तद् वचनम् । निरिष्टिकेन तूपसदः कर्त्तव्या भवन्ति । न चैष शिष्टानामाचारो, न च सर्वे चोदकप्राप्ता धर्म्मा भवेयुः । अतो ब्रूमः, ३ विधेः कर्म्मापवर्गित्वादर्थान्तरे विधिप्रदेशः स्यात् ॥ तद् बर्हिः परिसमाप्तायामातिथ्यायाम-

पवृक्तं, पूर्वं तदातिथ्यायाः, उपसत्काले आतिथ्यासम्बन्धस्तस्य नास्ति। भूतपूर्वेण आतिथ्यया कर्मणा लक्ष्येत । लक्षणाशब्दश्च न न्याय्यः।तस्मादातिथ्याबर्हिष आज्ञस्याभावाद् यद्धर्मकमातिथ्याबर्हिस्तद्धर्मकमुपसदामग्नीषोमीयस्य चेति न्याय्यम् ॥ २९ ॥ ॥ पूर्व० ॥

## अपि वोत्पत्तिसंयोगादर्थसम्बन्धोऽविशिष्टानां प्रयोगैकत्वहेतुः स्यात् ॥ ३० ॥

अपि वेति पक्षो व्यावर्त्तते । उत्पत्तिसंयोग एवैषोऽस्य बर्हिषः। यदि हि उत्पन्नमातिथ्यायां बर्हिर्विशिष्टं स्यात्, तस्य धर्मा औपसदे बर्हिषि अतिदिश्येरन्, न तु तदस्ति केनचिद् वाक्येन । एवं प्रकृत्य, बर्हिषो विशेषो वक्ष्यते । आश्ववालः प्रस्तरः, विधृती चैक्षव्यौ इति। तेन, न परविहितं बर्हिरुच्यते, न निरिष्टिकं, न कुतश्चिद्धर्माः प्रतिदिश्यन्ते । किं तर्हि । साधारणममीषां बर्हिरुच्यते । यदातिथ्यायां विधीयते, तदेवोपसदाम् । अग्नीषोमीयस्य च विधीयते इति अविशिष्टानां बर्हिषा संयोग एकेन सर्वेषाम् । यद् आदौ बर्हिर्लूयते, तल्लवनं सर्वेषामर्थेन, साधारणो बर्हिषः प्रयोगः । एवं श्रुतिः शब्दस्य परिगृहीता भविष्यति । इतरथा धर्मलक्षणा भवेत् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या न लक्षणा । तस्मात् त्रयाणां साधारणं बर्हिरिति, पक्षोक्तं प्रयोजनम् ॥३०॥ सि० ॥ बर्हिष आतिथ्यादिसाधारण्याऽधिकरणम् ॥ १४ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये चतुर्थस्याध्यायस्य द्वितीयः पादः ॥ ४ ॥ २ ॥

### अथ चतुर्थे अध्याये तृतीयः पादः ॥ ४ ॥ ३ ॥

## द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात् ॥ १ ॥

यस्य खादिरः स्रुवो भवति स छन्दसामेव रसेनावद्यति सरसा अस्य आहुतयो भवन्ति । यस्य पर्णमयी जुहूर्भवति, न स पापं श्लोकं शृणोतीति । यस्याश्वत्थी उपभृद् भवति ब्रह्मणैवास्यान्नमवरुन्धे। यस्य वैकङ्कती ध्रुवा भवति प्रत्येवास्याहुतयस्तिष्ठन्ति । अथो प्रैव जायते यस्यैवंरूपाः स्रुवा भवन्ति । सर्वाण्येवैनं रूपाणि पशूनामुपतिष्ठन्ते, नास्य अपरूपमात्मन् जायते इति । तथा ज्योतिष्टोमसंस्कारे

फलश्रुतिः।यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते। तथा, केशश्मश्रू वपते दतो धावते नखानि निकृन्तति स्नाति, मृता वा एषा त्वगमेध्यं वाऽस्यैतदात्मनि शमलं तदेवोपहते मेध्य एव मेधमेवमुपैति। कर्मणि फलं श्रूयते। अभीपू वा एतौ यज्ञस्य यदाघारौ, चक्षुषी वा एतौ यज्ञस्य यदाज्यभागौ, यत् प्रयाजानुयाजा इज्यन्ते, वर्म वा एतद् यज्ञस्य क्रियते, वर्म यजमानस्य भ्रातृव्यस्याभिभूत्यै इति॥ अत्र सन्देहः। किमिमे फलविधयः, उतार्थवादा इति। किं प्राप्तम्। फलविधयः। प्रवृत्तिविशेषकरत्वात् फलविधेः। यथा, खादिरं वीर्यकामस्य यूपं कुर्यात्, पालाशं ब्रह्मवर्चसकामस्य, वैल्वमन्नाद्यकामस्येति। यथैते फलविधयः, एवमिहापि द्रष्टव्यम्। एवं प्राप्ते ब्रूमः। फलार्थवादा इति। कुतः। परार्थत्वात्। क्रत्वर्थान्येतानि। जुहूः प्रदाने गुणभूता, उपभृदुपधारणे, स्रुवा आज्यधारणे, अञ्जनवपनादि च यजमाने, आघारावाज्यभागौ प्रयाजानुयाजाश्चाग्नेयादिषु। यदि फलेऽपि गुणभावः स्याद्, अन्यत्रोपदिष्टानामन्यत्र पुनर्गुणभाव उपदिष्ट इति प्रतिज्ञायेत। न चैतन्न्याय्यम्। परार्थता हि गुणभावः। क्रत्वर्थता चैषां शब्देन, जुह्वा जुहोति जुह्वा होममभिनिर्वर्त्तयतीति। एवं सर्वत्र। तस्मान्नैते पुरुषार्थाः॥ १॥॥ सि०॥

## उत्पत्तेश्चातत्प्रधानत्वात्॥ २॥

अथोच्येत। पुरुषमपि प्रति गुणभाव उपदिष्टो, यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमादिभिर्वाक्यैरिति। तच्च न। कस्मात्। उत्पत्तेरतत्प्रधानत्वात्। तत्र, पालाश्या जुह्वा अपापश्लोकश्रवणं क्रियते इति न कश्चिच्छब्द आह। एतावच्छ्रूयते, यस्यासौ भवति, न स पापं श्लोकं शृणोतीति। एतावदत्र शब्देन गम्यते, यस्यैवँलक्षणा जुहूस्तस्य अपापश्लोकश्रवणमिति। तत्र, जुह्वा तत् क्रियते, जुहूर्वा तदर्थेति। नैतच्छब्द आह॥ नन्वनुमानादेतद् गम्यते। ध्रुवं पालाश्या जुह्वा तत् क्रियते, यतस्तस्यां सत्यां तद् भवतीति। अत्रोच्यते न। एवञ्जातीयकं कार्यकारणत्वेऽनुमानं भवति। कार्यकारणसम्बन्धो नाम स भवति, यस्मिन् सति यद् भवति, यस्मिँश्चासति यन्न भवति, तत्रैव कार्यकारणसम्बन्धः। इह तु तद्भावे भावो ज्ञातो, नाभावेऽभावः। यस्य पालाशी न भवति तस्य

अपापश्लोकश्रवणं नास्तीति । नैवञ्जातीयकः शब्दोऽस्ति । तेन न नियोगतोऽवगम्यते, तेनेदं क्रियते इति । लक्षणमेतत् पुरुषस्य गम्यते। तस्मान्नानुमानम् ॥ अपिच । यस्यापि जुहूः पालाशी भवति, तस्यापि पापश्लोकश्रवणं भवति । कथमवगम्यते । प्रत्यक्षतः । नन्वेवं सति अग्निहोत्रेणापि फलं न साध्येत । न हुतमात्रेण फलं दृश्यते इति। नैष दोषः । न हि तत्रोच्यते, तावतैव फलं भवतीति । इह तु वर्त्तमानायां जुहूसत्तायां वर्त्तमानस्य पापश्लोकश्रवणस्य प्रतिषेधः तस्मान्न तत्रानुमानम्, इदं कार्यमिदं कारणमिति । अग्निहोत्रादिषु तु शब्देनैव कार्यकारणसम्बन्ध उच्यते। तस्मात् तत्र तत्कालेऽदृश्यमानेऽपि फले, कालान्तरे फलं भविष्यतीति गम्यते, न त्वेवञ्जातीयकेषु। तस्मान्नैवञ्जातीयकेभ्यः फलमस्तीति ॥ ननु यस्य पालाशी जुहूर्भवति, न स पापं श्लोकं शृणोतीत्येवमुक्ते तत एव तत् फलं भवतीति गम्यते। तस्मादिहापि कालान्तरे फलं भविष्यतीति । उच्यते । सत्यं गम्यते। प्रमाणं तत्र किमिति विचारयामः । न तावत् प्रत्यक्षं, नानुमानं, नेतरद् दृष्टविषयमुपमानादि । नो खल्वपि शब्द इत्येतदुक्तम् । वाक्यार्थोऽपि पदार्थोपजनितो भवति, नान्यथा । तदुक्तं, तद्भूतानां क्रियार्थेन समाम्नाय इति । तस्मादप्रमाणमूलत्वान्मिथ्याविज्ञानमेतत् । लौकिकेषु वाक्येषु । अथैवं गम्यते। तानि हि विज्ञातेऽर्थे प्रयुज्यमानानि अध्याहार्य्यपदानि गौणानि विपरिणतव्यवहितार्थानि च प्रयुज्यन्ते। तस्मात् तत्सादृश्याद् वचनागम्येष्वप्यर्थेषु भवति तत्स्वरूपो मिथ्याप्रत्ययः । यथा मृगतृष्णादिषु ॥ अपि च, वर्त्तमानापदेशोऽयम् । न चायमर्थो वर्त्तमानः । तस्मान्न खादिरस्रुवादिसद्भावे तत् फलं भवेत् । तदेवमापतति । खादिरादौ सति भवति तत् फलं, नापि भवति । असत्यपि भवति वा न वा इति । नैवं विज्ञायते । कुतस्तत फलमिति । तस्मादेवञ्जातीयकेषूच्चारितेषु न काचित् प्रवृत्तिर्न कुतश्चिन्निवृत्तिरित्यानर्थक्यमक्रियार्थत्वात् । अर्थवादे तु सति भवति प्रयोजनं खादिरादेः, स्रुवादिषु कर्मार्थेषु प्रयोजनवत्सु । यद्येषां क्रतुं प्रति प्रयोजनवत्ता न स्यात्, तत एतदेव फलं कयाचिच्छब्दवृत्त्या, भवेद् वा न वा इति विचार्येत । सति तु पारार्थ्ये नैव काचिच्छब्दप्रवृत्तिराश्रयितुं शक्यते। कैमर्थ्ये हि सा कल्प्येत। तस्मादेवञ्जातीयका अर्थवादाः । अर्थवादत्वे चाऽवर्त्तमाने वर्त्तमानशब्दः प्रशंसार्थ

उपपत्स्यते ॥ २ ॥ ॥ युक्तिः ॥

## फलं तु तत्प्रधानायाम् ॥ ३ ॥

अथ यदुक्तं, यथा– खादिरं वीर्यकामस्य यूपं कुर्याद् वैल्वमन्नाद्यकामस्य पालाशं ब्रह्मवर्चसकामस्येति । युक्तं तेषु । विधिविभक्तिः कुर्यादिति वीर्य्यखादिरसम्बन्धस्य विधात्री । न च वर्त्तमानापदेशिनी । तस्मात् तत्राऽविरोध इति । एवं हि पदवाक्यार्थन्यायविदः श्लोकमामनन्ति—

कुर्यात् क्रियेत कर्त्तव्यं भवेत् स्यादिति पञ्चमम् ।

एतत् स्यात् सर्ववेदेषु नियतं विधिलक्षणम्, इति ॥ विधिविभक्तिं हि विधायिकां लिङ्गं मन्यमानाः श्लोकमिमं समामनन्ति। अस्ति चात्र विधिविभक्तिः । तस्मादनुपवर्णनमेतदिति ॥ ३ ॥ ॥ आ० नि० ॥ द्रव्यसंस्कारकर्मणां क्रत्वर्थताधिकरणम् ॥ १ ॥

## नैमित्तिके विकारत्वात् क्रतुप्रधानमन्यत् स्यात् ॥ ४ ॥

अस्ति ज्योतिष्टोमे नैमित्तिकं– वार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्य्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्येति । तथाऽग्नौ नैमित्तिकं– साहस्रं प्रथमं चिन्वानश्चिन्वीत, द्विसाहस्रं द्वितीयं त्रिसाहस्रं तृतीयमिति । तथा दर्शपूर्णमासयोः श्रूयते– गोदोहनेन पशुकामस्य प्रणयेत्, कांस्येन ब्रह्मवर्चसकामस्य, मार्त्तिकेन प्रतिष्ठाकामस्येत्येतानि नैमित्तिकानि । तेषु सन्देहः । किमेतान्येव नैमित्तिकानि नित्यार्थे, उतान्यत् । तत्र तत्र नित्यार्थे इति ॥

किं प्राप्तमेतान्येव ? इति । कुतः । अत्र ब्रह्मसामादिभिरवश्यं भवितव्यम् । चोदितानि हि तानि । सन्निहितानि साधनानि आकाङ्क्षन्ति । न चैषां सन्ति विहितानि साधनानि । समीपतश्च नैमित्तिकान्युपनिपतन्ति । तैः प्रकृतैः सन्निहितैरेतानि निराकाङ्क्षीक्रियन्ते इत्येतन्न्याय्यम् । कथम् । नैमित्तिकं हि सन्निहितं वाक्याद् अवगम्यते, नान्यच्छ्रूयते । यावांश्च श्रुतस्योत्सर्गे दोषस्तावानेव अश्रुतकल्पनायाम् ॥ आह । ननु निमित्तार्थानि तानि प्रकृतानि । उच्यते । नैष दोषः । अन्यार्थमपि प्रकृतमन्येन सम्बद्ध्यते । यथा, शाल्यर्थं कुल्याः प्रणीयन्ते । ताभ्यश्च पानीयं पीयते । उपस्पृश्यते च । एवमिहापि द्रष्टव्यम् । अथवाऽस्त्येवात्र अवान्तरवाक्यम् । यथा, गोदोहनेन प्र-

णयेदिति । तदकामसम्बद्धं गोदोहनेन प्रणयनं प्रापयति । न च शक्यं श्रुतमुत्स्रष्टुम् । योऽन्ययं पशुकामस्येति शब्दः, स पशुकामसम्बन्धं शक्नुयात् कर्तुं, नाऽवान्तरवाक्यस्यार्थं निवारयितुम् । न च गम्यमानं, विना कारणेनाविवक्षितमिति शक्यं वदितुम् । भवन्ति च क्लिष्टानि वाक्यानि । यथा श्वेतो धावति, अलम्बुसानां यातेति । तस्मान्नैमित्तिकान्येव नित्यार्थे भवितुमर्हन्तीति ॥ एवं प्राप्ते ब्रूमः । नैमित्तिके श्रूयमाणे क्रत्वर्थमन्यत् स्यादिति । कुतः । विकारत्वात् विशेषे श्रुतत्वादित्यर्थः । विशेषे हि तत्र नैमित्तिकं श्रूयते। तद् असति तस्मिन् विशेषे न भवितुमर्हति । यदुक्तम्, अवश्यकर्त्तव्यानीति । नैष दोषः । अवश्यकर्त्तव्यत्वात् करिष्यन्ते । यत्तु नान्यदेषां विहितं साधनमिति । सामान्यविहितं भविष्यतीति न दोषः। किन्तु तत् ? । अभीवर्त्तो ब्रह्मसाम अष्टादशमन्त्रगतोऽग्निः वारणं प्रणयनपात्रम् । अथ यदुक्तं, सन्निहितैः प्रकृतैर्नैमित्तिकैर्ब्रह्मसामादीनि सम्भत्स्यन्ते इति । नेति ब्रूमः । न हि बार्हद्गिरादीनां प्रकरणम् । अथोच्येत, प्रकृतैः स्तोत्रादिभिः सम्बद्ध्यन्ते इति । एतदपि नोपपद्यते । यद्यपि प्रकृतानि नित्यानि स्तोत्रादीनि, तथापि वाक्येन निमित्तसंयोगे श्रूयन्ते बार्हद्गिरादीनि । वाक्यं च प्रकरणाद् बलीयः । यदुक्तं, सन्निधानाद्वाक्यादवगतोऽयमर्थ इति । नैवञ्जातीयको वाक्यार्थः सामान्यं पदार्थं बाधितुमर्हति । निमित्तसंयोगे हि बार्हद्गिरादीनामर्थवत्ता । तस्मात् तत्र तत्रान्यन्नैमित्तिकादिति ॥ अथ यदुक्तम्—अवान्तरवाक्येन गोदोहनमपि प्रापितं न शक्यमुत्स्रष्टुम् ऋते कारणादविवक्षितं कल्पयितुम् । क्लिष्टं हि तद् भवतीति । उच्यते । कारणादविवक्षितम् । किं कारणम् । न हीदं युगपद् भवति, परिपूर्णेन चार्थाभिधानमवान्तरवाक्येन चेति । कथम् । प्रणयतीति प्रपूर्वे नयतौ विधिविभक्तिः स्वपदगतमर्थं श्रुत्या विदधाति । प्रणयनादिसम्बन्धमपि गोदोहनादि श्रुत्या, वाक्येन च । यस्तु फलस्य गोदोहनादेश्च सम्बन्धः, स हित्वा श्रुत्यर्थं केवलेन वाक्येन । अथ प्रणयनस्य गोदोहनादिसम्बन्धं, गोदोहनादेश्च फलेन सम्बन्धं वदतीत्युच्यते । न ह्यर्थाऽभिधानाद् भिद्येत नितरां वाक्यम् । न चैतन्न्याय्यम् ॥ यत्तु, श्वेतो धावतीत्येवमादि, भवेत् तत्र विशेषानवगमादुभयार्थावगतिः । इह तु गम्यते विशेषः कामिपदोच्चारणम् । नेह

श्रौतोऽर्थः । मन्येत यदि गोदोहनादेः क्रियासम्बन्धो विवक्ष्यते, फमिपदं प्रमादो भवेत्। न चाऽयं प्रमादः । नैवाऽवान्तरवाक्यार्थे विवक्षिते फमिपदसम्बन्धोऽवकल्पते । तस्मान्न द्विष्ठं वाक्यम् । गो-दोहनादि-फमिसम्बन्ध एवात्राभिधीयते, न नित्यकार्ये भवितुमर्ह-तीति । एवं सर्वत्र ॥ ४ ॥ ॥ नैमित्तिकानां बार्हद्गिरादीनामनित्या-ऽर्थत्वाधिकरणम् ॥ २ ॥

## एकस्य तूभयत्वे संयोगपृथक्त्वम् ॥ ५ ॥

अग्निहोत्रे श्रूयते, दध्ना जुहोतीति । पुनश्च दध्नेन्द्रियकामस्य जु-हुयादिति । तथा अग्नीषोमीये पशावाम्नायते, खादिरे बध्नातीति, पुनश्च खादिरं वीर्य्यकामस्य यूपं कुर्यादिति । तत्र सन्देहः । किमत्रा-ऽप्यन्यन्नित्यार्थमुत नैमित्तिकमेवेति । किं प्राप्तम् । पूर्वेण न्यायेनान्य-दिति । एवं प्राप्ते ब्रूमः । एकस्योभयत्वे नित्यत्वे नैमित्तिकत्वे च स-योगपृथक्त्वं कारणम् । तदिह संयोगपृथक्त्वमस्ति । एकः संयोगो दध्ना जुहोतीति, एको दध्नेन्द्रियकामस्येति । तथैकः—खादिरे बध्नातीति, अपरः— खादिरं वीर्यकामस्येति । तस्मान्नित्यार्थे कामाय च दधि-खादिरादीति ॥ ५ ॥ ॥ सि० ॥

## शेष इति चेत् ॥ ६ ॥

इति चेत् पश्यसि, कस्मान्न पूर्वस्यायमपि शेषो भवति । यदे-तदुक्तं- दध्ना जुहोति, खादिरे बध्नातीति तस्यैव तु दध्नः फलमिन्द्रि-यं, तथा खादिरस्य वीर्यम् । तच्चेदं चैकं वाक्यमिति ॥ ६ ॥ आ० ॥

## नार्थपृथक्त्वात् ॥ ७ ॥

नैतदेवं, पृथगेतावर्थौ- यश्च दधिहोमसंयोगो यश्च दधीन्द्रियसंयो-गः । तथा खादिरस्य बध्नातिना संयोगो वीर्येण च । द्वावेतावर्थौ, द्वावपि च विधित्सितौ । अर्थैकत्वाच्चैकं वाक्यं समधिगतम् । इहा-ऽर्थद्वयेन भिद्येत वाक्यम् । कथम् । जुहोतिसमभिव्याहृता विधिवि-भक्तिः । असम्भवे श्रौतस्य होमविधानस्य, गुणं समभिव्याहृतं वि-धातुमर्हति । तदसम्भवे गुणफलसम्बन्धम् । तत्र हि अत्यन्ताय श्रुतिरुत्सृष्टा वाक्यानुरोधेन स्यात् । न च युगपत् सम्भवासम्भवौ सम्भवतः । तस्माद् यदेव नैमित्तिकं तदेव नित्यार्थमिति ॥ ७ ॥ आ० नि० ॥ दध्यादेर्नित्यनैमित्तिकोभयार्थताधिकरणम् ॥ ३॥ संयोग-

पृथक्त्वन्यायः ॥

द्रव्याणां तु क्रियार्थानां संस्कारः क्रतुधर्म्मः स्यात् ॥८॥

ज्योतिष्टोमे समामनन्ति- पयोव्रतं ब्राह्मणस्य, यवागूराजन्यस्य, आमिक्षा वैश्यस्येति । तत्र सन्देहः । किमयं पुरुषधर्मः, उत क्रतोरिति । प्रकरणं बाधित्वा वाक्येन विनियुक्तः पुरुषस्येति । एवं प्राप्ते ब्रूमः । पुरुषाणां क्रियार्थानां शरीरधारणार्थो बलकरणार्थश्चायं संस्कारो व्रतं नाम । स क्रतुधर्मो भवितुमर्हति, प्रकरणानुग्रहाय । ननु वाक्यात् पुरुषधर्म इति । नेति ब्रूमः । तथा सति फलं कल्प्यं, क्लृप्तमितरत्र । प्रयोगवचनेनोपसंहृतं हि तत् प्रधानस्य । तस्मात् क्रतुधर्म्मः ॥ ८ ॥ सि० ॥

पृथक्त्वाद् व्यवतिष्ठेत ॥ ९ ॥

अथ पुरुषसंयोगः किमर्थः । व्यवस्थापनार्थ इति ब्रूमः । पयोव्रतं ज्योतिष्टोमस्य भवति । तत्तु ब्राह्मणकर्त्तृकस्यैव, नान्यकर्त्तृकस्येति । एवं सर्वत्र ॥ ९ ॥ ॥ युक्तिः ॥ पयोव्रतादीनां क्रतुधर्मताऽधिकरणम् ॥ ४ ॥

चोदनायां फलाश्रुतेः कर्ममात्रं विधीयेत न ह्यशब्दं प्रतीयते ॥ १० ॥

इदमामनन्ति–तस्मात् पितृभ्यः पूर्वद्युः करोतीति । तथा सर्वेभ्यो वा एष देवेभ्यः सर्वेभ्यश्छन्दोभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानमागुरते, यः सत्रायागुरते, स विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्वस्तोमेन सर्ववेदसदक्षिणेन यजेतेत्येवँल्लक्षणके श्रुते भवति सन्देहः । किं निष्फलमेतत् कर्म्ममात्रम्, उत सफलमिति । किं प्राप्तम् । निष्फलमिति । कुतः । फलाश्रुतेः । शब्दप्रमाणके कर्म्मण्येवञ्जातीयके, न हि अशब्दं प्रतीयते ॥ ननु वैदिकानि कर्माणि फलवन्ति भवन्तीत्येवमुक्तम् । उच्यते । फलदर्शनात्तानि फलवन्तीत्युक्तम् । न वैदिकत्वात् । एवं तर्हि कर्त्तव्यतावगमात् फलवन्तीत्यध्यवस्यामः । सुखफलं हि कर्त्तव्यं भवतीति । उच्यते । प्रत्यक्षविरुद्धमेवञ्जातीयकस्य कर्त्तव्यत्वम् । साक्षाद्धि तद् दुःखफलमवगच्छामः । न चैवञ्जातीयकं प्रत्यक्षविरुद्धं वचनं प्रमाणं भवति । यथाऽम्बुनि मज्जन्त्यलाबूनि, शिलाः प्लवन्ते, पावकः शीत इति । अपिचानुमानादत्र सुखफलता । य-

स्मात् कर्त्तव्यमतः सुखफलमिति । प्रत्यक्षं चानुमानाद् बलीयः । तस्मान्निष्फलमेवञ्जातीयकमिति ॥ एवं हि अत्र फलं कल्प्येत । यद्येतत् फलवद्, एवमुपदेशोऽर्थवान् भवतीति । उच्यते । कामं वाक्यमनर्थकमिति न्याय्यं वचनं भवेत् । भवन्ति ह्यनर्थकान्यपि वचनानि, दश दाडिमानि षडपूपा इत्येवञ्जातीयकानि । ननु विश्वजिद् व्यापारः सुखफल इति । उत्तरं सुखफलं हि भवत्यपूर्वं, न व्यापारः । नचायमपूर्वस्य कर्त्तव्यतामाह । फलकर्त्तव्यतायां हि सत्यां तदवगम्यते । वाक्यार्थश्च फलस्य कर्त्तव्यतामाह, न पदार्थः । न चात्र फलसम्बद्धं वाक्यमस्ति । तस्मान्नायमपूर्वस्य विधायकः शब्दः । व्यापारमात्रमेव विदधाति । स च व्यापारो न तदात्वे सुखफलो, नापि आयत्याम् । भङ्गित्वात् । तत्रापूर्वं कल्पयित्वा फलमवगम्येत । फलं च कल्पयित्वा अपूर्वम् । एवमितरेतराश्रयं भवति । इतरेतराश्रयाणि च न प्रकल्पन्ते । तस्मान्निष्फलमेवञ्जातीयकमिति ॥ आह । अध्याहरिष्यामहे फलवचनम् । उच्यते । न शक्यं परिपूर्णे वाक्ये अध्याहर्त्तुम् । परिपूर्णं हीदं वाक्यं, विश्वजिद् यागः कर्त्तव्य इति । न किञ्चित् पदमस्ति साकाङ्क्षं, येन अध्याहृत्य फलं सम्बद्ध्येत । यथा अक्षेमेऽपि पथि भवति विप्रलम्भक उपदेशः । क्षेमोऽयं, यथा गच्छतु भवान् अनेनेति । परिपूर्णमेवेदं वाक्यं, नाध्याहारमर्हति विप्रलम्भककर्त्तृकम् । एवमिदमपि परिपूर्णं वाक्यं नाध्याहारमर्हति । अपिचाध्याह्रियमाणेनैवेदं वाक्यं सम्बद्ध्येत । विश्वजिद् यागः कर्त्तव्यः । इदं च फलं भवतीति । द्वाविमावर्थौ । एकार्थं च वाक्यं समधिगतम् । तस्मादनर्थकमेवञ्जातीयकं कर्मेति ॥ १० ॥

## अपि वाम्नानसामर्थ्याचोदनार्थेन गम्येतार्थानां ह्यर्थवत्त्वेन वचनानि प्रतीयन्तेऽर्थतो ह्यसमर्थानामानन्तर्य्येऽप्यसम्बन्धस्तस्माच्छ्रुत्येकदेशः सः ॥ ११ ॥

अपि वेति पक्षव्यावृत्तिः । न चैतदस्ति, अफलमिति । फलचोदना अर्थेन गम्येत । कतमेन अर्थेन । कर्त्तव्यतावचनेन । आह । ननु व्यापारस्य प्रत्यक्षविरुद्धा कर्त्तव्यता । न व्यापारस्योच्यते । कस्य तर्हि । व्यापारेणान्यस्य कस्यचिदिति । भवति तेनेदानीं वाक्यं

साकाङ्क्षम् । तत्राध्याहारोऽवकल्पते । भवति चाध्याहारेणापि कल्पना । यथा, द्वारं द्वारमित्युक्ते, संव्रियतामपाव्रियतामिति । कथं पुनरवगम्यते, इहाध्याहारेण कल्पयितव्यमिति । आम्नानसामर्थ्यात् । एवमिदमाम्नानमर्थवद् भविष्यति । शक्नोति च अर्थमवगमयितुम् । तस्मान्नानर्थकम् ॥

ननु यत् पदमध्याह्रियते तत् पौरुषेयम् । तेनावगतं चाप्रमाणम् । उच्यते । नापूर्वमध्याहरिष्यामः । वैदिकेनैवास्य, सहान्यत्र समाम्नातेनैकवाक्यतामध्यवस्यामः । आह । नैवं शक्यम् । अन्तिकावुपनिपतितं हि पदं वाक्यार्थमुपजनयितुमलं भवति, न दूरादवतिष्ठमानम् । अत्रोच्यते । व्यवहितमपि हि पराणुद्य व्यवधायकम् । आनन्तर्येण मनसि विपरिवर्त्तमानम् अलमेव भवति विशेषमुपजनयितुम् । यथा-

इतः पश्यसि धावन्तं दूरे जातं वनस्पतिम् ।

त्वां ब्रवीमि विशालाक्षि ! या पिनक्षि जरद्गवम्, इति इतःपश्यसि-शब्दो बुद्धौ भवति । सः, दूरे जातं वनस्पतिमेतैः पदैर्व्यवहितेन जरद्गवमित्यनेन शब्देन व्यवधायकानि अपोद्य सम्बध्यमानः सम्बध्यते । अर्थानां हि अर्थवत्त्वेन हेतुना व्यवहितान्यपि वचनानि सम्बध्यन्ते । यानि पुनरर्थतो ह्यऽसमर्थानि । तान्यानन्तर्येऽपि सति न परस्परेण सम्बन्धमर्हन्ति । यथा, या पिनक्षि जरद्गवमित्येवमादीनि । तस्मान्न पौरुषेयता भविष्यति । आह । नन्वत्रापि अपेक्षा पौरुषेयी । उच्यते । नापेक्षा वेदे । वेदार्थप्रतिपत्तावभ्युपाय एव भवति । अनन्तरापेक्षायाम् असम्भवन्त्यामाम्नानसामर्थ्यादितरापेक्षा वृत्तिराश्रीयते । तस्माच्छ्रुत्येकदेशः सः । फलकामपदं दूरेऽपि सत् तस्य वाक्यस्यैकदेशभूतमित्यर्थः ॥ ११ ॥ ॥ सि० ॥

## वाक्यार्थश्च गुणार्थवत् ॥ १२ ॥

इन्द्राय राज्ञे शूकर इति । यथा वाक्यान्तरस्थेन विधिशब्देन गुणविधानं भवति, एवं फलविधानमपि भवितुमर्हतीति । यथा, वरुणो वा एतमग्रे प्रत्यगृह्णादिति व्यवधारणकल्पना । एवमिदमपि द्रष्टव्यम् ॥१२॥ युक्तिः ॥ विश्वजिदादीनां सफलत्वाऽधिकरणम् ॥५॥

## तत्सर्वार्थमनादेशात् ॥ १३ ॥

तस्मात् पितृभ्यः पूर्वेद्युः करोतीति । विश्वजिता यजतेति फलवद् एवंविधं कर्मेत्येतत् समधिगतम् । इदं तु सन्दिह्यते । किं सर्वफलमेतत् कर्म, उतैकफलमिति । किं प्राप्तम् । तत् सर्वार्थमिति । कुतः । अनादेशात् । न किञ्चिदिह अतिदिश्यते । इदं नाम फलमिति । अस्ति चेद् विज्ञायेत । तस्मात् सर्वार्थमविशेषात् ॥१३॥ पूर्व० ॥

## एकं वा चोदनैकत्वात् ॥ १४ ॥

एकं फलं स्याद्, न वा सर्वार्थम् । कुतः । चोदनैकत्वात् । साकाङ्क्षत्वादेतदर्थिपदेन सम्बद्ध्यते इत्युक्तम् । यद्यानेकेनापि सम्बद्धुं शक्नोति, तदेकेन सम्बद्ध्यते । एकेन सम्बद्धं सन्निराकाङ्क्षं भवति । न तदपरेणापि सम्बन्धमर्हति । तस्मादेकैव कर्त्तव्यताचोदना न्याय्या । तस्मादेकफलतेति ॥ १४ ॥ ॥ सि० ॥ विश्वजिदादीनामेकफलताऽधिकरणम् ॥ ६ ॥

## स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात् ॥ १५ ॥

एवञ्जातीयकेष्वेवोदाहरणेष्वेतत् समधिगतम्, एकं फलमिति । इदमिदानीं सन्दिह्यते । किं यत्किञ्चिद् उत स्वर्ग इति । यत्किञ्चिदिति प्राप्तम् । विशेषानभिधानात्, तत उच्यते । स स्वर्गः स्यात् सर्वान् प्रत्यविशिष्टत्वात् । सर्वे हि पुरुषाः स्वर्गकामाः । कुत एतत् । प्रीतिर्हि स्वर्गः । सर्वश्च प्रीतिं प्रार्थयते । किमतो यद्येवम् । अविशेषवचनः शब्दो न विशेषे व्यवस्थापितो भविष्यति । यजेत कुर्यादिति । तस्मात् स्वर्गफलमेवञ्जातीयकमिति ॥ १५ ॥ ॥ सि० ॥

## प्रत्ययाच्च ॥ १६ ॥

भवति चानादिष्टफले कर्म्मणि स्वर्गः फलमिति प्रत्ययो लोके । एवमुच्यते । आरामकृद्देवदत्तः, नियतोऽस्य स्वर्गः । तड़ागकृद्देवदत्तः नियतोऽस्य स्वर्ग इति । किमतो यद्येवम् ? । इत्थमनेन न्यायेन स्वर्गे सम्प्रत्ययो भवति । यस्मात् स्वर्गफलेषु कर्म्मसु कर्त्तव्येषु फलवचनं नैवोच्चारयन्ति, गम्यते एवेति । तस्मादपि अवगच्छाम । एवञ्जातीयकेषु स्वर्गः फलमिति ॥ १६ ॥ ॥ युक्तिः ॥ विश्वजिदादीनां स्वर्गफलताधिकरणम् ॥ ७ ॥ इदमधिकरणत्रयं विश्वजिन्न्यायः ॥

## क्रतौ फलार्थवादमङ्गवत् कार्ष्णाजिनिः ॥ १७ ॥

रात्रीः प्रकृत्य श्रूयते, प्रतितिष्ठन्ति ह वा एते, य एता उपयन्ति ।

ब्रह्मवर्चस्विनोऽन्नादा भवन्ति, य एता उपयन्तीति । तत्र सन्देहः किं ते फलार्थवादाः, उत फलविधय इति । किं प्राप्तम् । फलार्थवादा इति कार्ष्णाजिनिर्मेने । कुतः । फलार्थवादसरूपा एते शब्दा इति । किं सारूप्यम् । विधिविभक्तेरभावः । अङ्गवत् । यथा, यस्य खादिरः स्रुवो भवति स च्छन्दसामेव रसेनावद्यतीत्येवमादिषु ॥१७॥ ॥पूर्व०॥

## फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यात् ॥ १८ ॥

आत्रेयः पुनराचार्य्य एवञ्जातीयकेभ्यः फलमस्तीति मेने, न फलार्थवाद इति । कुतः । अश्रुतफलत्वेऽप्यमीषां फलचोदनया वाक्यशेषभूतया भवितव्यम् । तस्माद् अन्या व्यवहिता सती अव्यवहिता कल्पनीया । इयं त्वव्यवहिता क्लृप्तैव । प्रतिष्ठया ब्रह्मवर्चससत्त्वेन च समभिव्याहार आसां प्रत्यक्षः । विधिविभक्तिमात्रमन्यतोऽपेक्ष्यम् । आह । कथं केवलं विधिविभक्तिमात्रमन्यतो भविष्यति । यदनेन प्रतिष्ठादिना धात्वर्थेन सम्भन्त्स्यते इति । उच्यते । सह धात्वर्थेन भविष्यति, न केवलम् । तस्माददोषः । अथ वा रात्रीणां या विधायिका विभक्तिः, सा इममपि प्रतिष्ठादिविशेषं विधास्यति प्रयोगवचनेन । स्तुतिर्वा सह प्रतिष्ठादिभिर्विधात्री भविष्यतीति ॥ १८ ॥ सि०॥

## अङ्गेषु स्तुतिः परार्थत्वात् ॥ १९ ॥

अथ यदुक्तं, यथा यस्य खादिरः स्रुवो भवतीत्येवमादिषु फलश्रुतिः अर्थवादो भवति, एवमिहापि स्यादिति । युक्तं तत्र फलार्थवादः । फलविध्यसम्भवात्, फलार्थवादसम्भवाच्च । तदुक्तं, द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुतिरर्थवादः स्यात् ॥ १९ ॥ आ०नि०॥ रात्रिसत्रस्यार्थवादिकफलकत्वाधिकरणम् ॥ ८ ॥ रात्रिसत्रन्यायः ॥

## काम्ये कर्मणि नित्यः स्वर्गो यथा यज्ञाङ्गे क्रत्वर्थः ॥२०॥

काम्यानि कर्म्माण्युदाहरणम् । सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इत्येवमादीनीति । तत्र सन्देहः । किमेषां स्वर्गः फलं कामश्च, उत काम एवेति । किं प्राप्तम् । काम्ये कर्मणि नित्यः स्वर्गः स्यात् । कथम् । सर्वपुरुषार्थाभिधायी सामान्यवचनः शब्दो न विशेषे अवस्थापितो भवति । शक्यते हि अस्य दूरस्थेनापि स्वर्गकामशब्देन सम्बन्धः । आह । ननु विशेषकः शब्दः श्रूयते, ब्रह्मवर्चसकाम इति । नैष विशेषकः । उपाधिकर एषः । यथा काष्ठान्याहर्तुं प्रस्थित उच्यते,

भवता शाकमपि आहर्त्तव्यमिति । काष्ठाहरणे शाकाहरणमुपाधिः क्रियते इति । किमिदमुपाधिः क्रियत इति । काष्ठाहरणाधिकारसमीपे द्वितीयं कर्मोपधीयते । सति काष्ठाहरणे, इदमपरं कर्त्तव्यमिति । एवमिहापि स्वर्गफले फलमपरमुपधीयते, ब्रह्मवर्चसकामो यागेन स्वर्गमभिनिर्वर्त्तयेदिति । न हि तत्र ब्रह्मवर्चसफलवचनं स्वर्गफलस्य प्रतिषेधकम् । यथा यज्ञाऽङ्गे क्रत्वर्थः । गोदोहनेन पशुकामस्य प्रणयेदिति । यः पशुकामः स गोदोहनेन प्रणयनमभिनिर्वर्त्तयेदिति ॥ २० ॥ पूर्व० ॥

## वीते च कारणे नियमात् ॥ २१ ॥

वीते च कारणे, वीतायां फलेच्छायामाप्ते वा फले समाप्तिनियमो दृश्यते । वृष्टिकामेष्ट्यां, यदि वर्षेत् तावत्येव जुहुयात्, यदि न वर्षेत् श्वोभूते जुहुयादिति । यदि न स्वर्गः, किमर्थः समाप्तिनियमो भवेत् । तस्मान्नित्यः स्वर्ग इति ॥ २१ ॥ युक्तिः ॥

## कामो वा तत्संयोगेन चोद्यते ॥ २२ ॥

कामो वा फलं भवेद्, न स्वर्गः । तत्संयोगेनास्य चोदना भवति, न स्वर्गकामसंयोगेन । आनुमानिकोऽस्य स्वर्गकामेन एकवाक्यभावः । प्रत्यक्षस्तु कामवचनेन । प्रत्यक्षं चानुमानाद् बलीयः । तस्मात् काम एव फलमिति ॥ २२ ॥ सि० ॥

## अङ्गे गुणत्वात् ॥ २३ ॥

अथ यदुक्तं, यथा यज्ञाङ्गे इति । युक्तम् । अङ्गे गुणत्वात् । प्रत्यक्षस्तत्र क्रतुना संयोगः, कामेन च । यः पशुकामः स्यात् स गोदोहनेन प्रणयनमभिनिर्वर्त्तयेदिति । न त्वत्र प्रत्यक्षः शब्दोऽस्ति । यो ब्रह्मवर्चसकामः स्यात्, स यागेन स्वर्गमभिनिर्वर्त्तयेदिति । कथं तर्हि । यो ब्रह्मवर्चसकामः स्यात्, स तद् यागेन निर्वर्त्तयेदिति । तस्मान्नाङ्गवद् भवितुमर्हतीति ॥ २३ ॥

## वीते च नियमस्तदर्थम् ॥ २४ ॥

अथ यदुक्तं, वीतायां फलेच्छायामवाप्ते वा फले समाप्तिनियमो दृश्यते इति । तत्र ब्रूमः । वीते नियमस्तदर्थम् । वीते नियमो भवति, तस्मै प्रयोजनाय । कस्मै । शिष्टाविगर्हणाय । उपक्रम्य अपरिसमापयतस्तदनन्तरमेवैनं शिष्टा विगर्हयेयुः, प्राक्रमिकोऽयं कापुरुष इति वदन्तः । ये हि देवेभ्यः सङ्कल्प्य हविः, न यागमभिनिर्वर्त्त-

यन्ति, तान् शिष्टा विगर्हन्ते । तस्मादवश्यं समापयितव्यम् । तत्रै-तद्दर्शनं युक्तं भविष्यति । यदि वर्षेत् तावत्येव जुहुयादिति । तस्मात् काम्यानां काम एव फलमिति ॥ २४ ॥ आ० नि० ॥ काम्यानां यथोक्तकाम्यफलकत्वाधिकरणम् ॥ ९ ॥

## सार्वकाम्यमङ्गकामैः प्रकरणात् ॥ २५ ॥

इदमाम्नायते—एकस्मै वा अन्या इष्टयः कामाय आह्रियन्ते, सर्वेभ्यो दर्शपूर्णमासौ, एकस्मै वान्ये क्रतवः कामाय आह्रियन्ते, सर्वेभ्यो ज्योतिष्टोम इति । तत्र सन्देहः । किमङ्गकामैरङ्गाङ्गकामैश्च सहास्यानुवादः, अथवा विधिरिति । किं प्राप्तम् । अनुवाद इति । यदेतत् सार्वकाम्यं, तदनूद्यते । अङ्गकामैश्च अङ्गाङ्गकामैश्च सह । सन्ति हि अङ्गकामाश्चाङ्गाङ्गकामाश्च । यथा, आहार्य्यपुरीषां पशुकामस्य वेदिं कुर्य्यात्, खननपुरीषां प्रतिष्ठाकामस्येत्येवमादयः । तथा, यदि कामयेत वर्षेत् पर्जन्य इति नीचैः सदो मिनुयादिति । तद् विहितमेवेदमभिधीयते इत्यनुवादं न्याय्यं मन्यामहे ॥ २५ ॥ पूर्व० ॥

## फलोपदेशो वा प्रधानशब्दसंप्रयोगात् ॥ २६ ॥

फलविधिर्वा । कुतः । प्रधानशब्देन फलसंयोगो भवति । सर्वेभ्यो दर्शपूर्णमासौ, सर्वेभ्यो ज्योतिष्टोम इति च । प्रधानाभिधानेन च प्रधानस्य सर्वफलवत्ता विहिता । तस्मान्नानुवादः । अथाऽङ्गकामान् अङ्गाङ्गकामाँश्चापेक्षते, तथा लक्षणाशब्दः स्यात् । श्रुतिश्च लक्षणाया गरीयसी । तस्मात् प्रयोगवचनेन विधिरिति ॥ २६ ॥ ॥ सि० ॥ दर्शपूर्णमासादीनां सर्वकामार्थताधिकरणम् ॥ १० ॥

## तत्र सर्वेऽविशेषात् ॥ २७ ॥

एवञ्जातीयकेष्वेवोदाहरणेष्वेतदुक्तं, प्रधाने सर्वकामानां विधिरिति । इदमिदानीं सन्दिह्यते । किं सकृत्प्रयोगे सर्वे कामाः, उत पर्य्यायेणेति । किं प्राप्तम् । सकृत्प्रयोगे सर्वे कामा इति । कथम् । सर्वेषां कामानां दर्शपूर्णमासौ निमित्तं, ज्योतिष्टोमश्चेति । निमित्तं चेत् सर्वेषां कामानां, कोऽत्र खलु कामो न भविष्यति ? इति । तस्माद् यौगपद्येन सर्वे कामा इति ॥ २७ ॥ ॥ पूर्व० ॥

## योगसिद्धिर्वार्थस्योत्पत्त्यसंयोगित्वात् ॥ २८ ॥

न चैतदस्ति, सर्वे युगपत् कामा इति । पर्य्यायो योगसिद्धिः

पर्य्यायेण भवेयुः कामा इति । कुतः । अर्थस्योत्पत्त्यसंयोगित्वात् । अर्था इमे कामा नाम, न सर्वे एव युगपदुत्पद्यन्ते । असम्भवो युगपदुत्पत्तेः सर्वेषां, विरोधात् । अथ वा, उत्पत्त्यसंयोगित्वादिति । न । कामानामेतदुत्पत्तिवचनम् । उत्पन्नानां लक्षणत्वेन वचनम् । ये सर्वे कामास्तेभ्यो दर्शपूर्णमासौ ज्योतिष्टोमश्चेति । न सर्वे कामाः कर्मणः श्रूयन्ते, ये सर्वे कामास्तेभ्यो हि कर्म विधीयते । तस्मान्न कामानां साहित्यं गम्यते इति ॥ २८ ॥ सि० ॥ दर्शपूर्णमासादीनां प्रतिफलं पृथगनुष्ठानाधिकरणम् ॥ ११ ॥ योगसिद्धिन्यायः ॥ इदमधिकरणद्वयं दर्शपूर्णमासन्यायः ॥

## तत्र सर्वेऽविशेषात् ॥ २७ ॥

काम्यानि कर्माण्युदाहरणम् । सौर्यं चरुं निर्वपेद् ब्रह्मवर्चस कामः, ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः, चित्रया यजेत पशुकामः, वैश्वदेवीं सांग्रहायणीं निर्वपेद् ग्रामकाम इति । तेषु सन्देहः । किमिह लोके कामाः, उतामुष्मिँल्लोके इति । किं प्राप्तम् । तत्रामुष्मिँल्लोके कामाः । अविशेषात् । यथा स्वर्गः, एवमिमेऽपि । न हि अनन्तरनिर्वृत्ते कर्म्मणि फलमुपलभ्यते पश्वादि । यच्चानन्तरमुपलभ्यते, तत् तत इति विज्ञायते । यथा यत्काले मर्दनं, तत्कालं मर्दनसुखम् । यच्च कालान्तरे उपलभ्यते, तस्याप्यन्यदेव कारणं प्रत्यक्षम् । शरीरग्रहणस्य तु नादृष्टादृते किञ्चित् कारणमस्ति । तस्माद् विशिष्टेन्द्रियशरीरादि फलं पशुसम्बन्धसमर्थं पशुफलात् कर्म्मणो भवतीत्येवं बोद्धव्यम् । तद्धि दर्शयति । कैकयो यज्ञं विवित्सन् दाल्भ्यमुवाच । अनया मा राष्ट्रप्रतिपादनीयया इष्ट्या याजयेति । सोऽब्रवीत् । न वै सोम्य राष्ट्रप्रतिपादनीयां वेत्थ, अमुष्मै कामाय यज्ञा आह्रियन्ते इति जन्मान्तरफलतां दर्शयति । तस्माज्जन्मान्तरफलानि काम्यानीति ॥ २७ ॥ पूर्व० ॥

## योगसिद्धिर्वार्थस्योत्पत्त्यसंयोगित्वात् ॥ २८॥

इहैवैषां सिद्धिर्योगस्याउत्पत्त्या योगो न सम्भवति । यः पशुभ्यः कामयते स एतेन यागेन कुर्य्यादिति । नात्रैतद् गम्यते, इह जन्मनि न सम्भवतीति । यच्चानन्तरं नोपलभ्यते इति । तन्न । प्रत्यक्षानुमानाभ्यां न गम्यते । शब्देन त्वस्ति गतिः । यत्तु कालान्तरेऽन्य-

त् कारणमिति । नैष दोषः । अन्यदपि भविष्यति. एतदपि । यज्ञाऽमुष्मै कामाय यज्ञा आह्रियन्ते इति । अत्रोच्यते । एवमस्य ऋषेर्मतम् । इह यस्य फलं तेन त्वां न याजयामि, यस्यामुत्र फलं तेन च याजयिष्यामीति । तस्मादेतत् परिहृतमिति ॥ २८ ॥ सि० ॥ काम्यानामैहिकामुष्मिकफलवत्त्वाधिकरणम् ॥ १२ ॥ वर्णकान्तरम् ॥

## समवाये चोदनासंयोगस्यार्थवत्त्वात् ॥ २९ ॥

अग्निं चित्वा सौत्रामण्या यजेत, वाजपेयेन इष्ट्वा बृहस्पतिसवेन यजेतेति । तत्र सन्देहः । किमङ्गप्रयोजनसम्बन्ध एषः, उत कालार्थः संयोग इति । अङ्गप्रयोजनसम्बन्ध इति ब्रूमः । एवं हि श्रुतिविनियुक्तोऽर्थः । इतरथा कालो लक्ष्येत । श्रुतिलक्षणाविषये च श्रुतिर्ज्याय्या, न लक्षणा । तस्मादग्न्यङ्गं सौत्रामणी, वाजपेयाङ्गं बृहस्पतिसव इति ॥ २९ ॥ ॥ सि० ॥

## कालश्रुतौ काल इति चेत् ॥ ३० ॥

एवं चेत् पश्यसि, अङ्गप्रयोजनसम्बन्ध इति । अथ कालविधानं कस्मान्न भवति । कालविधिरूपो हि शब्दः, चित्वा चयनेऽभिनिर्वृत्ते इति ॥ ३० ॥ आ० ॥

## नासमवायात् प्रयोजनेन स्यात् ॥ ३१ ॥

नैतदेवम्।असमवायात् । शब्दप्रयोजनेन शब्दार्थेनेत्यर्थः।शब्दार्थश्रयनम् । तेन असमवायः स्यात् सौत्रामण्या वाजपेयेन च बृहस्पतिसवस्य । प्रकरणं च बाध्येत । अग्निप्रकरणे श्रूयमाणोऽग्नेर्धर्मो गम्यते यागः । वाजपेयप्रकरणे च वाजपेयस्य । इतरथा, तयोः प्रकरणेऽन्यस्य धर्मः कालो गम्येत । तस्मादङ्गप्रयोजनसम्बन्ध इति॥३१॥ आ० नि० ॥ सौत्रामण्यादीनां चयनाद्यङ्गताधिकरणम् ॥१३॥

## उभयार्थमिति चेत् ॥ ३२ ॥

दर्शपूर्णमासयोरामनन्ति, संस्थाप्य पौर्णमासीं वैमृधमनुनिर्वपतीति । तत्र सन्देहः । किमुभयाङ्गं वैमृधः, कालार्थः पौर्णमासीसंयोगः ? उताङ्गप्रयोजनसम्बन्ध इति । किं प्राप्तम् । एवं चेदुभयार्थो वैमृधः । कुतः । प्रकरणे उभयोराम्नानसामर्थ्यात् । कालविधिसारूप्याच्च संस्थाप्येति ॥ ३२ ॥ पूर्व० ॥

## न शब्दैकत्वात् ॥ ३३ ॥

एकः शब्दः, अनुनिर्वपतीति, एकस्मिन्नेव वाक्ये न द्वौ सम्बन्धौ शक्नोति विधातुम् । वैमृधस्य दर्शपूर्णमासाभ्यां, पूर्णमासीकालेन च । एकार्थत्वाद्धि एकं वाक्यं समधिगतम् ॥ ३३ ॥ सि० ॥

## प्रकरणादिति चेत् ॥ ३४ ॥

प्रकरणादिति यदुक्तं, तत् परिहर्त्तव्यम् ॥ ३४ ॥ आ० ॥

## नोत्पत्तिसंयोगात् ॥ ३५ ॥

नैतदेवम्, एतदेव वैमृधस्योत्पत्तिवाक्यम् । तद्दर्शपूर्णमासाभ्यां वा प्रकरणादेकवाक्यभावमियात् । प्रत्यक्षं वा पौर्णमास्या । तत्र प्रत्यक्षसंयोगः प्रकरणाद् बलवान् । प्रत्यक्षश्च पौर्णमास्या संयोगः, परोक्षः कालेन । तस्मात् पौर्णमास्या अङ्गं वैमृध इति ॥३५॥ सि० ॥ वैमृधादेः पौर्णमास्याद्यङ्गताधिकरणम् ॥ १४ ॥

## अनुत्पत्तौ तु कालः स्यात् प्रयोजनेन सम्बन्धात्॥ ३६ ॥

ज्योतिष्टोमे श्रूयते— आग्निमारुतादूर्ध्वमनुयाजैश्चरन्ति, प्रहृत्य परिधीञ्जुहोति हारियोजनमिति । तत्र सन्देहः । किमङ्गं विधीयते, उत काल इति । अङ्गविधाने श्रुतिः, कालविधाने लक्षणा । तस्मादङ्गविधानमिति प्राप्ते ब्रूमः । अनुत्पत्तिवाक्ये कालः स्यात् । आग्निमारुतं सोमाङ्गम्, अनुयाजाः पश्वङ्गम् । तत्र न तयोः परस्परेण सम्बन्धः । तथा परिधयः पश्वङ्गं, हारियोजनम् अन्यदेव प्रधानम् । अनुयाज आग्निमारुतं च प्राप्तम् । आनन्तर्यमेव तयोर्न प्राप्तम् । तद् विधीयते । तथा, हारियोजनस्य परिधिप्रहरणस्य च । एवञ्च सति, न हारियोजनस्य परिधिप्रहरणेन कश्चिदुपकारः क्रियते, हारियोजनेन वा परिधिप्रहरणस्य । ननु परिधिप्रहरणस्योपरिष्टाद्भावेन तस्य उपक्रियेतेति । उच्यते । न हि उपरिभावार्थं परिधिप्रहरणमनुष्ठेयम् । विद्यते एवैतत् पश्वर्थम् । तस्मिँश्च सति तस्योपरिभावो विद्यते एवेति । तस्मात् कालार्थः सम्बन्ध इति ॥ ३६ ॥ अनुयाजादीनामाग्निमारुतोर्ध्वकालताधिकरणम् ॥ १५ ॥

## उत्पत्तिकालविषये कालः स्याद् वाक्यस्य तत्प्रधानत्वात् ॥ ३७ ॥

इदमाम्नायते, दर्शपूर्णमासौ इष्ट्वा सोमेन यजेतेति । तत्र सन्देहः । किमेतदङ्गस्य विधानम्, उत कालस्येति । किं प्राप्तम् । श्रुतेरङ्गस्येति प्राप्ते उच्यते । अस्मिन् कालाङ्गविधानसंशये कालः स्यात् । वाक्यस्य तत्प्रधानत्वात् । कालप्रधानं ह्येतद् वाक्यं, न यागविधानपरम् । अतत्परताऽस्य । रूपावचनात् । कथं रूपाऽवचनम् । देवताभावात् । कथमभावः । अश्रुतत्वात् । या हि यस्य श्रूयते, सा तस्य देवता भवति । श्रुत्या हि देवता गम्यते, न प्रत्यक्षादिभिः । तस्मान्नापूर्वस्य यागस्य विधानम् । कालार्थे अनुवादे नाऽयं दोषः । विहितदेवताको हि अनूद्यते । तस्मादत्र कालार्थः सम्बन्ध इति । तच्च दर्शयति– एष वै देवरथो यद् दर्शपूर्णमासौ, यद्दर्शपूर्णमासाविष्ट्वा सोमेन यजते, रथस्पष्ट एवावसाने वरे देवानामवस्यतीति । प्रदर्शिते मार्गे रथेन यातुं सुखं भवति । एवं दर्शपूर्णमासाविष्ट्वा सोमेन यष्टुं सुखं भवति । दर्शपूर्णमासप्रकृतीनि तस्य दीक्षणीयादीनि स्वभ्यस्तानि भवन्ति । एवम् अर्थवादोऽर्थवान् भवति ॥ ३७॥

सोमादीनां दर्शपूर्णमासोत्तरकालताद्यधिकरणम् ॥ १६ ॥

**फलसंयोगस्त्वचोदिते न स्यादशेषभूतत्वात् ॥ ३८॥**

वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इति । तत्र सन्देहः । किमात्मनिःश्रेयसाय, उत पुत्रनिःश्रेयसायेति । आत्मनिःश्रेयसायेति ब्रूमः । नेमानि फलदानि परस्य भवन्ति कर्माणि । कुतः । आधाने आत्मनेपदनिर्देशात् । यथा, यद्येकं कपालं नश्येदेको मासः संवत्सरस्यापेतः स्यात् । अथ यजमानः प्रमीयेत द्यावापृथिवीयम् एककपालं निर्वपेत् । यदि द्वे नश्येयातां द्वौ मासौ संवत्सरस्य अपेतौ स्याताम् । अथ यजमानः प्रमीयेत आश्विनं द्विकपालं निर्वपेत् । सङ्ख्यायोद्वासयति यजमानस्य गोपीथायेति । कपालनाशे निमित्ते आत्मनिःश्रेयसफलं कर्म दर्शयति । एवमिहापि द्रष्टव्यम् । तस्मादात्मनिःश्रेयसमिति ॥ एवं प्राप्ते ब्रूमः । फलसंयोगो न स्यात् पितुः । फलवचनं शेषभूतं पुत्रस्य न पितुः । कथम् । एवं श्रूयते, वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते । यदष्टाकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति । यन्नवकपालो भवति त्रिवृतैवास्मिँस्तेजो दधाति । यद् एकादशकपालः त्रिष्टुभैवास्मिन् इन्द्रियं दधाति । यद्

द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति । यस्मिञ्जाते एतामिष्टिं निर्वपति, पूत एव स तेजस्वी अन्नाद इन्द्रियावी पशुमान् भवतीति । यो जातस्तत्र फलं श्रूयते । नास्ति वचनस्यातिभारः । तस्मात् पुत्रस्य फलमिति । यदुक्तं, न परस्य फलदान्येतानि कर्माणीति । तदुच्यते । यत् पुत्रस्य फलम्, आत्मनः सा प्रीतिः । तस्मादात्मनेपदं न विरुध्यते । एतामेवात्मनः प्रीतिमभिप्रेत्य भवति वचनम् । आत्मा वै पुत्र इति ॥ अङ्गादङ्गात् सम्भवसि हृदयादभिजायसे * आत्मा वै पुत्रनामासि स जीव शरदः शतम्, इति ॥ ३८ ॥

एवं वा—

## अङ्गानान्तूपघातसंयोगो निमित्तार्थः ॥ ३९ ॥

अथ यदुक्तं, यद्येकं कपालं नश्येदित्येवमादि । तत्रोच्यते । अङ्गानामुपघातसंयोगो निमित्तार्थ उपपद्यते, नान्यथा । न हि कपाले नष्टे तदन्वेषणार्था इष्टिर्युक्ता । न हि काकिन्यां नष्टायां तदन्वेषणं कार्षापणेन क्रियते ॥ ३९ ॥ ॥ आ० नि० ॥ वैश्वानरेष्टेः पुत्रगतफलकत्वाऽधिकरणम् ॥ १७ ॥

## अङ्गानान्तूपघातसंयोगो निमित्तार्थः ॥ ३९ ॥

वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इति । तत्र सन्देहः । किं जातमात्रे, उत कृते जातकर्मणीति । जातमात्रे इति ब्रूमः । सम्प्राप्ते हि निमित्ते नैमित्तिकेन भवितव्यम् । एवं प्राप्ते ब्रूमः । कृते जातकर्मणीति । कुतः । सामर्थ्यात् । कृते हि जातकर्मणि प्राशनं तस्य विधीयते । यदि प्राग् जातकर्मणः इष्टिः क्रियते, प्राशनकालो विप्रकृष्येत । तत्रास्य शरीरधारणं न स्यात् । अथ यदुक्तं, सम्प्राप्ते निमित्ते हि नैमित्तिकेन भवितव्यमिति । उच्यते । अङ्गानामुपघातसंयोगो निमित्तार्थः । उपघातः पुत्रजन्म, तद् भूतं निमित्तम् । न तत्कालोऽङ्गम् । तच्च निमित्तम् । कृतेऽपि जातकर्मणि नापैति । इतरस्मिन् पक्षे कालोऽपेयात् । लक्षणा चास्मिन् पक्षे स्यात् । तस्मात् कृते जातकर्मणीति ॥ अथ किमन्तर्दशाहे यस्मिन् कस्मिन् वा अहनि, उत स्वकाले इति । किं प्राप्तम् । यस्मिन् कस्मिन् वा अहनीति । एवमनियमः प्राप्तः । अत्रोच्यते । पौर्णमास्याममावास्यायां वा । कुतः । श्रुतेः । एवं हि श्रूयते । य इष्ट्वा पशुना सोमेन वा यजेत, स पौर्णमास्याममावा-

स्यायां वा यजेतेति । नातिभारो वचनस्य इतरस्मिन् पक्षे कालोऽपे-
यात् । लक्षणाप्यस्मिन् पक्षे स्यात् । अन्यस्यां तिथावन्तर्दशाहे वा
कुर्वन् सर्वाण्यङ्गानि उपसंहर्तु न शक्नुयात् । कालं शौचञ्च नोप-
सङ्गृह्णीयात् । तस्मादतीते दशाहे पौर्णमास्याममावास्यायां वा कुर्-
र्यादिति ॥ ३९ ॥ ॥ वैश्वानरेष्टेर्जातकर्मोत्तरकालताधिकरणम् ॥१८॥
इदमधिकरणद्वयं जातेष्टिन्यायः ॥

**प्रधानेनाभिसंयोगादङ्गानां मुख्यकालत्वम् ॥ ४० ॥**

अग्निं चित्वा सौत्रामण्या यजेत, वाजपेयेनेष्ट्वा बृहस्पतिसवेन
यजेतेति । अङ्गप्रयोजनसम्बन्ध इत्युक्तम् । एतदिदानीं सन्दिह्यते।
किं चितमात्रे, तन्त्रमध्ये एव कर्त्तव्यम् ? उत स्वकाले कर्त्तव्यमिति।
तथा वाजपेये किं बृहस्पतिसवे, उत स्वकाले इति । मुख्यकालत्वम-
नयोः स्यात् । कुतः । प्रधानकालत्वादङ्गानाम् । एको हि कालः प्रधा-
नानामङ्गानां चेति वक्ष्यते । अङ्गानि तु विधानत्वात् प्रधानेनोपदिश्ये-
रन्निति । अग्निचयनं कृत्वा न तावत्येव स्थातव्यं, सौत्रामणी-
संज्ञकोऽपरो यागः कर्त्तव्य इति । तथा वाजपेयमभिनिर्वर्त्य नैतावता
कृती स्यात्, बृहस्पतिसवसंज्ञकं यागमभिनिर्वर्त्तयेदिति ॥४०॥ पूर्व०॥

**अपवृत्ते तु चोदना तत्सामान्यात् स्वकाले स्यात् ॥ ४१ ॥**

अपवृत्ते यागे चोद्यते यागान्तरमिदम् । अपवृत्तिश्च सर्वेषु या-
गाङ्गेषु अकृतेषु न भवात । न यथा भवान् मन्यते यागमात्रे निर्वृत्ते
इति । कुतः । करणविभक्त्या संयोगात् । वाजपेयेन इष्ट्वा वाजपेयेन
फलस्य व्यापारं कृत्वा साङ्गेन च व्यापारो गम्यते, न निरङ्गेन। भवेत
तन्त्रमध्ये प्रयोगो यदि वाजपयमभिनिर्वर्त्यैती।ष्सितभावो वाजपेयस्य
स्यात् । ततः प्रधानमात्रं वाजपेयसंज्ञकमभिनिर्वर्त्यैति गम्येत, न त्वेव-
मस्ति । तस्माद् यथोक्तानि सर्वाण्यङ्गानि कृत्वेत्यर्थः । एवञ्चेद्,
निर्वृत्ते प्रयोगे अतिक्रान्ते वाजपेयकाले यागः प्रयुज्यते। तस्य चोदना-
सामान्याज्ज्योतिष्टौमिके विध्यन्ते प्राप्ते स्वेन चोदकप्राप्तेन कालेन
भवितव्यम् । सौत्रामण्याश्चोदनासामान्याद्दर्शपूर्णमासकालेनेति ॥
आह । वाजपेये तावद् इष्ट्वा इति वचनाद् यागमभिनिर्वर्त्यैति गम्यते।
अग्नौ तु नोपपद्यते । तत्र चित्वा इति वचनाच्चयनमभिनिर्वर्त्यैत्यर्थः

स्यात् । उच्यते । नैतदेवम् । अग्निं चित्वेति हि श्रूयते । अग्निश्चयनेन संस्कृत्य इत्यर्थः । अग्निरिति ज्वलनोऽभिधीयते । न तस्य स्थलस्थापनमात्रमुपकारः । यदि स्थलस्थिते यागो भवति, ततश्चयनेन अग्नेरुपकारोऽस्ति ! तमभिनिर्वर्त्येति स्थलस्थितेऽग्नौ यागमभिनिर्वर्त्येति गम्यते । यावत् स्थलस्थितेऽग्नौ यागो न भवति, न तावदग्निश्चयनेनोपक्रियते । येनाग्निर्यजमानस्योपकरोति, सोऽग्नेरुपकारो न स्थलस्थापनमात्रम् । तस्मात् तत्रापि यागमभिनिर्वर्त्येति गम्यते ॥ ४१ ॥ ॥ सि०॥ सौत्रामण्याद्यङ्गानां स्वकालकर्तव्यताधिकरणम् ॥ १९ ॥ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये चतुर्थस्याध्यायस्य तृतीयः पादः समाप्तः ॥ ४ ॥ ३ ॥

अथ चतुर्थे अध्याये चतुर्थः पादः ॥ ४ ॥ ४ ॥

## प्रकरणशब्दसामान्याच्चोदनानामनङ्गत्वम् ॥ १ ॥

सन्त्यनुमत्यादीन्यैष्टिकानि कर्माणि । मह्यादयः पशवः, पवित्रादयः सोमाः, वाल्मीकवपायां होम इत्येवमादीनि दार्विहोमिकानि । तथा, यष्ठौहीं दीव्यति, राजन्यं जिनाति, शौनःशेफमाख्यापयति अभिषिच्यते इति । एतेषां सन्निधौ श्रूयते । राजसूयेन स्वाराज्यकामो यजेतेति । स एष रूपवतां सन्निधावरूपः शब्दः श्रूयमाणः समुदायवाचकः समधिगतः । तत्र सन्देहः । किं सर्वेषामनुमत्यादीनां समुदायस्य राजसूयशब्दो वाचकः, उत केषाञ्चिद्वाचकः केषाञ्चिन्नेति । किं प्राप्तम् । सर्वेषां वाचक इति । कुतः । प्रकरणशब्दसामान्यात् । प्रकरणशब्दः सर्वेषां समानो राजसूयेनेति । राजा तत्र सूयते तस्माद् राजसूयः । राज्ञो वा यज्ञो राजसूयः । तत् प्रकरणसान्निधाने सति, विशेषाभावे च सर्वेषां वाचको भवितुमर्हति । यश्च राजसूयशब्दितस्ततःफलंभवति।तस्मात्सर्वाणिप्रधानानीति॥१॥पूर्व०

## अपि वाऽऽनिज्याः स्युस्ततो विशिष्टत्वात् ॥ २ ॥

अपि वेति पक्षव्यावृत्तिः । या अनिज्यास्ता अङ्गं, यथा विदेवनाऽऽदयः । राजसूयसंज्ञकेन यागेन स्वाराज्यं कुर्य्यादित्युच्यमाने यागेनैव स्वाराज्यं साध्यते, न अयागेन । अयागाश्च विदेवनादयः । तस्मादङ्गं भवेयुरिज्यानां फलवतीनां श्रूयमाणा इति ॥ २ ॥ सि० ॥ राजसूयेज्यानां विदेवनाद्यङ्गकत्वाधिकरणम् ॥ १ ॥

## मध्यस्थं यस्य तन्मध्ये ॥ ३ ॥

राजसूयेऽभिषेचनीयमध्ये पञ्चभिर्दीव्यतीति विदेवनादयः समाम्नाताः । ते किमभिषेचनीयस्याऽङ्गम्, उत कृत्स्नस्य राजसूयस्येति संशयः । उच्यते । मध्यास्नानादभिषेचनीयस्येति । तथा आनन्तर्यमनुग्रहीष्यते इति ॥ ३ ॥ पूर्व० ॥

## सर्वासां वा समत्वाच्चोदनातः स्यान्न हि तस्य प्रकरणं देशार्थमुच्यते मध्ये ॥ ४ ॥

सर्वासां चानुमत्यादीनां चोदनानामङ्गं विदेनादि स्यात् । कुतः । चोदनातः समत्वात् । समाना एता अनुमत्याद्याश्चोदनाः । ताः सर्वाः, फलवत्यश्च प्रधानभूताः । सर्वासामासां प्रकरणम् । न हि अभिषेचनीयस्य केवलस्य । कामादभिषेचनीयस्य प्राप्नुवन्ति । प्रकरणात् सर्वासाम् । प्रकरणं च क्रमाद् बलीयः । तस्मान्नाभिषेचनीयस्य केवलस्येति । अभिषेचनीयस्य तु मध्ये स्थानं विदेवनादीनां, तत्र क्रियमाणाः सर्वासामुपकुर्वन्तीति ॥ ४ ॥ सि० ॥ विदेवनस्य कृत्स्नराजसूयाङ्गताधिकरणम् ॥ २ ॥

## प्रकरणाविभागे च विप्रतिषिद्धं ह्युभयम् ॥ ५ ॥

राजसूये उपसदः प्रकृत्य श्रूयते । पुरस्तादुपसदां सौम्येन प्रचरन्ति, अन्तरा त्वाष्ट्रेण, उपरिष्टाद् वैष्णवेनेति । तत्र सन्देहः । किमुपसदङ्गं सौम्यादयः, उत उपसत्काला इति । उपसदङ्गमिति ब्रूमः । कुतः उपसत्संयोगस्य श्रुतत्वात् । कालविधौ सति लक्षणा स्यात् । तस्मादुपसदङ्गमिति ॥ ननु कालवदङ्गं भविष्यति । तथा सत्युभयमनुगृह्यते । उपसत्संयोगश्च । पुरस्तादिति च कालाभिधानम् । उपसच्छब्दसंयोगादुपसदङ्गता भविष्यति । पुरस्ताच्छब्दसामर्थ्याच्च पूर्वादिषु प्रयोग इति । उच्यते । विप्रतिषिद्धं ह्युभयं, न शक्नोत्युपसदामित्येष शब्दः सौम्यादींश्च विशेष्टुमेकस्मिन् वाक्ये, पूर्वादींश्च । भिद्येत हि तथा वाक्यम् । तस्मान्न बलवदङ्गम् ॥ ५ ॥ पूर्व०

## अपि वा कालमात्रं स्याददर्शनाद्विशेषस्य ॥ ६ ॥

अपि वेति पक्षव्यावृत्तिः । कालमात्रं स्यात् । नाङ्गप्रयोजनसम्बन्धः । कुतः । अदर्शनाद्विशेषस्य । नान्यैः कालाभिधानैरस्य कश्चिद्

विशेषो लक्ष्यते । आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीत्येवमादिभिः । अत्रापि हि सौम्यादयो विहिता, उपसदोऽपि । इदमानुपूर्व्यमविहितम् । तद् विधीयते । तस्मात् कालमात्रमिति ॥ ६ ॥ ॥ सि० ॥ ॥ सौम्यादीनामु. सत्कालकत्वाधिकरणम् ॥ ३ ॥

## फलवत्वोक्तहेतुत्वादितरस्य प्रधानं स्यात् ॥ ७ ॥

वैश्वदेवीं साङ्ग्रहायणीं निर्वपेद् ग्रामकाम इति । तत्र आमनहोमाः श्रूयन्ते । आमनस्य इति तिस्र आहुतीर्जुहोतीति । अत्र सन्देहः । किं समप्रधानभूता आमनहोमाः साङ्ग्रहायणीष्ट्या, उताङ्गं तस्या इति । किं प्राप्तम् । समप्रधानभूता इति । कुतः । तुल्यहेतुत्वादितरस्य । तुल्यं हि यजिमत्त्वम् । नन्वफला होमाः । उच्यते । ग्रामकाम इत्यत्रानुषज्ज्यते । तस्मात् समप्रधानभूता इति ॥ एवं प्राप्ते ब्रूमः । फलवद् वा उक्तहेतुत्वादितरस्य प्रधानं स्यात् । न चैतदस्ति । समप्रधानभूता होमा इष्ट्या इति । फलवद् हि अफलस्य प्रधानम् । फलवती चेष्टिः । अफला होमाः ॥ ननूक्तम्— अनुषङ्गो भविष्यतीति । उच्यते । नानुषङ्गः प्राप्नोति । कुतः । व्यवायात् । तदुक्तं, व्यवायान्नानुषज्ज्येतेति । केन व्यवायः । परिधिमन्त्रैः । उग्रोऽस्युग्रस्त्वं देवेष्वध्युग्रोऽहं सजातेषु भूयासं प्रियः सजातानामुग्रश्चेत्ता वसुविदित्येवमादिभिः । एताननुक्रम्य, आमनस्येति तिस्र आहुतीर्जुहोतीत्यामनन्ति । तस्मात् साङ्ग्रहायण्या अङ्गम् आमनहोमा इति ॥ ७ ॥ आमनहोमानां सांग्रहायण्यङ्गताधिकरणम् ॥ ४ ॥

## दधिग्रहो नैमित्तिकः श्रुतिसंयोगात् ॥ ८ ॥

ज्योतिष्टोमे श्रूयते– यां वै काश्चिदध्वर्युश्च यजमानश्च देवतामन्तरितस्तस्या आवृश्चेत, यत् प्राजापत्यं दधिग्रहं गृह्णाति, शमयत्येवैनामिति । तत्र सन्देहः । किं नित्यो दधिग्रहः, उत नैमित्तिक इति । किं प्राप्तम् । दधिग्रहो नैमित्तिकः स्यात् । श्रुतिसंयोगात् । देवतान्तराये निमित्ते श्रूयते । न च नित्योऽन्तरायः । तस्मान्नैमित्तिक इति ॥ ८ ॥

## नित्यश्च ज्येष्ठशब्दात् ॥ ९ ॥

यदुक्तं, नैमित्तिक इति तद् गृह्यते, किन्तु नित्यश्च । कुतः । ज्येष्ठशब्दात् । ज्येष्ठशब्दो भवति । ज्येष्ठो वा एष ग्रहाणां यस्यैष गृह्यते,

ज्यैष्ठ्यमेव गच्छतीति । ज्येष्ठशब्दश्च प्राधान्ये प्राथम्ये वा स्यात्। एष प्रथमो, न प्रधानम् । यदि नित्यः, एवं प्रशस्यत्वादुपपद्यते। न जातु चलाचलं हि प्रशंसन्ति । तस्मान्नित्यश्च नैमित्तिकश्चेति विनापि निमित्तेन ग्रहीतव्यो, निमित्तेनापि पुनरिति ॥ ९ ॥ ॥ पूर्व० ॥

**सार्वरूप्याच्च ॥ १० ॥**

सर्वरूपता च श्रूयते । सर्वेषां वा एतद्देवानां रूपं यदेष ग्रहो यस्य एष गृह्यते सर्वाण्येवैनं रूपाणि पशूनामुपतिष्ठन्ते इति । न हि देवतारूपमस्माकं किञ्चिदन्यत् प्रत्यक्षम्, अन्यदतो नित्यत्वात् । तस्मादपि नित्यश्च नैमित्तिकश्चेति ॥ १० ॥ ॥ युक्तिः ॥

**नित्यो वा स्यादर्थवादस्तयोः कर्मण्यसम्बन्धा-द्भङ्गित्वाच्चान्तरायस्य ॥ ११ ॥**

तदुक्तं, नित्यो नैमित्तिकश्चेति । तत्र नित्य एव स्यात् । ज्येष्ठशब्दात् सार्वरूप्याच्च । यदुक्तं, देवतान्तराये निमित्ते श्रूयते इति । न देवतान्तरायो निमित्तत्वेन गम्यते । तयोरध्वर्य्युयजमानयोः कर्मण्यऽन्तरायेण असम्बन्धात् । न ह्येतच्छ्रूयते, अध्वर्य्युणा देवता अन्तरितव्या यजमानेन वेति । अनित्यो हि अन्तरायः । न चैवंशब्दोऽस्ति अन्तराये सति दधिग्रहो ग्रहीतव्य इति । विनैव संयोगेन दधिग्रहस्य ग्रहणम् । अन्तरायसमाधानं त्वस्य प्रयोजनमिति । तदेतन्नित्यवद् ग्रहणम्, अनित्यं प्रयोजनम् । नित्यं गृह्णीयाद् अनित्यमन्तरायं समाधातुमिति नावकल्पते । तत्र प्रयोजने अनित्यत्वाद् ग्रहणे नित्यवच्छ्रुतिर्बाध्येत । अर्थवादत्वे तु न बाध्यते । न हि तद् अन्तरायं समाधातुं गृह्यते । अन्यदेव प्रयोजनमस्यास्तीति प्रशंसितुमभिधीयते । दधिग्रहस्य तु सोमाङ्गतैव प्रयोजनमिति ॥ भङ्गित्वाच्चान्तरायस्य । भङ्गी चान्तरायः अनित्यो नित्यप्रशंसार्थं सङ्कीर्त्यते । तस्मान्नैष दोषः । नित्य एव दधिग्रह इति ॥ ११ ॥ सि० ॥ ॥ दधिग्रहस्य नित्यताधिकरणम् ॥ ५ ॥

**वैश्वानरश्च नित्यः स्यान्नित्यैः समानसंख्यत्वात् ॥ १२ ॥**

अस्ति अग्निः, य एवं विद्वानग्निश्चिनुते इति । तत्र श्रूयते । यो वै संवत्सरमुख्यमभृत्वाग्निश्चिनुते, यथा सामिगर्भो विपद्यते तादृगेव तदार्त्तिमार्च्छेत् । वैश्वानरं द्वादशकपालं पुरस्तान्निर्वपेत्।

संवत्सरो वाग्निर्वैश्वानरो यथा संवत्सरमाप्त्वा काले आगते विजायते । एवमेव संवत्सरमाप्त्वा काले आगतेऽग्निश्चिनुते । नार्त्तिमृच्छेदिति । एषा वाग्नेः प्रिया तनूर्यद् वैश्वानरः । प्रियामेवास्य तनूमवरुन्धे इति । तत्र सन्देहः । किं नित्यो वैश्वानरः, अथ नैमित्तिक इति । किं प्राप्तम् । अत्रापि नित्य एव अर्थवादः । उख्यस्य संवत्सराभरणेन कृतो दोषो वैश्वानरेण विहन्यते इति । नित्यश्चास्य समानसङ्ख्यत्वं भवति । त्रीण्येतानि हवींषि भवन्ति । त्रय इमे लोका एषां लोकानामारोहायेति, लोकानां हविषां सामान्यं नास्ति । यदि यथा लोका नित्यास्त्रय एवमिमानि हवींषि नित्यानि त्रीणि । एवं लोकैः संस्तवो घटते । तस्मान्नित्यो वैश्वानर इति ॥१२॥ पूर्व० ॥

## पक्षे वोत्पन्नसंयोगात् ॥ १३ ॥

उत्पन्नस्य निमित्ते उख्याभरणे निर्घातेन संयोगः । नाऽसंयुक्तस्योत्पन्नस्य दोषनिर्घातप्रयोजनता । तस्मादिह न दधिग्रहवद् विरोधोऽस्ति । तेन नार्थवादो, नैमित्तिक इति ॥ अथ यदुक्तं, लोकैः समानसङ्ख्यत्वं नित्यत्वादुपपद्यते, नान्यथेति । तत्र ब्रूमः । त्रित्वाल्लोकानां हविषां च सामान्यादर्थवादो भविष्यतीति ॥ १३ ॥ ॥ सिद्धान्तः ॥

वैश्वानरस्य नैमित्तिकत्वाधिकरणम् ॥ ६ ॥

## षट्चितिः पूर्ववत्त्वात् ॥ १४ ॥

अस्ति अग्निः, य एवं विद्वानग्निश्चिनुते इति । तत्र श्रूयते, संवत्सरो वा एनं प्रतिष्ठायै नुदति योऽग्निश्चित्वा न प्रतितिष्ठति । पञ्च पूर्वाश्चितयो भवन्ति । अथ षष्ठीश्चितिं चिनुते इति । तत्र सन्देह । किं योऽयं नित्य एवाग्निः स एवायं षट्चितिक उच्यते, उत एकचितिको नैमित्तिक इति । किं प्राप्तम् । तस्मिन्नेव नित्ये अग्नौ षष्ठी चितिरेषा विधीयते । नित्यायामेव षष्ठ्यामेषोऽर्थवादः । योऽपि न प्रतिष्ठार्हः, सोऽप्यनया षष्ठ्या चित्या प्रतिष्ठातुमर्हतीति चितिप्रशंसा । किमर्थमेवं वर्ण्यते । षष्ठीशब्दश्रवणात् । षण्णां हि पूरणी षष्ठी । एकस्यां हि चितौ षष्ठीशब्दो न सामञ्जस्येन स्यात् । तस्मात् षट्चितिकोऽग्निर्नित्य इति ॥ १४ ॥ ॥ पूर्व० ॥

## ताभिश्च तुल्यसङ्ख्यानात् ॥ १५ ॥

ताभिश्च पूर्वाभिरस्यास्तुल्यवत् प्रसङ्ख्यानं भवति । कथम् ।

इयं वाव प्रथमा चितिः, ओषधयः पुरीषम् । अन्तरिक्षं वाव द्वितीया चितिः, वयांसि पुरीषम् । असौ वाव तृतीया चितिः, नक्षत्राणि पुरीषम् । यज्ञो वाव चतुर्थी चितिः, दक्षिणा पुरीषम् । यजमानो वाव पञ्चमी चितिः, प्रजाः पुरीषम् । संवत्सरो वाव षष्ठी चितिः, ऋतवः पुरीषमिति । तुल्यानां च तुल्यवद् अनुक्रमणं भवति । यथा, देवा ऋषयो गन्धर्वास्तेऽन्यत आसन् । असुरा रक्षांसि पिशाचाः तेऽन्यत आसन्निति । तुल्यवच्चामूषां चितीनामनुक्रमणमनया षष्ठ्या। तस्मादेतया, तत्तुल्यया भवितव्यम् । यदि च यस्मिन्नेव क्रतौ तास्तस्मिन्नेवैषा, तत एताभिस्तुल्या । तस्माद् अपि स एव नित्योऽग्निः षट्चितिक इति ॥ १५ ॥

## अर्थवादोपपत्तेश्च ॥ १६ ॥

अर्थवादश्च भवति, षट् चितयो भवन्ति, षट् पुरीषाणि, तानि द्वादश सम्पद्यन्ते, द्वादश मासाः संवत्सरः, संवत्सर एव प्रतितिष्ठतीति । तदेकचितिके अग्नौ न सामञ्जस्येन वचनं भवति । तस्मान्नित्य एव षट्चितिकः ॥ १६ ॥ ॥ युक्तिः ॥

## एकचितिर्वा स्यादपवृक्ते हि चोद्यते निमित्तेन॥१७॥

एकचितिर्वा नैमित्तिकः स्यात् । कुतः । अपवृक्ते हि यागे चोद्यते, अप्रतिष्ठया निमित्तेन। यो न प्रतितिष्ठति तस्यैषा चितिरुच्यते नैमित्तिकी । सा न नित्या भवितुमर्हति ॥ अपि चापवृक्ते यागे चोद्यते सा, न वर्त्तमाने भवितुमर्हति। ननु चित्वेति चयने निर्वृत्ते, न यागे । उच्यते । नैतत् पदार्थे निर्वृत्ते चित्वेति । किं तर्हि । वाक्यार्थो अग्निं चित्वेति अग्नेश्चयनेनार्थमभिनिर्वर्त्येति । कृते च यागे चयनेन अग्नेरर्थो निर्वर्त्तितो भवति, नान्यथा । षष्ठीशब्दश्च, पञ्च पूर्वाश्चितय उक्तास्ता अपेक्ष्यावकल्पिष्यते । तस्मान्निर्वृत्ते यागे इत्युच्यते । तस्माद् वचनादेकचितिरग्निः ॥ १७ ॥ ॥ सि० ॥

## विप्रतिषेधात्ताभिः समानसङ्ख्यत्वम् ॥ १८ ॥

द्वयोः सूत्रयोरिदमुत्तरं, ताभिश्च तुल्यसङ्ख्यानाद् अर्थवादोपपत्तेश्चेति । ताभिर्नित्याभिः समानसङ्ख्यत्वं भविष्यति । अर्थवादश्चोपपत्स्यते । पञ्च पूर्वाश्चितयो भवन्ति, याभिरसौ चितिभिर्न प्रतितिष्ठते, अथेयं षष्ठी प्रतिष्ठार्थमिति । ताश्च सपुरीषा अपेक्ष्य द्वादशत्वेन

संस्तवो भविष्यति । विप्रतिषेधादेकस्य षट्सङ्ख्याया द्वादशसङ्ख्यायाश्चेति । अतुल्यानामपि तुल्यवद् अनुक्रमणं भवति । यदा, देवा मनुष्याः पितरस्तेऽन्यत आसन्निति ॥१८॥आ०नि०॥षष्ठ्याश्रितेनैमित्तिकत्वाधिकरणम् ॥ ७ ॥

## पितृयज्ञः स्वकालत्वादनङ्गं स्यात् ॥ १९ ॥

अस्ति आमावास्ये कर्मणि पितृयज्ञ । अमावास्यायामपराह्णे पिण्डपितृयज्ञेन चरन्तीति । तत्र संशयः । किम् आमावास्यस्य कर्मणः पिण्डपितृयज्ञोऽङ्गम्, उत अनङ्गमिति । किं प्राप्तम् । अङ्गं, फलवत्सन्निधानान्निष्क्रयवचनाच्च ॥ आह । ननु फलवत्सन्निधावफलं तदङ्गं भवति । फलवच्चेदं कल्प्येत स्वर्गेणेति । उच्यते । सत्यम् । अमावास्ययैकवाक्यत्वान्न शक्यः स्वर्गः कल्पयितुमिति । आह । कालवचनत्वान्न कर्मणैकवाक्यत्वं सम्भवतीति । उच्यते । लक्षणयापि तावत् कर्मैकवाक्यता सम्भवति । स्वर्गे कल्प्ये न लक्षणा, न श्रुतिः । एवञ्चामनन्ति, यत् पितृभ्यः पूर्वेद्युः करोति, पितृभ्य एतद् यज्ञं निष्क्रीय यजमानो देवेभ्यः प्रतनुते इति । अमावास्यां प्रति निष्क्रतुं च श्रूयते । तस्मात् तदङ्गभूतमिति ॥ एवं प्राप्ते ब्रूमः । पितृयज्ञः स्वकालत्वादनङ्गं स्यात् । अनङ्गभूतः पिण्डपितृयज्ञः । कस्मात् । स्वकालत्वात् । स्वशब्दाभिहितेन कालेन अस्य सम्बन्धो, न कर्मणा लक्षितेनेति । यथा, दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति । यथा, तदेतत् पुरस्तादुपसदां सौम्येन चरन्तीति । अत्र काले एवायं मुख्यः शब्दो, न कर्मणि । कर्मणि लक्षणा । श्रुतिश्च लक्षणाया बलीयसी । यच्चोक्तं लक्षणया कर्मैकवाक्यता भविष्यतीति । तच्च न । कस्मात् । अनुवादे हि लक्षणा न्याय्या, न विधौ । विधिश्चायम् । तस्मान्नामावास्याकर्म्मणा सम्बन्धः एकस्मिन् काले द्वे कर्म्मणी परस्परेणासम्बद्धे इति॥१९॥सि०

## तुल्यवच्च प्रसङ्ख्यानात् ॥ २० ॥

तुल्यवच्चान्यैः प्रधानैः प्रसङ्ख्यायते । चत्वारो वै महायज्ञाः—अग्निहोत्रं, दर्शपूर्णमासौ, ज्योतिष्टोमः, पिण्डपितृयज्ञ इति महायज्ञैस्तुल्यवत् प्रसङ्ख्यायते । काऽस्य महायज्ञता स्यात् । अन्यतः फलवत्तायाः । तस्मादनङ्गम् ॥ २० ॥

## प्रतिषिद्धे च दर्शनात् ॥ २१ ॥

इतश्चाऽनङ्गम् । प्रतिषिद्धे आमावास्ये पिण्डपितृयज्ञं दर्शयति। पौर्णमासीमेव यजेत भ्रातृव्यवान्, नामावास्यां, हत्वा भ्रातृव्यम् अमावास्यया यजेत, पिण्डपितृयज्ञेनैव अमावास्यायां प्रीणातीति। असत्याममावास्यायां पिण्डपितृयज्ञं दर्शयति । तदनङ्गत्वे उपपद्यते। तस्मादपि नाङ्गं पिण्डपितृयज्ञ इति ॥

किं प्रयोजनं चिन्तायाः। यदि पौर्णमास्यामाधानं, ततोऽनन्तरायाममावास्यायां न क्रियते, यथा पूर्वपक्षः । यथा तर्हि सिद्धान्तस्तथा कर्त्तव्यः । इदमपरं प्रयोजनम् । कुण्डपायिनामयने मासमग्निहोत्रं जुहोति, मासं दर्शपूर्णमासाभ्यां यजेतेति । यथा पूर्वः पक्षस्तथा कर्त्तव्यः पिण्डपितृयज्ञः । यथा सिद्धान्तस्तथा न कर्त्तव्य इति। श्लोकमपि उदाहरन्ति—

आधानं पौर्णमास्यां चेद् वृत्ते दर्शे करिष्यते ।
अनङ्गं पितृयज्ञश्चेत् तत्रैव न करिष्यते, इति ॥ २१ ॥ ॥ युक्तिः॥ पिण्डपितृयज्ञस्यानङ्गताधिकरणम् ॥ ८ ॥

## पश्वङ्गं रशना स्यात्तदागमे विधानात् ॥ २२ ॥

ज्योतिष्टोमे श्रूयते, आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोतीति । तत्र संशयः। किं पश्वङ्गं रशना उत यूपाङ्गमिति । किं प्राप्तम् । पश्वङ्गम् । कुतः । तदागमे विधानात् । पश्वागमे हि विधीयते । पशुना अस्याः सम्बन्ध उत्पत्तिवाक्ये श्रूयते, परिव्याणं कृत्वा उपाकरोति पशुं नान्यथेति । एवं श्रुतिर्भवति । कालवचने लक्षणा स्यात् । परिव्याणेन कालो लक्ष्येतेति ॥ २२ ॥ ॥ पूर्व० ॥

## यूपाङ्गं वा तत्संस्कारात् ॥ २३ ॥

ज्योतिष्टोमे प्रत्यक्षो हि यूपस्य संस्कारः । रशना हि या च यावतीं च द्रढिम्नो मात्रां यूपस्य सञ्जनयति, द्रढिम्ना च प्रयोजनं यूपस्य । तस्माद् यूपस्यैव द्रढिम्ने रशना स्यात् । द्वितीया च विभक्तिस्तत्प्राधान्ये एव भवति । रशनायां च तृतीया । तृतीया च गुणत्वे तस्याः । तस्माद् यूपाङ्गम् । यत्तु— तदागमे विधानादित्युक्तं, तत्परिहर्त्तव्यम् । उच्यते। तदागमे विधानं वाक्यम् द्वितीया च विभक्तिः । श्रुतिः प्रत्यक्षं च, वाक्यं बाधेयातामिति । यत्तु लक्षणेति।

श्रुत्यसम्भवे लक्षणापि न्याय्यैव ॥ २३ ॥ सि० ॥

अर्थवादश्च तदर्थवत् ॥ २४ ॥

एवञ्च मन्त्रार्थवादोऽर्थवान् भविष्यति । युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्त इति । तस्माद् यूपाङ्गं रशनेति ॥ किं प्रयोजनं चिन्तायाः । अग्नौ श्रूयते । एकयूपे एकादश पशवो नियोज्या इति । प्रतिपशु रशना कार्य्या । यदि पूर्वः पक्षः । सिद्धान्ते द्वैरशन्यमेव । श्लोकमप्युदाहरन्ति ॥ पश्वङ्गं रशना चेद् यद्येकस्मिन् बहून् नियुञ्जीत * प्रतिपशु रशना कार्या यूपे चेद् द्वैरशन्यं स्याद्, इति ॥ २४ ॥ ॥ युक्तिः ॥ रशनाया यूपाङ्गताऽधिकरणम् ॥ ९ ॥

स्वरुश्चाप्येकदेशत्वात् ॥ २५ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः सोमाङ्गभूतो यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र श्रूयते । स्वरुणा स्वधितिना च पशुमनक्तीति । तत्र सन्देहः । किं यूपाङ्गं स्वरुरुत पश्वङ्गमिति । किं प्राप्तम् । यूपाङ्गमिति ब्रूमः । कुतः । एकदेशत्वात् । एकदेशः स्वरुर्यूपस्येति श्रूयते । यूपस्य स्वरुं करोतीति । स्वरुमन्तं यूपं कुर्यादित्यर्थः । एवं स यूपो भवतीति । यथा चषालम् ॥ २५ ॥ पूर्व० ॥

निष्क्रयश्च तदङ्गवत् ॥ २६ ॥

यूपाङ्गमिव स्वरुं निष्क्रयवादो दर्शयति । अपश्यन् ह स्म वै पुरा ऋषयो ये यूपं प्रापयन्ति, सम्भज्य स्रुवन्ते मन्यन्ते, यज्ञवैशसाय वा इदं कर्मेति ते प्रस्तरं स्रुवनिष्क्रयम् अपश्यन्. यूपस्य स्वरुम् अयज्ञवैशसायेति निष्क्रयश्रवणात् तदङ्गता विज्ञायते । तस्माद् यूपाङ्गमिति ॥ २६ ॥ ॥ युक्तिः ॥

पश्वङ्गं वार्थकर्मत्वात् ॥ २७ ॥

पश्वङ्गं वा । तस्य हि अञ्जनार्थेन स्वरुणा प्रयोजनम् । तथा हि श्रूयते । स्वरुणा पशुमनक्तीति । तदञ्जनं पशोः, स्वरोरुत्पत्तिं प्रयोजयति । यदि तदर्थ एषः स्वरुस्ततो दृष्टं प्रयोजनम् । अथ यूपार्थः, अदृष्टं प्रयोजनं ततः कल्प्यम् । तस्मात् पश्वङ्गमिति ॥ २७ ॥ ॥ सि० ॥

भक्त्या निष्क्रयवादः स्यात् ॥ २८ ॥

कया भक्त्या । एवमाह । यूपः किलाग्नौ प्रक्षेप्तव्यः । यत् स्वरुः प्रक्षिप्यते । तेन यूपः प्रक्षिप्यते इति । स एष निष्क्रय इव भवति। अन्यया भक्त्या स्तुतिरिति ॥ किं भवति प्रयोजनम् । एकयूपे एकादश पशवो यदा नियुज्यन्ते, तदैकस्यैव पशोः समञ्जनम् । पूर्वस्मिन् पक्षे । सर्वेषां सिद्धान्ते । श्लोकश्च भवति— स्वरुर्यूपाङ्गमिति चेदेकस्यैव समञ्जनम् * बहूनामेकयूपत्वे सर्वेषां तु समञ्जनम्, इति ॥ २८ ॥ ॥ आ० नि० ॥ स्वरोः पश्वङ्गताऽधिकरणम् ॥ १० ॥

## दर्शपूर्णमासयोरिज्याः प्रधानान्यविशेषात् ॥ २९ ॥

स्तो दर्शपूर्णमासौ । तत्र श्रूयन्ते आग्नेयाग्नीषोमीयोपांशुयाजैन्द्राग्नसान्नाय्ययागाः । तथा, अघारावाज्यभागौ, प्रयाजानुयाजाः पत्नीसंयाजाः, समिष्टयजुः, स्विष्टकृदिति । तत्र सन्देहः । किं सर्वे यागाः प्रधानभूताः, उत केचिद् गुणभूता इति । किं प्राप्तम् । दर्शपूर्णमासयोर्यावत्य इज्यास्ताः सर्वाः प्रधानभूता इति । यजेत स्वर्गकाम इत्यविशेषेण यागेभ्यः फलं श्रूयते । फलवच्च प्रधानम् । सर्वे चामी यागाः । तस्मात् सर्वे प्रधानभूता इति ॥ २९ ॥ पूर्व० ॥

## अपि वाङ्गानि कानिचिद् येष्वङ्गत्वेन संस्तुतिः सामान्यो ह्यभिसंस्तवः ॥ ३० ॥

अपि वा कानिचिदङ्गानि भवेयुः । कानि पुनस्तानि । येष्वङ्गत्वेन संस्तुतिः । यथा अभीषू वा एतौ यज्ञस्य यदाघारौ, चक्षुषी वा एतौ यज्ञस्य यदाज्यभागौ । यत् प्रयाजानुयाजाश्चेज्यन्ते वर्म्म वा एतद् यज्ञस्य क्रियते, वर्म्म वा यजमानस्य भ्रातृव्यस्याभिभूत्यै इति । अभीषू रथस्याङ्गं, चक्षुषी चक्षुष्मतः, वर्म्म वर्म्मवतः । सामान्यो हि अभिसंस्तवो युक्तः । यदि चाङ्गानि तानि संस्तुतानि, ततः संस्तवोऽर्थवान् भवति । तस्मादङ्गसंस्तुतान्यङ्गानीति ॥ ३० ॥ ॥ सि० ॥

## तथा चान्यार्थदर्शनम् ॥ ३१ ॥

एवं च कृत्वाऽन्यार्थदर्शनमुपपन्नं भवति । प्रयाजे प्रयाजे कृष्णलं जुहोतीति । न च प्रयाजान् यजति, न चानुयाजान् यजतीति च ॥ ३१ ॥ ॥ युक्तिः ॥

## अविशिष्टन्तु कारणं प्रधानेषु गुणस्य विद्यमानत्वात् ॥ ३२ ॥

अविशिष्टमेतत् कारणं संस्तवो नाम। आग्नेयादीनामप्यङ्गत्वेन संस्तुतिरस्ति। शिरो वा एतद् यज्ञस्य यदाग्नेयो, हृदयमुपांशुयागः, पादावग्नीषोमीय इति। शिरः शिरस्वतोऽङ्गं, हृदयं हृदयवतः, पादौ पादवत इति सर्वस्यैवाऽङ्गत्वेन संस्तुतिरिति सर्वमेवाऽङ्गं प्राप्नोति। तत् प्रधानं न स्यात्। असति प्रधाने कस्याङ्गम्। तस्मान्नैतदङ्गमिति॥३२

## नानुक्तेऽन्यार्थदर्शनं परार्थत्वात् ॥ ३३ ॥

अथ यदुक्तम् अन्यार्थदर्शनं परार्थत्वाद् न तत्साधकं भवति। परार्थं हि तद् वाक्यं, न दृश्यमानस्य प्रयाजादेः प्रापणार्थम्। तस्मादन्यदस्य प्रमाणमन्वेष्टव्यं, श्रुत्यन्तरं न्यायो वा। तस्मिन्नसति, मृगतृष्णादर्शनमिव तद् भवति। संस्तुतिरप्यसति न्याये असाधिकैव ॥ ३३ ॥ ॥ युक्तिः ॥

## पृथक्त्वे त्वभिधानयोर्निवेशः श्रुतितो व्यपदेशाच्च तत्पुनर्मुख्यलक्षणं यत् फलवत्त्वं, तत्सन्निधावऽसंयुक्तं तदङ्गं स्यादभागित्वात्कारणस्याऽश्रुतश्चान्यसम्बन्धः ॥ ३४ ॥

तुशब्दः पक्षं व्यावर्त्तयति। यदुक्तं, सर्वाणि समप्रधानानीति। नैतदेवम्। दर्शपूर्णमासशब्दवाच्यानि प्रधानानि कर्माणि। कुतः। फलसंयोगात्। दर्शपूर्णमासशब्दकेभ्यः फलं श्रूयते, दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। कानि पुनर्दर्शपूर्णमासशब्दकानि। येषां वचने पौर्णमासीशब्दोऽमावास्याशब्दो वा आग्नेयादीनि तानि। नन्वमावास्याशब्दकानां नैव फलं श्रूयते। उच्यते। पृथक्त्वे समुदाययोर्निवेश एतयोरभिधानयोः। पौर्णमासीति च, अमावास्या इति च। त्रिष्वाग्नेयादिषु यः समुदायस्तत्र पौर्णमासीशब्दः। इतरेष्वऽमावास्याशब्दः। कथं पौर्णमासी अमावास्या इति च द्विशब्दः श्रूयते। द्व्यर्थवद् व्यपदेशाच्च। कथं तद्व्यपदेशः। द्विवचननिर्देशात्। दर्शपूर्णमासाभ्यामिति। एकार्थौ च दर्शामावास्याशब्दौ। कथम्। दर्शो वा एतयोः पूर्वः, पूर्णमास उत्तरस्तयोरथ यत् पूर्णमासं पूर्वमारभते तदयथापूर्वं प्रक्रियते। दर्शपूर्णमासमारभमाणः सरस्वत्यै चरुं निर्वपेत्, सरस्वते द्वादशकपालममावास्या वै सरस्वती, पूर्ण-

मासः सरस्वान् । उभावेतौ यथापूर्वं कल्पयित्वारभते ऋद्ध्यै ऋध्नोत्येवाथो मिथुनत्वायेति । तत्र दर्शशब्देन प्रकृत्या अमावास्याशब्देन ब्रुवन्नेकार्थतां दर्शयति । शक्यते च चन्द्रस्यादर्शनेन अमावास्या दर्श इति लक्षयितुम् । यथा चक्षुषोरभावे सति चक्षुष्मानिति चक्षुश्यौ लक्ष्यते । एतस्माद् व्यपदेशाच्च श्रुतितश्च, लोके श्रवणाद्, एकार्थतामेवाध्यवस्यामः । तत् पुनर्मुख्यलक्षणं यत् फलवत्त्वम् । यदन्यत् तत्सान्निधौ श्रूयते, तत् तदङ्गम् । कथम् । इतिकर्त्तव्यताकाङ्क्षस्य सन्निधौ श्रूयमाणम्, इतिकर्त्तव्यताविशेषणत्वेन परिपूरणसमर्थं तदङ्गं भवितुमर्हति । अकल्प्यमाने वाक्यशेषे फलं कल्पयितव्यं स्यादिति॥ आह । ननु दर्शपूर्णमासफलमेवात्रानुषज्ज्यते । उच्यते । शक्यमनुषक्तुं, किन्तु दर्शपूर्णमासवाक्यं साकाङ्क्षमेव स्यात् । अन्या अस्य इतिकर्त्तव्यता अश्रुता कल्प्येत । एषामपि प्रयाजादीनामन्या कल्प्येत एतदितिकर्त्तव्यता अवगम्यमाना उत्सृज्ज्येत । तेनाऽङ्गत्वं, कारणं भागीति । एषामन्येन फलेन सम्बन्धोऽश्रुतः । तस्मान्न सर्वाणि समप्रधानानि, आधारादीनि गुणकर्माणीति ॥ ३४ ॥ ॥

## गुणाश्च नामसंयुक्ता विधीयन्ते नाङ्गेषूपपद्यन्ते ॥३५॥

नामविशेषसंयुक्ताश्च गुणविशेषा विधीयन्ते । यथा, चतुर्होत्रा पूर्णमासीमभिमृषेत् पञ्चहोत्रा अमावास्यामिति सर्वेषु प्रधानेषु । अस्मिन् समुदाये चतुर्होत्रा, अस्मिन् पञ्चहोत्रा इतिविभागाविज्ञानाच्चेदं नोपपद्येत । भवति चैवँल्लक्षणकं गुणाविधानम् । तस्मादस्मत्पक्ष एवेति । अपि चाङ्गत्वेन आधारादीनां संस्तुतिरुपपन्ना भविष्यति ॥ ३५ ॥ ॥ युक्तिः ॥

## तुल्या च कारणश्रुतिरन्यैरङ्गाङ्गिसम्बन्धः ॥ ३६ ॥

अथ यदुक्तम्— आग्नेयादीनामप्यङ्गत्वेन संस्तुतिरङ्गत्वं ख्यापयेदिति । तत् परिहर्त्तव्यम् ॥ ३६ ॥ ॥ आ० ॥

## उत्पत्तावभिसम्बन्धस्तस्मादङ्गोपदेशः स्यात् ॥ ३७ ॥

नैष दोषः । प्रधानानामप्येषां सतामुत्पत्त्यपेक्षा शिरआदिस्तुतिर्भविष्यतीति । जायमानस्य हि पुरुषस्याग्रे शिरो जायते, मध्ये मध्यं, पश्चात् पादौ । एवमाग्नेयोऽग्रतः, उपांशुयाजो मध्ये, अग्नीषोमीयः पश्चादिति । एतस्मात् सामान्यादेषा स्तुतिरिति ॥३७॥ ॥ आ० नि०॥

## तथा चान्यार्थदर्शनम् ॥ ३८ ॥

चतुर्दश पूर्णमास्यामाहुतयो हूयन्ते, त्रयोदशामावास्यायामिति। इतरथा न चतुर्दश पौर्णमास्यामाहुतयो भवेयुः । न वा अमावास्यायां त्रयोदशेति । तस्मादाग्नेयादीनि प्रधानानि, आघारादीन्यङ्गानीति सिद्धम् ॥ ३८ ॥ ॥ युक्तिः ॥ आघारादीनामङ्गताऽधिकरणम् ॥ ११ ॥

## ज्योतिष्टोमे तुल्यान्यविशिष्टं हि कारणम् ॥ ३९ ॥

अस्ति ज्योतिष्टोमो, ज्योतिष्टोमेन स्वर्गकामो यजेतेति । तत्र दीक्षणीयादयश्च यागा विद्यन्ते, सौत्ये चाहनि सोमयागः । तत्र संदेहः । किमत्र यागमात्रं प्रधानम्, उत सोमयाग इति । किं प्राप्तम् । ज्योतिष्टोमे तुल्यानि सर्वाणि भवेयुः । कुतः । अविशिष्टं हि कारणम् । यागात् फलं श्रूयते । सर्वे चामी यागाः । फलवच्च प्रधानम् । तस्माज्ज्योतिष्टोमे सर्वे यागाः प्रधानमिति ॥ ३९ ॥ पूर्व० ॥

## गुणानान्तूत्पत्तिवाक्येन सम्बन्धात् कारणश्रुतिस्तस्मात् सोमः प्रधानं स्यात् ॥ ४० ॥

गुणानां तु उत्पत्तिवाक्येन सम्बन्धो भवति । केषां गुणानाम् ?। ज्योतिषां स्तोमानाम् । कतमेन उत्पत्तिवाक्येन सम्बन्धो भवति । ज्योतिष्टोमेन स्वर्गकामो यजेतेति ज्योतिष्टोमाद् यागात् स्वर्गः श्रूयते, न यागमात्रात् । यत्र च ज्योतींषि स्तोमाः, स ज्योतिष्टोमः । कस्य ज्योतींषि स्तोमाः । सोमयागस्येति ब्रूमः । एवं हि आम्नायते । कतमानि वा एतानि ज्योतींषि, ये एते तस्य स्तोमास्त्रिवृत्पञ्चदशसप्तदशैकविंशाः। एतानि वा ज्योतींषि । तान्येतस्य स्तोमा इति । सोमयागस्य स्तोमा अङ्गम् । समभिव्याहारात् । ग्रहं वा गृहीत्वा चमसं वा उन्नीय स्तोत्रमुपाकरोतीति, ते च स्तोमास्त्रिवृदादयः । कथम् । त्रिवृद् बहिष्पवमानं, पञ्चदशान्याज्यानीत्येवमादिभिः श्रवणैः ॥ तस्मात् त्रिवृदादिस्तोमकः सोमयागः । स ज्योतिष्टोम इति । यश्च ज्योतिष्टोमस्ततः फलम् । यतश्च फलं तदेव प्रधानमिति । कथं पुनस्त्रिवृदादयो ज्योतींषि । उच्यते । भवन्तु वा ज्योतींषि, मा भूवन्, ज्योतिःशब्देन तावदुक्तानि । वचनमात्रेणाऽपि शब्दो भवति, विशेषतो लक्षणायाम् । अपि च द्योततेर्वा दीप्तिकर्मणो ज्योतिःशब्दं लभन्ते । द्योत्यते हि तैः शब्दैर्द्योतयन्तीति वा-

स्तुत्याम् । तस्मात् सोमयागो ज्योतिष्टोमः । स च प्रधानं, गुणभूता दीक्षणीयादय इति ॥ ४० ॥

## तथा चान्यार्थदर्शनात् ॥ ४१ ॥

शिरो वा एतद् यज्ञस्य यद्दीक्षणीया इत्येवमादि च लिङ्गं दृश्यते । तथा गुणाश्च ज्योतिष्टोमविकारे दीक्षणीयादयो दृश्यन्ते । चतुर्विंशतिमानं हिरण्यं दीक्षणीयायां दद्यात् । प्रायणीयायां द्वे चतुर्विंशतिमाने इति तुल्यत्वे न प्रवर्त्तयिष्यन्ते दीक्षणीयादयः । तस्मादऽपि सोमयागः प्रधानमिति ॥ ४१ ॥ सि० ॥ ज्योतिष्टोमे दीक्षणीयादीनामङ्गताधिकरणम् ॥ १२ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥ ४ ॥ समाप्तश्चायमध्यायः ॥ ४ ॥

अथ पञ्चमे अध्याये प्रथमः पादः ॥ ५ ॥ १ ॥

## श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात् ॥ १ ॥

चतुर्थेऽध्याये प्रयोजकाप्रयोजकलक्षणं वृत्तम् । तत्र प्रसमर्त्तव्यम् । इहेदानीं क्रमनियमलक्षणमुच्यते । तत् श्रुत्यर्थपाठप्रवृत्तिकाण्डमुख्यैर्वक्ष्यते । श्रुत्यादीनां च बलाबलम् । आदितस्तु श्रुतिक्रमश्चिन्त्यते । किं यथाश्रुति पदार्थानां क्रम आस्थेयः, उतानियमेनेति । किं प्राप्तम् । एकत्वात् कर्त्तुरनेकत्वाच्च पदार्थानाम्, अवश्यम्भाविनि क्रमे लाघवात् प्रयोगप्रांशुभावाच्चानियम इत्येवं प्राप्ते ब्रूमः ॥ श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वादिति । श्रुतिर्ग्रहणम् अक्षराणां, तन्निमित्तं यस्य क्रमस्य, स साधुः क्रमः । श्रुतिप्रमाणका हि वैदिका अर्थाः । नैषामन्यत् प्रमाणमस्तीत्युक्तम् । किमिहोदाहरणम्? । सत्रे दीक्षाक्रमः ये ऋत्विजस्ते यजमाना इत्युक्त्वा, तेषां दीक्षाक्रमं विधत्ते । अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारम् । ततस्तं प्रतिप्रस्थाता दीक्षयित्वा अर्द्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः । ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति, आग्नीध्रं ब्रह्मणः, प्रतिहर्त्तारमुद्गातुः, अच्छावाकं होतुः । ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति, पोतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः । ततस्तमन्यो ब्राह्मणो दीक्षयति, ब्रह्मचारी वा आचार्यप्रेषित इति । अनिय-

मेन क्रमः कर्त्तव्यो, यथा पूर्वः पक्षः । यथा तर्हि सिद्धान्तः । एष एव क्रमः कर्त्तव्य इति ॥ तत्राह । अन्याय्यं श्रुतिवचनमिति । उच्यते । किमयं न साधुः । न, न साधुरिति ब्रूमः । न्याय्यं तर्हि । न ब्रूमो, न साधुः क्रम इति । किं तर्हि । उक्तस्य पुनर्वचनमन्याय्यमिति। उच्यते । साधोर्वचनं बहुशोऽप्युच्यमानं न्याय्यमेव । असाधोस्तु सकृदप्यन्याय्यम् । आह । सकृद्वचनेन ज्ञातस्य पुनर्वचने न प्रयोजनमस्तीति । उच्यते । भवति अपस्मरणमपि प्रयोजनमित्युक्तम् । वृत्तिकारेण तत् कार्यमिति चेत् । सूत्रकारस्याप्यविशेषो वृत्तिकारेण ॥ प्रथमवर्णकम् ॥ १ ॥

अथ वा अर्थान्तरमेवेदम् । तत्र हि अन्य एव संशयो विचारो निर्णयश्च । श्रुतिप्रमाणको धर्मः, अन्यप्रमाणक इति संशयः । प्रत्यक्षादीनामधिगम्य निमित्तत्वान्न तत्प्रमाणकः, अतीन्द्रियत्वाच्चोदनालक्षण इति विचारः । चोदनालक्षण एवेति निर्णयः । इह तु सिद्धे तत्प्रामाण्ये व्यवहारक्रमस्य साधुत्वावधारणम् ॥ द्वितीयवर्णकम् ॥२॥

अथ वा श्रुतिविचारोऽयम् । किं पदार्थाः कर्त्तव्याः ? इति विधानं, किं वा क्रमो विधीयते इति । अनेकार्थविधानानुपपत्तेः क्रमेऽनुवादः पदार्थानां विधिः । अवदानवाक्येष्विव पदार्थविधानं श्रुत्या, क्रमविधानं वाक्येन । तस्मान्न क्रमो विधीयते इति पूर्वः पक्षः। नन्ववदानवाक्येषु क्रमो विधीयते । सत्यं विधीयते । पाठेन, न श्रुत्या । ये ऋत्विजस्ते यजमाना इति तु, दीक्षायाः प्राप्तत्वात् क्रमविधानार्था श्रुतिरिति सिद्धान्तः । तस्मादपुनरुक्तमिति ॥ १ ॥ तृतीयवर्णकम् ॥ ३ ॥ ॥ क्रमनियमाधिकरणं वर्णकत्रयसहितम् ॥ १ ॥ श्रुतिबलीयस्त्वन्यायः ॥

## अर्थाच्च ॥ २ ॥

किमेष एवोत्सर्गः । सर्वत्र श्रुतिवशेनैव भवितुमर्हतीति । उक्तं हि, चोदनालक्षणोऽर्थो धर्म इति । एवं प्राप्ते ब्रूमः । अर्थाच्च सामर्थ्याच्च क्रमो विधीयते इति । गुणभूतो हि पदार्थानां क्रमो भवति । यश्च यस्य निर्वर्त्यमानस्योपकरोति स तस्य गुणभूतः । यस्मिँश्चाश्रीयमाणे पदार्थ एव न सम्पद्यते, न स गुणभूतः । विनापि तेन न वैगुण्यम् । एवं प्रत्यक्षः क्रमस्य गुणभावो यत्र, तत्रार्थेन स एवाश्र-

यितव्यः । यथा जाते वरं ददाति । जातमञ्जलिना गृह्णाति । जातमभिप्राणितीति । अर्थात् पूर्वमभिप्राणितव्यं, ततोऽञ्जलिना ग्रहीतव्यः, ततो वरो देय इति । तथा विमोकः पूर्वमाम्नातः, पश्चात्तद्योगः। अर्थाद् विपरीतः कार्यः । याज्यानुवाक्ये तु विपर्ययेणाम्नाते विपर्ययेण कर्त्तव्ये । नात्र पाठक्रमो मीयते । यतो देवतोपलक्षणार्थाऽनुवाक्या, प्रदानार्था याज्या । अग्निहोत्रं जुहोतीति पूर्वमाम्नातम् । ओदनं पचतीति पश्चात् । असम्भवात् पूर्वमोदनः पक्तव्यः । प्रैषप्रैषार्थौ तु विपर्ययेण आम्नातौ । तौ च विपर्य्ययेण कर्त्तव्यौ ॥ २ ॥ ॥ क्रमस्य क्वचिदार्थिकत्वाऽधिकरणम् ॥ २ ॥

## अनियमोऽन्यत्र ॥ ३ ॥

अन्यस्मिन् विषये क्रमस्य नियमो नास्ति । यथा दर्शपूर्णमासयोर्याजमानानां प्रयाजानुमन्त्रणादीनां नानाशाखान्तरसमाम्नातानां, वसन्तमृतूनां प्रीणामीत्येवमादीनाम्, एको ममेत्येवमादीनाञ्च ॥ ३ ॥ ॥ क्रमस्य क्वचिदनियमाधिकरणम् ॥ ३ ॥

## क्रमेण वा नियम्येत क्रत्वेकत्वे तद्गुणत्वात् ॥४॥

दर्शपूर्णमासयोराम्नातं— समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजतीति । तत्र संशयः । किमनियतेनैव क्रमेणैषामनुष्ठानम्, उत, यः पाठक्रमः स एव नियम्येतेति । किं प्राप्तम् । नियमकारिणः शास्त्रस्याभावादनियम इति ॥ एवं प्राप्ते ब्रूमः । क्रमेणैव नियम्येतैकस्मिन् क्रताविति । कुतः । तद्गुणत्वात् । तद्गुणत्वं हि गम्यते पदार्थानाम् । यथा, स्नायादनुलिम्पेद् भुञ्जीतेति च क्रमेणानुष्ठानमवगम्यते वाक्यात् पदार्थानाम् । यथा चादृष्टार्थेषूपदिश्यमानेषु कश्चिद् ब्रूयात्— देवाय धूपो देयः; पुष्पाण्यवकरितव्यानि, चन्दनेनानुलेप्तव्यः, उपहारोऽस्मै उपहर्त्तव्यः, एवं कृते देवस्तुष्यतीति । तमन्यः प्रतिब्रूते— नैतदेवं, न प्रथमं धूपो दातव्यः, प्रथमं पुष्पाणि अवकरितव्यानीति । एवं मन्यते, धूपदानस्य प्राथम्यमनेनोक्तमिति । तस्माद् वाचनिक एषाम् एष क्रम इति ॥ ४ ॥ सि० ॥

## अशाब्द इति चेत् स्याद्वाक्यशब्दत्वात् ॥ ५ ॥

इति चेत् पश्यसि, अथैवं गम्यमाने अशाब्द एव क्रमः । कथम्

पदार्थपूर्वको वाक्यार्थः । पदेभ्यश्च पदार्था एवावगम्यन्ते, न क्रमः । स्यादेतदेवं, यदि पदार्थानां समूहस्य श्रवणं प्रत्यायकमर्थस्य स्यात् । न तु समुदायः प्रत्यायक इत्युक्तं, तद्भूतानां क्रियार्थेन समाम्नाय इत्यत्र । तस्मात् क्रमस्य वाचकशब्दाभावाद् व्यामोह एव क्रमोऽवगम्यते । एवञ्चापूर्वासत्तिरनुग्रहीष्यते । इतरथा सापि विप्रकृष्येत घटीयन्त्र इव । दर्शयिष्यति च । हृदयस्याग्रेऽवद्यति, अथ जिह्वायाः, अथ वक्षस इति । यदि नियामकः पाठक्रमस्ततो न विधातव्यमेतत् । नियामके हि पाठक्रमे पाठक्रमादेव प्राप्नुयात् ॥ ५ ॥ ॥ आ० ॥

## अर्थकृते वानुमानं स्यात्, क्रत्वेकत्वे परार्थत्वात् स्वेन त्वर्थेन सम्बन्धस्तस्मात् स्वशब्दमुच्येत ॥ ६ ॥

एकस्मिन् क्रतावेकत्वात् कर्तुरनेकस्मिन् पदार्थेऽर्थकृतत्वात् क्रमस्य । तत्रैष एव क्रमो नियम्येतानुमानेन । कुतः । परार्थत्वाद् वेदस्य । परार्थो हि वेदो यद् यदनेन शक्यते कर्त्तुं तस्मै तस्मै प्रयोजनायैव समाम्नायते । शक्यते च अनेन पदार्थो विधातुं, शक्यते च क्रियाकाले प्रतिपत्तुम् । तस्माद् वेदः पदार्थांश्च विधातुमुपादेयः । क्रियाकाले च प्रतिपत्तुं न शक्यते विशेषः । विधातुमयं समाम्नायते, न प्रतिपत्तुमिति । अगम्यमाने विशेषे उभयार्थमुपादीयत इति गम्यते । प्रतिपत्तुं चानेन क्रमेण शक्यते, नान्येन । अत एव च कृत्वा पाठक्रमापचारे विनष्ट इत्युच्यते । इतरथा हि यद् यस्य प्रयोजनं, तस्मिन् निर्वर्त्तमाने एव किं नष्टं स्यात् । अदृष्टं कल्प्येत तच्चान्याय्यं दृष्टे सति । तस्मात् स्वशब्दः क्रमः । य एव पदार्थानां वाचकः शब्दः, स एव क्रमस्यापि ॥ ६ ॥ आ० नि० ॥

## तथा चान्यार्थदर्शनम् ॥ ७ ॥

एवञ्चान्यार्थं दर्शयति, व्यत्यस्तमृतव्या उपदधाति । व्यत्यस्तं षोडशिनं शंसति । आश्विनो दशमो गृह्यते । तं तृतीयं जुहोतीति । यद्यनियमेनोपधानं शंसनं च व्यत्यस्तवचनमनर्थकं स्यात् । न हि कथञ्चिद्व्यत्यास इति । तथा आश्विनस्य तृतीयस्य होमानुवादो नावकल्प्येत, यदि पाठक्रमेण नियम इति । तथा, अभिचरता प्रतिलोमं होतव्यम् । प्राणानेवास्य प्रतीचः प्रतियौतीति क्वचित् प्रतिलोमं विदधदनुलोमं दर्शयति । तदुपपद्यते यदि पाठक्रमेण प्रयोगः । इतरथा,

सर्वमनुलोमं स्यात्, प्रतिलोमदर्शनं नोपपद्येत । तथा चतुर्थोत्तमयोः प्रतिसमानयतीत्युक्ते सति, अतिहायेडो बर्हिः प्रतिसमानयतीत्युच्यते। तेन बर्हिषश्चतुर्थतां दर्शयति । सा पाठक्रमे नियामकेऽवकल्पते ॥७॥ युक्तिः ॥ क्रमस्य क्वचित् पाठानुसारिताधिकरणम् ॥ ४ ॥ पाठक्रमन्यायः ॥

## प्रवृत्त्या तुल्यकालानां गुणानां तदुपक्रमात् ॥ ८ ॥

वाजपेये सप्तदश प्राजापत्यान् पशूनालभते इति श्रूयते । तेषु पशुषु चोदकप्राप्ताः प्रोक्षणादयो धर्माः । तत्र प्रथमः पदार्थो यतः कुतश्चिदारब्धव्यः । द्वितीयादिषु भवति संशयः । किं तत एव द्वितीयोऽपि पदार्थ आरब्धव्यः, उत द्वितीयादिष्वनियम इति । किं तावत् प्राप्तम् । नियमकारिणः शास्त्रस्याभावादनियम इति ॥

एवं प्राप्ते, ब्रूमः । यतः पूर्व आरब्धस्तत एव द्वितीयादयोऽपि पदार्था आरब्धव्या इति । कुतः एतत् ॥ तदुपक्रमात् । सर्वे हि पदार्थाः प्रधानकालान्न विप्रकष्टव्याः । प्रधानं हि चिकीर्षितम् । कृतं वा तेषां निमित्तम् । सहवचनं हि भवति । पदार्थैः सह प्रधानं कर्त्तव्यमिति । बहुपदार्थसमाम्नानात्त्ववश्यम्भावी विप्रकर्षः । तथापि तु यावद्भिर्नाव्यवहितः शक्यः पदार्थः कर्त्तुं तावद्भिर्व्यवधानमवश्यं कर्त्तव्यं, ततोऽभ्यधिकेन न व्यवधातव्यमिति । यदि द्वितीयं पदार्थमन्यत आरभेत, ततोऽधिकैरपिं व्यवदध्यात् । तथा प्रयोगवचनं बाधेत । ननु तथा सति कश्चिदल्पैर्व्यवहितो भविष्यति । उच्यते । अनुमतानां व्यवधायकानां त्यागेन कश्चिदभ्यधिको गुणो भवतीति । तस्माद् यतः पूर्वपदार्थ आरब्धस्तत एवोत्तर आरम्भणीय इति ॥ ॥ ८ ॥ ॥ सि० ॥

## सर्वमिति चेत् ॥ ९ ॥

इति चेत् पश्यसि, प्रधानाविप्रकर्षेण प्रयोगवचनानुग्रह इति । सर्वं तर्हि गुणकाण्डमेकस्मिन्नपवर्जयितव्यम् । यथा सौर्यादिषु ॥९॥ आ०

## नाकृतत्वात् ॥ १० ॥

नैतदेवम् । सहप्रयोगे एव हि नानुष्ठितः स्यात् ॥१०॥ आ०नि०॥

## क्रत्वन्तरवदिति चेत् ॥ ११ ॥

अथ यदुक्तं, यथा क्रत्वन्तरेषु सौर्यादिष्विति । तद् परिहर्त्तव्यम् ॥ ११ ॥ ॥ आ० ॥

नासमवायात् ॥ १२ ॥

न तेषामर्थात् क्रमः प्राप्नोति, यो नियम्येत । अङ्गाऽऽश्रयो हि नियमो भवितुमर्हति । अनङ्गसमाश्रयस्य स्वयमङ्गता कल्प्येत ॥ १२॥ आ० नि० ॥ क्रमस्य क्वचित् प्रथमप्रवृत्त्यनुसारिताधिकरणम् ॥ ५ ॥ प्रावर्तिकक्रमन्यायः ॥

स्थानाच्चोत्पत्तिसंयोगात् ॥ १३ ॥

एकविंशेन अतिरात्रेण प्रजाकामं याजयेत्, त्रिणवेनौजस्कामं, त्रयस्त्रिंशेन प्रतिष्ठाकाममित्येवमादि श्रूयते तत्र आगमेन सङ्ख्यापूरणमिति वक्ष्यते। तत्रागमे क्रियमाणे, किमानियमजक्रमाः सर्वा ऋच आगमयितव्याः, उत काण्डक्रमेण इति । किं प्राप्तम् । अनियमेनेति। कुतः । अतिरात्रे त्रिनवादिशब्दार्थेनैताः प्राप्नुवन्ति । तत्रैतासां प्राप्नुवतीनां पाठक्रमो नास्तीति । एवं प्राप्ते उच्यते । यदासां समाम्नाये स्थानं, तेनैता अत्र नियम्यन्ते । याः पूर्वं समाम्नातास्ताः पूर्वमेव प्रयोक्तव्याः। आनुपूर्व्यस्य हि दृष्टमेतत् प्रयोजनम् । यदुत्तरस्फुरणं तदपि चिकीर्षितमेवेति । त्रिनवादिशब्दैरतिरात्रे यौगपद्येनासां प्राप्तिः पाठक्रमस्याविषय इत्यधिकरणान्तरमिति भवति मतिः । समाम्नायपाठक्रमादेवात्र नियम इति पुनरुक्तता गम्यते इत्यन्यथा वर्ण्यते—

स्थानाच्चोत्पत्तिसंयोगात् ॥ १३ ॥

साद्यस्के श्रूयते, सह पशूनालभते इति । तत्रैषोऽर्थः समधिगतः। सवनीयकाले त्रयाणामालम्भ इति । अथात्र पाठक्रमात्, किमग्निषोमीयः पूर्वमालब्धव्यः, उत स्थानक्रमात् पूर्वं सवनीय इति । किं प्राप्तम् । पूर्वमग्नीषोमीय इति । कुतः । पाठक्रमात् । एवं प्राप्ते ब्रूमः । सवनीयः पूर्वं, स्थानात् । यदि पूर्वमग्नीषोमीयः स्यात्, सवनीयस्थानं व्याहन्येत । आश्विनं गृहीत्वा त्रिवृता यूपं परिवीयेति । नन्वितरत्रापि पाठक्रमो बाध्येत । बाध्यताम् । तस्य हि प्रतिषेधार्थः सहशब्दः समाम्नातः । अप्रतिषिद्धं चाश्विनग्रहस्थानम् । तन्न बाधितव्यम् ॥ १३ ॥ ॥ क्रमस्य क्वचित् स्थानानुसारिताऽधिकरणम् ॥ ६ ॥

## मुख्यक्रमेण वाङ्गानां तदर्थत्वात् ॥ १४ ॥

सारस्वतौ भवतः । एतद् वै दैव्यं मिथुनमिति श्रूयते । तत्र सन्देहः । किं स्त्रीदेवत्यस्य प्रथमं धर्माः, उत पुंदेवत्यस्येति । नियमकारिणः शास्त्रस्याभावादनियम इति प्राप्ते ब्रूमः । मुख्यक्रमेण वा नियमः स्यादिति स्त्रीदेवत्यस्य हि पूर्वं याज्यानुवाक्ययोः समाम्नानम् । प्रणो देवी सरस्वतीति । तस्मात् स्त्रीदेवत्यस्य पूर्वं प्रदानेन भवितव्यम् । तस्मात् स्त्रीदेवत्यस्य पूर्वं धर्माः कार्याः । तथा हि प्रधानकालता भवत्यङ्गानाम् । इतरथा, यैः पदार्थैर्व्यवधानं सामर्थ्यादनुज्ञातं, तेभ्योऽधिकैरपि व्यवधानं स्यात् ॥ १४ ॥ ॥ अङ्गक्रमस्य मुख्यक्रमानुसारिताधिकरणम् ॥ ७ ॥

## प्रकृतौ तु स्वशब्दत्वाद् यथाक्रमं प्रतीयेत ॥ १५ ॥

दर्शपूर्णमासयोः पूर्वमौषधधर्माः समाम्नाताः, तत आज्यस्य । तत्र सन्देहः । किमग्नीषोमीयधर्माणां मुख्यक्रमेण पूर्वमाज्यस्य धर्माः कर्त्तव्याः, उत यथापाठमिति । मुख्यक्रमानुग्रहेण आज्यस्य पूर्वमिति प्राप्ते ब्रूमः । प्रकृतौ यथापाठं प्रतीयेत । स्वशब्दो हि तेषां पाठक्रमः । सोऽन्यथा क्रियमाणे बाधितः स्यात् । सहत्वस्य पुनरुपसंग्राहकः प्रयोगवचनः स्वक्रमेण पदार्थे सन्निकृष्यमाणे न बाधितो भविष्यति । अपि च पाठक्रमे स्वशब्दः, स्वाध्यायोऽध्येतव्य इति । मुख्यक्रमेण प्रयोगवचनैकवाक्यता सूक्ष्मा ॥ १५ ॥ ॥ अङ्गेषु मुख्यक्रमापेक्षया पाठस्य बलवत्त्वाधिकरणम् ॥ ८ ॥

## मन्त्रतस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मादुत्पत्तिदेशः सः ॥ १६ ॥

दर्शपूर्णमासयोराग्नेयस्य पूर्वं मन्त्रपाठः, उत्तरो ब्राह्मणस्य । तत्र सन्देहः । कतमः पाठो बलीयानिति । उच्यते । अनियमः । नियमकारिणः शास्त्रस्याभावादिति । एवं प्राप्ते ब्रूमः । मन्त्रपाठो बलीयान् । कुतः । प्रयोगरूपसामर्थ्यात् । प्रयोगाय मन्त्रस्य रूपसामर्थ्यम् । तदस्य सामर्थ्यं, येन मन्त्रः प्रयुज्यते । तस्य च प्रयुज्यमानस्य क्रमो दृष्टाय भवति । ननु च ब्राह्मणपाठस्यापि तदेव प्रयोजनम् । उच्यते । उत्पत्तिदेशः सः । अपरमपि तस्य प्रयोजनं कर्मोत्पत्त्यर्थं भविष्यति ॥ १६ ॥ ब्राह्मणपाठान्मन्त्रपाठस्य बलीयस्त्वाधिकरणम् ॥ ९ ॥

## तद्वचनाद्विकृतौ यथाप्रधानं स्यात् ॥ १७ ॥

अस्ति अध्वरकल्पा नामेष्टिः, आग्नावैष्णवमेकादशकपालं निर्वपेत्, सरस्वती आज्यभागा स्याद् बार्हस्पत्यश्चरुरिति । तत्र सन्देहः । किमाग्नेयविकारस्य बार्हस्पत्यस्य पूर्वं धर्माः कार्य्याः । चोदको बलवत्तरः प्रयोगवचनात् ? उत उपांशुयाजविकारस्य प्रयोगवचनो बलवत्तरश्चोदकादिति । किं प्राप्तम् । विकृतौ अस्यां, यथाप्रधानं स्यात् । तद्वचनात् । तेषां साक्षाद्वचनक्रमो विकृतौ तेन सन्निहितानाम् । उपसंहारकः प्रयोगवचनो हि प्रत्यक्षः । तद्धर्माणां चानुमानिकश्चोदकेन हि स प्राप्तः । तस्मात् प्रत्यक्षः प्रयोगवचनो बलवत्तरः । तत्र चोदक आनुमानिको बाध्यते ॥ १७ ॥ पूर्व० ॥

## विप्रतिपत्तौ वा प्रकृत्यन्वयाद्यथाप्रकृति ॥ १८ ॥

मुख्याङ्गक्रमविप्रतिपत्तौ वा, यथा प्रकृतौ तथैव विकृतौ भवितुमर्हतीति । कुतः । प्रकृत्यन्वयात् । यादृशाः प्रकृतौ धर्मास्तादृशा एव विकृतौ भवितुमर्हन्तीति मुख्यक्रमेण क्रियमाणा न प्रकृतिवत् कृताः स्युः । चोदको हि प्रयोगवचनाद् बलवत्तरः । स हि उत्पादयति प्रापयति च । प्रापितान् अभिसमीक्ष्य प्रयोगवचन उपसंहरति । स प्राप्तिपूत्पन्नः प्राप्तिनिमित्तक उत्तरकालं पूर्वप्राप्तं न बाधितुमर्हति चोदकं, प्रत्यक्षोऽपि सन् । बहिरङ्गत्वाद् यथाप्राप्तानेवोपसंहरिष्यति । तस्मात् पूर्वं बार्हस्पत्यस्य धर्माः, तत आज्यस्येति ॥ १८ ॥ सि० ॥

प्रयोगवचनाच्चोदकस्य बलवत्त्वाधिकरणम् ॥ १० ॥

## विकृतिः प्रकृतिधर्मत्वात्तत्काला स्याद्यथाशिष्टम् ॥ १९ ॥

चातुर्मास्येषु साकमेधस्तृतीयं पर्व । तस्यावयवाः, अग्नयेऽनीकवते प्रातरष्टाकपालो, मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुः, मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदनमिति । तत्र सन्देहः । किमेता द्व्यहकाला इष्टयः, उत सद्यस्काला इति । किं प्राप्तम् । विकृतिस्तत्काला भवितुमर्हतीति । यथाशिष्टम् । यथा प्रकृतिरुक्ता, तथा विकृतिः स्यात् । प्रकृतिधर्मा हि सा । तस्माद् या विकृतिः, सा द्व्यहकाला भवितुमर्हतीति ॥ १९ ॥ पूर्व० ॥

## अपि वा क्रमकालसंयुक्ता सद्यः क्रियेत तत्र विधेरनुमानात् प्रकृतिधर्मलोपः स्यात् ॥ २० ॥

अह्नः कालेषु ये पदार्था उच्यन्ते, प्रातर्मध्यन्दिने सायमिति। क्रमेण ते एकस्मिन्नहनीति प्रतीयन्ते । यथा देवदत्तः प्रातरपूपं भक्षयति, मध्यन्दिने विविधमन्नमश्नाति, अपराह्णे मोदकान् भक्षयतीति। एकस्मिन्नहनीति गम्यते । तस्मात् सद्यस्काला एवञ्जातीयका विकृतयः। द्व्यहकाल्यं हि चोदकप्राप्तमानुमानिकं, प्रत्यक्षरूपया सद्यस्कालतया बाध्येत ॥ २० ॥ ॥ सि० ॥

## कालोत्कर्ष इति चेत् ॥ २१ ॥

इति चेत् पश्यसि– प्रातः साङ्गं श्रूयते, तथा मध्यन्दिने सायं चेति। उत्कर्षो भविष्यति। यथैतेषु कालेषु साङ्गम् । न च द्व्यहकालताया बाधः । एकस्याह्नः प्रातरनीकवन्तमुपक्रंस्यते । द्वितीयस्य प्रातर्यक्ष्यते। एवं सान्तपनीया पूर्वेद्युर्मध्यन्दिने उपक्रंस्यते । अपरेद्युर्मध्यन्दिने यक्ष्यते । तथा गृहमेधीये सायमुपक्रमणं पूर्वेद्युः, सायं यागोऽपरेद्युरिति । ननु वाक्यादेकमहर्गम्यते इत्युक्तम् । उच्यते। पदार्थसामर्थ्यजनितो हि वाक्यार्थो भवति। न चात्र पदार्थसामर्थ्यमस्ति, येनैकमहर्गम्येत ॥ २१ ॥ ॥ आ० ॥

## न तत्सम्बन्धात् ॥ २२ ॥

नैतदेवम् । कस्मात् । तत्सम्बन्धात् । एककालसम्बद्धानि प्रधानानि अङ्गैः सह श्रूयन्ते। कथम्। साङ्गं हि प्रधानं प्रातःकाले श्रूयते, तथा मध्यन्दिने सायं च। न अङ्गानि प्रातःकालादिषु । तत्राऽन्यकालेष्वङ्गेष्वन्यकालेषु च प्रधानेषु न साङ्गं तेषु कालेषु कृतं स्यात्। तस्मात् सद्यस्काला एवैता विकृतय इति । अपि च, द्व्यहं साकमेधैरिति श्रूयते। तत् सद्यस्कालासूपपद्यते ॥ २२ ॥ आ० नि० ॥ विकृतौ क्वचित् प्रकृतिधर्मानतिदेशाधिकरणम् ॥ ११ ॥ साकमेधीयन्यायः ॥

## अङ्गानां मुख्यकालत्वाद्यथोक्तमुत्कर्षे स्यात् ॥ २३ ॥

ज्योतिष्टोमे श्रूयते, आग्निमारुतादूर्ध्वम् अनुयाजैश्चरन्तीत्युत्कर्षः। तथाऽग्नीषोमीये पशौ, तिष्ठन्तं पशुं प्रयजन्तीत्यपकर्षः। तत्र सन्देहः। किमुत्कर्षे अनुयाजमात्रमुत्कृष्यते, अपकर्षे च प्रयाजमात्रम् ? उत उत्कर्षेऽनुयाजादि, अपकर्षे च प्रयाजान्तमिति । किं तावत् प्राप्तम्। यावदुक्तमुत्कर्षापकर्षयोः स्यात् । कुतः । अङ्गानां मुख्यकालत्वात्। एवमन्येषां प्रधानकालता भविष्यतीति । तत्र सहत्वस्य प्रापकः प्र-

योगवचनोऽनुग्रहीष्यते ॥ २३ ॥ ॥ पूर्व० ॥

**तदादि वाभिसम्बन्धात्तदन्तमपकर्षे स्यात् ॥ २४ ॥**

तदादि उत्कर्षे, तदन्तमपकर्षे गम्येत । कुतः । अभिसम्बन्धात् । यदनुयाजानां परस्तात् समाम्नायते, तत् प्रधानादन्तरं प्रयोगवचनेन प्राप्तं बाधित्वा पाठसामर्थ्यादनुयाजेभ्यः परस्तात् क्रियते । तथा यस्ततः परः, स ततः परस्तादेवमेक उत्कृष्यमाणः सर्वं गुणकाण्डमुत्कर्षति । तथाऽपकृष्यमाणोऽपकर्षतीति ॥ २४ ॥ ॥ सि० ॥ अनुयाजाद्युत्कर्षप्रयाजान्तापकर्षाधिकरणम् ॥ १२ ॥ तदादितदन्तन्यायः ॥

**प्रवृत्त्या कृतकालानाम् ॥ २५ ॥**

ज्योतिष्टोमे श्रूयते प्रातरनुवाककाले, प्रतिप्रस्थातः सवनीयान् निर्वपस्वेति प्रेष्यतीति सवनीयानां निर्वापकालः । अस्ति च बहिष्पवमाने स्तुते, अग्नीदग्नीन् विहर बर्हिस्तृणीहि पुरोडाशानलङ्कुर्विति । तत्र सन्देहः । किं प्रातरनुवाककाले सवनीयान् निरूप्य प्रचरणीहोमादयः सौमिकाः पदार्थाः, उत पौरोडाशाः प्रागलङ्करणादिति । किं प्राप्तम् । अनियमः । नियमकारिणः शास्त्रस्याभावादित्येवं प्राप्ते ब्रूमः । प्रवृत्त्या कृतकालानाम् । ज्ञातकालानां पदार्थानां प्रवृत्त्या नियमः स्यात् । प्रयुज्यमानमेव हि पूर्वपदार्थमभिनियच्छति । स तस्य परस्तात् समाम्नातः, परस्तात् कर्त्तव्यः । सौमिकस्य तु पदार्थस्य प्रचरणीहोमस्य वचनात् क्रमो बाधितः । अलङ्करणं च बर्हिष्पवमानस्य परस्तात् समाम्नातम् । तस्मात् तस्य पूर्वः पदार्थो निर्वपणादीनामन्तः । तत उत्तरे सौमिकाः पदार्थाः कर्त्तव्या इति ॥ २५ ॥

**शब्दविप्रतिषेधाच्च ॥ २६ ॥**

शब्दश्च विप्रतिषिद्ध्यते । अलङ्कुर्वित्युक्तः प्रोक्षणादीन् प्रतिपद्येत । अस्मत्पक्षे तु, अलङ्कुर्वित्युक्ते अलङ्करणमेव प्रतिपत्स्यते । तत्रालङ्करणे प्राप्तकाले प्राप्तकालवचनो लोडन्तोऽनुग्रहीष्यते । तस्मादत्र प्रावृत्तिकः क्रम इति ॥ २६ ॥ युक्तिः ॥ प्रवृत्त्या प्रोक्षणादीनां सौमिकपूर्वभाविताधिकरणम् ॥ १३ ॥

**असंयोगात्तु वैकृतं तदेवं प्रतिकृष्येत ॥ २७ ॥**

अस्ति दर्शपूर्णमासप्रकृतिके पशावग्नीषोमीये वैकृतं यूपकर्म । तत् प्रतिकृष्यते दीक्षासु यूपं छिनत्तीति । तत् प्रतिकृष्यमाणमर्वा-

चीनान्यप्यग्नीषोमीयप्रणयनादीनि प्रतिकर्षति ? उत नेति संशये। प्रतिकर्षति । सम्बन्धादिति गम्यते ॥ तथा प्राप्ते ब्रूमः । विकृतावभ्यधिकं यत्, तत् प्रतिकृष्यमाणं ततोऽर्वाचीनान्यपि अग्नीषोमीयप्रणयनादीनि न प्रतिकर्ष्टुमर्हति । कथम् । असंयोगात् । पाशुकं यूपकर्म । ततः प्राचीनं सौमिकम् । न तयोः परस्परेण सम्बन्धः । न सौमिकः पदार्थः पाशुकस्योपकारकः पशोर्वा । यदि हि तयोरुपकारकः स्यात्, ततस्तस्योपकुर्वतः क्रमोऽप्यस्य साहाय्यं कुर्वन् गुणभूतः स्यात् । न त्वेतदस्ति । तस्माद् नैषां परस्परेण क्रमे नियमः। अतो यूपमात्रं प्रतिकृष्यते । अपि च यूपमात्रं प्रतिकृष्य कृतार्थे शब्दे सौमिकानां स्वक्रमबाधो न भविष्यतीति ॥ २७ ॥ वैकृतयूपकर्ममात्रापकर्षाधिकरणम् ॥ १४ ॥ यूपकर्मन्यायः ॥

## प्रासङ्गिकं च नोत्कर्षेदसंयोगात् ॥ २८ ॥

ज्योतिष्टोमे श्रूयते, आग्निमारुतादूर्ध्वमनुयाजैश्चरन्तीत्यनुयाजा उत्कृष्यमाणा दाक्षिणाग्निकौ होमौ उत्कर्षन्ति, न ? इति संशयः। सम्बन्धादुत्कर्षन्ति, इति प्राप्ते उच्यते । नैतावुत्क्रष्टुमर्हन्ति ये तयोः स्वे अनुयाजाः, सम्बद्धास्ते । न प्रयुक्ताः परकीयैः । तेषामर्थो निर्वर्त्तित इति । पदार्थानां च क्रमो भवति, न पदार्थप्रयोजनानाम्। यौगपद्येन हि पदार्था उपकुर्वन्तीति वक्ष्यामः । पदार्थानां चोत्पत्तिः क्रमवती । पृथक्शब्दत्वादुत्पत्तेः । न पदार्थप्रयोजनस्य युगपत्प्रयोगवचनेन अभिहितत्वात् । अतोऽनुयाजोत्पत्तेरुत्कर्षिकाया अभावाद् दाक्षिणाग्निकौ होमौ नोत्कृष्येयातामिति । अपि चानुयाजमात्रमुत्कृष्य कृतार्थे शब्दे दाक्षिणाग्निकयोर्होमयोः स्वक्रमबाधो न भविष्यतीति ॥ २८ ॥ दक्षिणाग्निकहोमानपकर्षाधिकरणम् ॥ १५ ॥

## तथाऽपूर्वम् ॥ २९ ॥

दर्शपूर्णमासयोर्वेदिः, हविरभिवासनोत्तरकाले समाम्नाता। साऽमावास्यायां प्रतिकृष्यते । पूर्वेद्युरमावास्यायां वेदिं करोतीति । सा त्वपकृष्यमाणा ततोऽर्वाचीनान् पदार्थानपकर्षति ? नेति संशयः। उच्यते । सम्बन्धात् प्रतिकर्षतीत्येवं प्राप्ते ब्रूमः । तथाऽपूर्वम् । अप्रकृतिपूर्विकायाममावास्यायां वेदिकरणं पूर्वेद्युराम्नातम् । उभयोरपि श्वोभूते हविरभिवासनम् । अभिवासनं कृत्वा अमावास्यायां वेदिं

कर्त्तव्य इति, न श्रुत्यादीनामन्यतमत् कारणमस्ति । तस्मान्नाभिवासनान्ताः प्रतिकृष्टव्या इति । अभिवासने चापकृष्यमाणे हवींषि भस्मीभवेयुः ॥ २९ ॥ ॥ ॥ पुरोडाशाभिवासनान्तस्य दर्शेऽनपकर्षाऽधिकरणम् ॥ १६ ॥

## सान्तपनीया तूत्कर्षेदग्निहोत्रं सवनवद्वैगुण्यात् ॥३०॥

चातुर्मास्येषु साकमेधावयवः सान्तपनीया नाम इष्टिः- मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुं निर्वपतीति । सा दैवान्मानुषाद् वा प्रतिबन्धादुत्कृष्यमाणा अग्निहोत्रमुत्कर्षेन्न वेति संशये । उच्यते । सान्तपनीया तूत्कर्षेदग्निहोत्रं सवनवद् वैगुण्यात् । यदि नोत्कर्षेद् अग्निहोत्रसवनेऽग्निहोत्रकाले उद्धृते अग्नावग्निहोत्रं विगुणं स्यात् । तस्मादुत्कष्टव्यं, सवनवत् । यथा प्रातःसवनं दैवान्मानुषाद् वा प्रतिबन्धादुत्कृष्यमाणं माध्यन्दिनं सवनमुत्कर्षतीति । एवमत्रापि द्रष्टव्यम् ॥ ३० ॥ पूर्व० ॥

## अव्यवायाच ॥ ३१ ॥

एवं सान्तपनीयमग्निहोत्रेण न व्यवहितं भविष्यतीति । तत्र क्रमोऽनुग्रहीष्यते । क्रमभेदे च दोषः श्रूयते। अप वा एतद् यज्ञाच्छिद्यते, यदन्यस्य तन्त्रे विततेऽन्यस्य तन्त्रं प्रतीयते इति ॥ ३१॥ युक्तिः ॥

## असम्बन्धात्तु नोत्कर्षेत् ॥ ३२ ॥

नाग्निहोत्रस्य सान्तपनीया अङ्गं, न सान्तपानीयायां वा अग्निहोत्रम् । तेन नासावग्निहोत्रस्य परस्तात् कर्त्तव्या। अतो नाग्निहोत्रमुत्कष्टव्यम् ॥ ३२ ॥ सि० ॥

## प्रापणाच्च निमित्तस्य ॥ ३३ ॥

प्राप्तं चाग्निहोत्रस्य निमित्तम्। सायं जुहोति, प्रातर्जुहोति, उदिते जुहोति, अनुदिते जुहोति, प्रथमास्तमिते जुहोति, सन्धौ जुहोति, नक्षत्राणि दृष्ट्वा जुहोतीति । तन्नातिक्रमितव्यम् । तस्मादपि नोत्कर्षः । यदुक्तं, वैगुण्यमिति । उत्कर्षेऽपि वैगुण्यं कालान्यत्वात् । अङ्गप्राप्तेर्जघन्यः कालविधिर्बाध्यतामिति चेन्न। कालस्य निमित्तत्वात् । तदपाये अश्रुतमेव सर्वं क्रियेत। निमित्तं चानुपादेयत्वेन श्रवणात् । सप्तमी हि आधारादिष्वसम्भवान्निमित्तसप्तमी द्रष्टव्या ॥ ३३ ॥ युक्तिः ॥

अथ यदुक्तं सवनवदुत्कष्टव्यमिति । तदुच्यते—

**सम्बन्धात् सवनोत्कर्षः ॥ ३४ ॥**

सम्बद्धं हि सवनं सवनेन । एकक्रतुसम्बन्धात्तदुत्कृष्यते ॥ ३४॥ आ० ॥ नि० ॥ सान्तपनीयायाअग्निहोत्रानुत्कर्षकताधिकरणम् ॥१७॥

**षोड़शी चोक्थ्यसंयोगात् ॥ ३५ ॥**

ज्योतिष्टोमे श्रूयते, षोड़शिनं प्रकृत्य, तं पराञ्चमुक्थेभ्यो विगृह्णातीति । यदा दैवान्मानुषाद् वा प्रतिबन्धादुक्थ्यान्युत्कृष्यन्ते, किं तदा षोड़श्युत्कष्टव्यो, नेति भवति संशयः । किं प्राप्तम् । नोत्कष्टव्यः । कुतः । एवं स्तोत्रं स्वस्मिन् काले षोड़शिनः कृतं भविष्यतीति। समयाध्युषिते सूर्ये षोड़शिनस्तोत्रमुपाकरोतीति। तस्मादनुत्कर्ष इति॥

एवं प्राप्ते ब्रूमः । षोड़शी चोत्कष्टव्यः । कस्मात् । उक्थ्यसंयोगात्।उक्थ्यसंयोगो हि षोड़शिनो भवति, तं पराञ्चमुक्थ्येभ्यो विगृह्णातीति । तस्मादुत्कष्टव्यः षोड़शी । यदुक्तं, षोड़शिनस्तोत्रकालेन अवर्जनं भविष्यतीति । उच्यते । स्तोत्रक्रममनुरुद्ध्यमानस्य प्रधानक्रमो विरुद्ध्येत । तस्मान्न स्तोत्रक्रमोऽनुरोद्धव्यः । उभयं न शक्यमनुग्रहीतुम् । ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकरोतीति श्रूयते । तस्मादुत्कष्टव्यः षोड़शीति ॥ ३५ ॥ उक्थ्यानुरोधेन षोडश्युत्कर्षाधिकरणम् ॥ १८ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये पञ्चमस्याध्यायस्य प्रथमः पादः ॥ ५ ॥ १ ॥

अथ पञ्चमे अध्याये द्वितीयः पादः ॥ ५ ॥ २ ॥

**सन्निपाते प्रधानानामेकैकस्य गुणानां सर्वकर्म स्यात् ॥ १ ॥**

वाजपेये, सप्तदश प्राजापत्यान् पशूनालभते इति श्रूयते अग्नीषोमीये च पशौ पशुधर्माः समाम्नाताश्चोदकेन प्राप्ताः। तेषु संशयः। किमेकस्यादरारभ्य धर्मान् सर्वान् कृत्वा द्वितीयस्य पुनरादित उपक्रमितव्याः ? अथ प्रथमस्तावत् सर्वेषां कर्त्तव्यस्ततो द्वितीय इति। किं प्राप्तम् । एकैकस्य सर्वेऽपवर्जयितव्या इति । कुतः । प्रधानासत्तेरनुग्रहाय । इतरथा प्रधानासत्तिर्विप्रकृष्येत । यथा बहुष्वश्वेषु प्रतिगृहीतेषु ये पुरोडाशास्तेषु नैकजातीयानुसमयः, एवमिहापीति ॥ १ ॥ ॥ पूर्व० ॥

## सर्वेषां वैकजातीयं कृतानुपूर्वत्वात् ॥ २ ॥

एकजातीयानुसमयः कर्त्तव्यः । किमेवं भविष्यति ? । सहत्वमनुग्रहीष्यते । तत्सहत्वं श्रूयते । वैश्वदेवीं कृत्वा पशुभिश्चरन्तीति । एकस्मिन् काले पशूनां प्रचारः ॥ नन्वेवं सति पूर्वस्य पदार्थस्योत्तरः पदार्थः पश्वन्तरव्यापारेण व्यवधीयते । नैष दोषः । एवमपि कृतमेव आनुपूर्व्यम् । योऽसौ पश्वन्तरे व्यापारः स एवासौ, न पदार्थान्तरम् । पदार्थान्तरेण व्यवधानं भवति ॥ २ ॥ ॥ सि० ॥

## कारणादभ्यावृत्तिः ॥ ३ ॥

अथ यदुक्तं, बहुषु पुरोडाशेषु नैकजातीयानुसमय इति । तत् परिहर्त्तव्यम् । अत्रोच्यते । युक्तं तत्र, यत् कारणादभ्यावृत्तिः । एकजातीयानुसमये हि क्रियमाणे सहस्रस्याधिश्रयणे कृते प्रथमः शुष्येत् । तस्य च प्रथमं न शक्येत कर्तुम् ॥ ३ ॥ ॥ आ० नि० ॥ वाजपेयपशूनां सर्वेषामेकदोपाकरणादिधर्मानुष्ठानाधिकरणम् ॥ १ ॥ पदार्थानुसमयन्यायः ॥

अथ वा अधिकरणान्तरम् ॥

## कारणादभ्यावृत्तिः ॥ ३ ॥

अनेकसहस्राश्वप्रतिग्रहे तन्त्रानुष्ठानमिति पूर्वः पक्षः । काण्डानुसमयोऽभ्युपेतव्य इति सिद्धान्तः ॥ ३ ॥ ॥ सहस्राश्वप्रतिग्रहणस्थले एकैकस्यैकदा सर्वधर्मानुष्ठानाधिकरणम् ॥२॥ काण्डानुसमयन्यायः॥

## मुष्टिकपालावदानाञ्जनाभ्यञ्जनवपनपावनेषु चैकेन ॥४॥

मुष्ट्यादिषु संशयः । किं मुष्टिना अनुसमयः, उत चतुर्भिर्मुष्टिभिरिति । किं प्राप्तम् । मुष्टिनेति । कुतः । एकमुष्टिनिर्वापो हि एकः पदार्थो, न चतुर्मुष्टिनिर्वापः । कथम् । एकस्मिन् मुष्टौ निरुप्ते यतीभावः पर्यवस्यति । न शक्यं वदितुम् । न किञ्चिन्निरुप्तमिति । न च निरुप्ते निर्वापो न कृतः स्यात् । न च मुष्टिमात्रेण निरुप्तेन न प्रयोजनम् । न हि एकस्मिन्ननिरुप्ते चत्वारः सम्भवन्ति । मुष्टिसमानाधिकरणो हि चतुःशब्दः । तस्मान्मुष्टिना अनुसमयः कार्यः । एवं, कपालानुपदधातीति । तथा, मध्यादवद्यति पूर्वार्द्धादवद्यति । तथा अङ्क्तेऽभ्यङ्क्ते वपति पावयतीति ॥ ४ ॥ पूर्व० ॥

### सर्वाणि त्वेककार्यत्वादेषां तद्गुणत्वात् ॥ ५॥

सर्वाणि तु समाप्यानुसमेयान्येकमुष्टिनिर्वापः पदार्थः। चतुःसंख्यत्वा-न्निर्वापस्य। कथं चतुःसङ्ख्यता। चतुःशब्दस्य निर्वपतिना सम्बन्धात्। एवं सह कर्मणा, अनेकगुणविधानं न्याय्यम्। इतरथा, मुष्टिसम्बन्धे सति वाक्यभेदः प्रसज्ज्येत। अनिर्वापाङ्गं च स्यात्। तथोपधानादि-ष्वपि, अष्टाकपालम् एकादशकपालं निर्वपतीति निर्देशात्। द्विरवद्य-ति त्रिरभ्यङ्क्ते एकविंशत्या पावयतीति सङ्ख्यादीनां क्रियागुणत्वं भवति। तस्मात् समुदायेनानुसमय इति ॥ ५ ॥ ॥ सि० ॥ मुष्टि-कपालादीनां समुदायानुसमयाधिकरणम् ॥ ३ ॥

### संयुक्ते तु प्रक्रमात्तदङ्गं स्यादितरस्य तदर्थत्वात् ॥ ६॥

दर्शपूर्णमासयोः श्रूयते, द्विर्हविषोऽवद्यति इति। तत्र संशयः। किमवदानेनानुसमयः, उतावदानेन प्रदानान्तेनेति। किं प्राप्तम्। अव-दानेनेति ब्रूमः। कुतः। पृथक्पदार्थत्वात्। पृथक्पदार्थो हि अवदानम्। यतीभावस्य पर्यवसानात्। अवद्यतिवचनात्। एवं प्राप्ते ब्रूमः। संयु-क्ते तु प्रक्रमात् तदङ्गं स्यात्। इतरस्य तदर्थत्वात्। नावदानं पृथक् पदार्थः। प्रदानस्य स उपक्रमः। इतरथा अवद्यतेरदृष्टार्थता स्यात्। सङ्ख्याविशेषविधानार्थं च पुनर्वचनम्। तस्मात् पदार्थावयवोऽव-दानम्। न चावयवसहत्वं प्रयोगवचनेनोच्यते। तस्मात् प्रदानान्तेना-ऽनुसमय इति ॥ ६ ॥ अवदानस्य प्रदानान्तानुसमयाधिकरणम् ॥ ४ ॥

### वचनात्तु परिव्याणान्तमञ्जनादि स्यात् ॥ ७ ॥

ज्योतिष्टोमे अग्नीषोमीयपशौ यूपस्याञ्जनाद्याः पदार्थाः श्रूयन्ते। तेषु यूपैकादशिन्यां प्राप्तेषु संशयः। किमञ्जनादीनामेकैकेनानुसम-यः, उताञ्जनादिना परिव्याणान्तेनेति। किं प्राप्तम्। परिव्याणान्तम् अञ्जनादि स्यात्। कुतः ? वचनात्। वचनमिदं भवति। अञ्जनादि यजमानो यूपं नावसृजेत् आ परिव्याणादिति। न च शक्यं बहुष्व-ञ्जनादिना अनुसमयः कर्तुं, न चाऽनवस्रष्टुम्। तस्मात् परिव्याणा-न्तेनानुसमयः ॥ ७ ॥ सि० ॥

### कारणाद्वानवसर्गः स्याद् यथा पात्रवृद्धिः॥ ८ ॥

सहत्वस्य प्रापकः प्रयोगवचनोऽनुग्रहीष्यते इति पदार्थेन अनुस-मयः। अनवसर्गश्च प्रकृतावर्थात् कृतः। साहाय्यं यजमानेन अध्वर्योः।

एवं दृष्टार्थताऽनवसर्गस्य।इतरथा अदृष्टार्थता स्यात् । न चार्थात् कृतं चोदकः प्रापयति । तस्माद् यूपान्तरेणोच्छ्रयितव्येन कारणेनावसृजेत् । यथा पृषदाज्येन अनुयाजान् यजतीत्यर्थात्तस्य धारणार्थं पात्रम्भिद्यते ॥ ८ ॥ पूर्व० ॥

## न वा शब्दकृतत्वान्न्यायमात्रमितरदर्थात् पात्रविवृद्धिः ॥ ९ ॥

न वैतत्पदार्थेन अनुसमय इति । परिव्याणान्तेन पदार्थकाण्डेन अनुसमयः स्यात् । शब्दकृतं हि प्रकृतौ अनवसर्जनम् । शक्नोति हि ऋतेऽपि यजमानाद् अध्वर्युर्यूपमुच्छ्रायितुम् । सौकर्यमितिचेद् विधिशब्दो, बाध्येत दृष्टार्थता । एवं हि नियम्येत भोजने प्राङ्मुखता इव । अतोऽसम्भवात्, पदार्थकाण्डेन अनुसमयः।प्रयोगवचनस्य च न्यायमात्रत्वम् । चोदकस्ततो बलीयान् । पात्रविवृद्धिस्त्वर्थात् कर्त्तव्या ॥९॥पूर्वपक्षनिरासः॥अञ्जनादेः परिव्याणान्तानुसमयाधिकरणम्॥५॥

## पशुगणे तस्य तस्यापवर्जयेत् पश्वेकत्वात् ॥ १० ॥

वाजपेये प्राजापत्याः पशवः । तेषु सन्देहः । किमेकैकस्य पशोर्दैवतान्यवदाय ततः सौविष्टकृतानि, तत ऐडानि । अथ दैवतैर्दैवतानामनुसमयः, सौविष्टकृतैः सौविष्टकृतानाम्, ऐडैरैडानामिति । किं तावत् प्राप्तम् । एकैकस्य कृत्स्नानि अवदाय ततो होतव्यम् । प्रकृतौ वचनात् । एतत्कृतं प्राजापत्येष्वपि चोदकेनैव प्राप्नोति ॥१०॥पूर्व०॥

## दैवतैर्वैककर्म्यात् ॥ ११ ॥

नैतदेवम् । दैवतैर्दैवतानां, सौविष्टकृतैः सौविष्टकृतानाम्, ऐडैरैडानामिति । कस्मात् । ऐककर्म्यात् । एवं सकृत्कृतं भवति । यच्च वचनात् प्रकृतौ कृत्स्नावदानमिति । दैवतानि अवदाय न तावति एव होतव्यम् । सौविष्टकृतानि अवदेयानि । सौविष्टकृतानि अवदाय न तावत्येव होतव्यम् । ऐडानि अवदेयानीति प्रकृतौ श्रूयते । तदिह दैवतैर्दैवतानामनुसमयं कुर्वन्नेनं प्राकृतं धर्मं बाधेत । दैवतानि अवदाय नैव जुहोति, सौविष्टकृतानि अवद्यतीति । अथ सौविष्टकृतान्यवदाय नैव जुहोति । ऐडानि अवद्यतीति । तस्मात् पदार्थमात्रेणानुसमय इति ॥ ११ ॥ सि० ॥

## मन्त्रस्य चार्थवत्त्वात् ॥ १२ ॥

एवं मनोतामन्त्रस्तन्त्रं भविष्यति । इतरथा पर्यायेणैव स्यात्। तस्माद्दैवतेर्दैवतानां, सौविष्टकृतैः सौविष्टकृतानाम्, ऐडैरैडानामिति ॥ १२ ॥ ॥ युक्तिः ॥ दैवताद्यवदानेषु पदार्थानुसमयाधिकरणम् ॥ ६ ॥

## नानाबीजेष्वेकमुलूखलं विभवात् ॥ १३ ॥

अस्ति राजसूये नानाबीजेष्टिः । अग्नये गृहपतये सुतीनामष्टाकपालं निर्वपेत्, सोमाय वनस्पतये श्यामाकं चरुमित्येवमादि। अस्ति तु तत्र प्राकृतोऽवहन्तिः। तत्र सन्देहः। किं तत्रैकमुलूखलं पर्यायेण, उत यौगपद्येन बहूनीति । कुतः संशयः । यदि कृष्णाजिनाधस्तरणादयः पृथक् पदार्थास्ततो भेदः । अथ कृष्णाजिनास्तरणादिस्तण्डुलनिर्वृत्त्यन्त एकः पदार्थस्ततस्तन्त्रमिति । किं तावत् प्राप्तम् । एकमिति । कुतः। पर्यायेण विभवात्। एकस्योपादानेन सिद्धेर्द्वितीयस्योपादानमनर्थकं स्यात् । तस्मात् तन्त्रमिति ॥ १३ ॥ सि० ॥

## विवृद्धिर्वा नियमानुपूर्वस्य तदर्थत्वात् ॥ १४ ॥

विवृद्धिरुलूखलानां स्यात्। नियतं हि आनुपूर्व्यं पाठकृतं सहत्वे सति उपपद्यते। पदार्थानां चानुसमयः। पृथक्पदार्थाश्चाधस्तरणादयो यतीभावस्य पर्यवसानाद् अधस्तरणादिभिश्च पदैरभिधानात्। तस्माद् विवृद्धिरिति ॥ १४ ॥ ॥ पूर्व० ॥

## एकं वा तण्डुलभावाद्धन्तेस्तदर्थत्वात् ॥ १५ ॥

एकं वा उलूखलं पर्यायेण स्यात्। एको ह्यधस्तरणादिस्तण्डुलपर्यन्तः पदार्थः । स्तरणादिर्हन्तेरुपक्रमः फलीकरणान्तश्च तस्यैव शेषः । यतो हन्तिस्तण्डुलनिष्पत्त्यर्थः, एवं स्तरणादीनां हन्तेश्च नादृष्टार्थता भविष्यति । तस्मात् तन्त्रमिति ॥ १५ ॥ ॥ उत्तरम् ॥ नानाबीजेष्टौ उलूखलादीनां तन्त्रताधिकरणम् ॥ ७ ॥

## विकारे त्वनुयाजानां पात्रभेदोऽर्थभेदात् स्यात् ॥ १६ ॥

अस्ति ज्योतिष्टोमे पशुरग्नीषोमीयः । तत्र श्रूयते, पृषदाज्येनाऽनुयाजान् यजतीति । तत्र सन्देहः। किं प्रयाजानुयाजानामेकं पात्रमाज्यस्य पृषदाज्यस्य च धारणार्थम्, उत भिद्यते ? । किं प्राप्तम्। एकमिति । कुतः । प्रकृतावेकं, प्रकृतिवद् इहापि एकेन भवितव्यम्।

एवं प्राप्ते, ब्रूमः । पात्रभेदः स्यात् । कुतः । अर्थभेदात् । शुद्धस्य प्रयाजा अर्थः । पृषतोऽप्यनुयाजाः। पृषति गृह्यमाणे प्रयाजानां वैगुण्यं, शुद्धेऽनुयाजानाम् । न चैकस्मिन् पात्रे विविक्तं शक्यं कर्तुम् । मर्यादायामपि क्रियमाणायां प्रदीयमानं संसृज्येत । अपि चाकारभेदादुपभृत उपभृत्त्वं विहन्येत । प्राणिमात्रपुष्करा हि सा, एकपुष्करा च । अथोच्येत, पृषदाज्यमप्याज्यमेवेति न मिश्रत्वं दोषायेति । नैतदेवम् । प्रकृतावुत्पवनावेक्षणयोः प्रयोजनमेतद् यदाज्यस्यापरेण द्रव्येणासंसर्गः । एवं चेदनुपपन्नं, यत् प्रयाजाः पृषदाज्येनेज्येरन्निति । अपि च । एवं सति अवश्यं हविषः काचिन्मात्राऽपनीयते । न च शक्यं प्रयाजकार्येऽवसितेऽनुयाजार्थं ग्रहीतुम् । प्रकृतावेककालं ग्रहणम् । इहाप्येककालमेव कर्त्तव्यम् । तस्मात् पात्रभेद इति ॥१६॥ अग्नीषोमीयपशौ प्रयाजानुयाजयोः पात्रभेदाधिकरणम् ॥ ८ ॥

## प्रकृतेः पूर्वोक्तत्वादपूर्वमन्ते स्यान्न ह्यचोदितस्य शेषाम्नानम् ॥ १७ ॥

अग्नौ नक्षत्रेष्ट्यां श्रूयते— अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्, सोऽत्र जुहोति, अग्नये स्वाहा, कृत्तिकाभ्यः स्वाहा इत्येवमादिहोमाः समाम्नाताः । सन्ति तु प्रकृतौ नारिष्ठहोमाः । तत्र सन्देहः । किं नारिष्ठहोमाः पूर्वम्, उत उपहोमा इति संशये । उच्यते । प्राकृतं पूर्वं, वैकृतमन्ते स्यादिति । कुतः । चोदितस्य परिपूर्णस्य शेष आम्नायते । यथा जातस्य पुत्रस्य क्रीडनकम् ॥ १७ ॥ ॥ सि० ॥

## मुख्यानन्तर्यमात्रेयस्तेन तुल्यश्रुतित्वादशब्दत्वात् प्राकृतानां व्यवायः स्यात् ॥ १८ ॥

आत्रेयो मन्यते स्म, मुख्यानन्तर्यं वैकृतस्य, पश्चात्तु प्राकृतं प्रयुज्येत । प्रधानानन्तरं विकृतस्य पाठः प्रत्यक्षः । तस्मात् पूर्वमुपहोमास्ततो नारिष्ठहोमा इति । प्राकृतानां व्यवायः स्यात् । यतस्तेन श्रूयन्ते ॥ १८ ॥ ॥ पूर्व० ॥

## अन्ते तु बादरायणस्तेषां प्रधानशब्दत्वात् ॥१९॥

बादरायणस्त्वाचार्यो मन्यते स्म अन्ते वैकृतानां प्रयोग इति । कुतः । प्रधानशब्दगृहीतत्वात् । प्राकृतानामङ्गानां प्रधानशब्दगृहीत-

त्वम् । तत्प्रधानशब्दगृहीतानि हि प्राकृतान्यङ्गानि । तस्माच्च प्रधान-शब्दात् परमेतत् । सोऽत्र जुहोति अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा इत्येवमादि । तस्मात् प्रत्यक्षादेव क्रमान्नारिष्टहोमेभ्यः पराञ्च उपहोमा इति ॥ १९ ॥ ॥ उत्तरम् ॥

## तथा चान्यार्थदर्शनम् ॥ २० ॥

अन्यार्थोऽपि चैतमर्थं दर्शयति । अध्वरस्य पूर्वमथाग्नेरुपप्रैत्येतत् कर्म, यदग्निकर्मेति । पश्चात् समाम्नातस्य पश्चात् प्रयोगं दर्शयति ॥ ॥ २० ॥ ॥ युक्तिः ॥ नारिष्टहोमस्योपहोमपूर्वताधिकरणम् ॥ ९ ॥

## कृतदेशात्तुपूर्वेषां स देशः स्यात्तेन प्रत्यक्षसंयोगा-न्न्यायमात्रमितरत् ॥ २१ ॥

राजसूये श्रूयते, अक्षैर्दीव्यति शौनःशेफमाख्यापयति, अभिषि-च्यते इति । तत्र सन्देहः । किं देवतादीनामन्ते प्रयोगः, उत अभिषे-कात् पूर्वम् ? इति । किं प्राप्तम् ? अन्ते तु बादरायण इत्यन्ते प्रयो-गः कर्त्तव्य इति । एवं प्राप्ते ब्रूमः । कृतदेशाद् अभिषेकात् पूर्वं तु प्र-योगः । कृतदेशो हि अभिषेकः। माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यते इति प्रत्यक्षानुग्रहायाभिषेकात् पूर्वं प्रयोक्तव्यम् । न्यायमात्रमितरत् । अन्ते तु बादरायण इति ॥ २१ ॥ ॥ ॥ विदेवनादीनामभिषेकपूर्वता-ऽधिकरणम् ॥ १० ॥

## प्राकृताच्च पुरस्ताद्यत् ॥ २२ ॥

अस्ति अग्निः, य एवं विद्वानग्निश्चिनुते इति । तत्र दीक्षणीयायाः पूर्वं सावित्रहोमाः, उखासम्भरणम्, इष्टकाः, पशुश्चेत्येतदाम्नातम् । किं तदेव पूर्वं कर्त्तव्यम्, उत दीक्षणीया ? इति । किं प्राप्तम् ? वैकृ-तानामन्ते प्रयोगः । अन्ते तु बादरायण इति । एवं प्राप्ते ब्रूमः । पूर्वं सावित्रहोमाः, इष्टकाः, पशुरुखासम्भरणं च । कुतः ? प्रत्यक्षपाठात् । पुनस्तत्र दीक्षणीया आम्नाता, तस्याश्च पुरस्तात् सावित्रहोमा इष्ट-काः पशुरुखासम्भरणं च । तस्मात् तेषां पूर्वं प्रयोग इति ॥ २२ ॥ सावित्रहोमादीनां दीक्षणीयापूर्वप्रयोगाधिकरणम् ॥ ११ ॥

## सन्निपातश्चेद् यथोक्तमन्ते स्यात् ॥ २३ ॥

अग्नौ दीक्षणीयायाः परतो रुक्मप्रतिमोचनादि आम्नातम् । त-स्मिन्नेव क्रमे चोदकेन दीक्षितसंस्काराः प्राप्ताः । तत्र सन्देहः । किं

मनियमः, उत पूर्वं रुक्मप्रतिमोचनादि, उत दीक्षितसंस्कारा इति। किं प्राप्तम्। अनियमः। अथ वा, यथा प्रत्यक्षपाठक्रमाद्दीक्षणीयायाः पुरत उखासम्भरणादयः, एवं रुक्मप्रतिमोचनादीनीति॥ एवं प्राप्ते ब्रूमः। दीक्षितसंस्काराः पूर्वं कर्त्तव्या इति। कुतः। दीक्षणीयां प्रति यः पाठक्रमः, यथा च चोदकः, तथोभयेऽपि परस्ताद्दीक्षणीयायाः कार्याः। यस्तेषां परस्परापेक्षः क्रमस्तत्र न कश्चिदुखासम्भरणस्येव प्रत्यक्षः पाठक्रमः पूर्वत्वं साधयति। अस्ति तु संस्काराणां प्रकृतौ पूर्वं पाठः, विकृतौ रुक्मप्रतिमोचनस्योत्तरः। तेन यथोक्त एव क्रमः स्यात्। अन्ते वैकृतमिति। अथ किमर्थं सन्निपात आशङ्क्यते?। नन्वयं सन्निपात एव व्यक्तः।असन्दिग्धे सन्दिग्धवचनमेतत्। यथा—

ईजाना बहुभिर्यज्ञैर्ब्राह्मणा वेदपारगाः।

शास्त्राणि चेत् प्रमाणं स्युः प्राप्तास्ते परमां गतिमिति। तस्माद्र न दोष इति॥२३॥॥ याजमानसंस्काराणां रुक्मप्रतिमोकात् पूर्वभाविताऽधिकरणम् ॥१२॥ इति श्रीबरस्वामिनः कृतौ मीमांसाभाष्ये पञ्चमस्य अध्यायस्य द्वितीयः पादः॥ ५ ॥ २ ॥

## अथ पञ्चमे अध्याये तृतीयः पादः ॥ ५ ॥ ३ ॥

### विवृद्धिः कर्म्मभेदात् पृषदाज्यवत्तस्य तस्योपदिश्येत ॥ १ ॥

अग्नीषोमीये पशौ श्रूयते, एकादश प्रयाजान् यजति एकादशाऽनुयाजान् यजतीति। चातुर्मास्येषु नव प्रयाजान् यजति नव अनुयाजान् यजतीति। अग्नौ श्रूयते, षडुपसद इति। तत्र सन्देहः। किं प्रतिप्रयाजमेकादशसङ्ख्या प्रत्यनुयाजं च। तथा चातुर्मास्येषु नवसङ्ख्या, तथा अग्नौ चोपसत्सु षट्सङ्ख्या, उत सर्वसम्पाद्या सङ्ख्या इति। किं प्राप्तम्। प्रतिप्रधानं सङ्ख्या भिद्यते इति। कुतः। भिन्नानि हि तानि कर्माणि। तानि च प्रधानानि प्रति, सङ्ख्या श्रूयते। प्रधानसन्निधौ च गुणः शिष्यमाणः प्रतिप्रधानम्भिद्यते। यथा पृषदाज्येनाऽनुयाजान् यजतीति प्रत्यनुयाजं पृषत्ता गुणो भिद्यते। एवमिहाऽपीति॥ १॥ पूर्व०॥

### अपि वा सर्वसङ्ख्यत्वाद्विकारः प्रतीयेत ॥ २ ॥

सर्वसम्पाद्या सङ्ख्या कल्प्येत । कुतः । पृथक्त्वनिवेशिनी हि सङ्ख्या असति पृथक्त्वेऽभ्यासेन कल्प्येत, यावत्यसम्भवो भेदस्य, तावत्येवाभ्यस्येत । यावति सम्भवति तावति पृथक्त्वनिवेश एव न्याय्यः । तस्मात् संपाद्यैव सङ्ख्या । यत्तु पृषदाज्यादिति । न । पृषत्ता एकस्य न संभवति । न असौ पृथक्त्वनिवेशिनी । न चैकस्य क्रियमाणा सर्वेषां तन्त्रेणोपकरोतीति । तस्माद् अवश्यं भेत्तव्या । तन्त्रेण तूपकरोति सङ्ख्या । इतरापेक्षा हि सा भवति । एवं सति सहत्वस्य प्रापकः प्रयोगवचनोऽनुग्रहीष्यते इति ॥ २ ॥ ॥ सि० ॥ ॥ प्रयाजादीनामेकादशादिसंख्यायाः सर्वसम्पाद्यताधिकरणम् ॥ १ ॥

## स्वस्थानात्तु विवृद्धेरन् कृतानुपूर्व्यत्वात् ॥ ३ ॥

उपसत्सु सन्देहः । किमावृत्तिर्दण्डकलितवत् ? उत स्वस्थानाद् विवर्द्धन्ते इति । किं तावत् प्राप्तम् । आवर्त्तनीयानामर्थानामेष धर्मो यदुत दण्डकलितवत् । यो हि उच्यते, त्रिरनुवाकः पठ्यतामिति स आदित आरभ्य परिसमाप्य पुनरादित आरभ्यते । तस्माद्दण्डकलितवदावृत्तिः ॥ एवं प्राप्ते ब्रूमः । स्वस्थानाद् विवर्द्धितुमर्हति । कुतः । कृतानुपूर्व्यत्वात् । कृतमानुपूर्व्यमुपसत्सु । प्रथमां कृत्वा मध्यमा कर्त्तव्या, तत उत्तमेति । तत्र यदि दण्डकलितवदावृत्तिः स्याद्, उत्तमां कृत्वा पुनराद्याया अभ्यासे क्रियमाणेऽस्थाने सा विवृद्धिः कृता भवति । स्वस्थानविवृद्धौ नैष दोषः । तस्मात् स्वस्थाने विवृद्धिरिति ॥ ३ ॥ प्रथमादीनां तिसृणामुपसदां स्वस्थानावृत्त्यधिकरणम् ॥ २ ॥

## समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युर्द्यावापृथिव्योरन्तराले समर्हणात् ॥ ४ ॥

दर्शपूर्णमासयोः सामिधेन्यः सामिधेनीरन्वाहेति । तत्र काम्याः सामिधेनीकल्पाः, एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्येत्येवमादयः । तत्र आगमेन सङ्ख्यापूरणं वक्ष्यते । तत्र सन्देहः । किमागन्तूनामन्ते निवेशः, उत समिध्यमानवतीं समिद्धवतीं चान्तरेण निवेश इति । किं तावत् प्राप्तम् । अन्ते निवेशः । अन्ते तु बादरायणः, इत्यनेन न्यायेनेति । एवं प्राप्ते ब्रूमः । समिध्यमानवतीं समिद्धवतीं चान्तरेण निवेश इति । कुतः । द्यावापृथिव्योरन्तराले समर्हणात् संस्तवादि-

त्यर्थः । इयं वै समिध्यमानवती, असौ समिद्धवती । यदन्तरा, तद् धाय्या इत्यन्तरिक्षसंस्तुतेऽस्मिन्नन्तराले विधीयन्ते । तस्मान्नान्ते स्युरिति ॥ ४ ॥ पूर्व० ॥

## तच्छब्दो वा ॥ ५ ॥

अथ वा या धाय्याशब्दिकास्तास्तत्र भवितुमर्हन्ति। तेन शब्देन तत्र संस्तवः । संस्तवाच्च विधानम् । यथा, पृथुपाजवत्यौ धाय्ये उष्णिक्ककुभौ धाय्ये इति । काः पुनरेता धाय्या इति नाम । नाऽस्य शब्दस्य प्रसिद्धिमुपलभामहे । उच्यते । सामिधेन्यो धाय्याः। कुतः। एवं हि भगवतः पाणिनेर्वचनम्– पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु इति । अस्माद् वचनाच्छ्रुतिमनुमिमीमहे। कतमासु सामिधेनीषु इति । उच्यते । अविशेषात् सर्वास्विति गम्यते । इह तु समिध्यमानवतीं समिद्धवतीं चान्तरेण धाय्याः स्युरिति । सर्वासु सामिधेनीषु सतीषु धाय्यावचनाद् विशिष्टानां सामिधेनीनां धाय्याशब्द इति गम्यते। ननु पाणिनिवचनादविशेषेण सर्वा धाय्याः । नेत्याह । विशिष्टास्वपि वचनमुपपद्यते एव। यदि विशिष्टास्ततः का इति । उच्यते। यासु धाय्याशब्दः श्रूयते, तास्तावद् धाय्याः । तासु च धाय्यासु सतीषु वचनमर्थवद् भवति । अर्थवति च सति वचने न अन्या धाय्याः। प्रमाणाभावादिति ॥५॥ सि० ॥

## उष्णिक्ककुभोरन्ते दर्शनात् ॥ ६ ॥

उष्णिक्ककुभोश्चान्ते प्रयोगो दृश्यते । यज्जगत्या परिदध्यादन्तं यज्ञं गच्छेत् । अथ यत्त्रिष्टुभा परिदधाति नान्तं गच्छतीति । ननु त्रिष्टुबत्रान्ते दृश्यते, न उष्णिक्ककुभाविति । उच्यते । त्रिष्टुभमेवाऽयम् उष्णिक्ककुभाविति ब्रूते । कथम् । त्रिष्टुभो वीर्य्यमित्येवमन्ते संस्तुतेस्त्रिष्टुभो वा एतद्वीर्य्यं यदुष्णिक्ककुभाविति कारणे कार्यवदुपचारः कृतः ॥ ६ ॥ ॥ युक्तिः ॥ सामिधेनीष्वागन्तूनामन्ते निवेशाऽधिकरणम् ॥ ३ ॥

## स्तोमविवृद्धौ बहिष्पवमाने पुरस्तात् पर्य्यासादागन्तवः स्युस्तथाहि दृष्टं द्वादशाहे ॥ ७ ॥

सन्ति विवृद्धस्तोमकाः क्रतवः । एकविंशेन अतिरात्रेण प्रजा-

कामं याजयेयुस्त्रिणवेन ओजस्कामं त्रयस्त्रिंशेन प्रतिष्ठाकाममिति। तत्र आगमेन सङ्ख्यापूरणं वक्ष्यते। अथ बहिष्पवमाने वैकृतेष्वानीयमानेषु भवति संशयः । किं वैकृतानामन्ते निवेशः । उत प्राक् पर्यासादिति । किं प्राप्तम् । पुरस्तात् पर्यासादागन्तवः स्युः । तथा हि दृष्टं द्वादशाहे । स्तोत्रियानुरूपौ तृचौ भवतः । वृषण्वन्तस्तृचा भवन्ति । तृच उत्तमः पर्यास इति । इहापि प्राक्पर्यासादागन्तुभिर्भवितव्यम् ॥ ७ ॥ ॥ पूर्व० ॥

## पर्य्यास इति चान्ताख्या ॥ ८ ॥

पर्यासशब्दश्चान्तवचनो लोके दृश्यते । यथा– क्षेत्रपर्यासः, नदीपर्यास इति । एवं पर्यासोऽन्ते कृतो भविष्यति ॥ ८ ॥ ॥ युक्तिः ॥

## अन्ते वा तदुक्तम् ॥ ९ ॥

अन्ते वा एवञ्जातीयकं वैकृतं स्यात् । उक्तम् । अन्ते तु बादरायण इति ॥ ९ ॥ ॥ सि० ॥

## वचनात्तु द्वादशाहे ॥ १० ॥

अथ यदुक्तम् । तथाहि दृष्टं द्वादशाहे इति । तत् परिहर्त्तव्यम् । अत्रोच्यते । वचनाद् द्वादशाहे भवति । स्तोत्रियानुरूपौ तृचौ भवतः । वृषण्वन्तस्तृचा भवन्ति, तृच उत्तमः पर्यास इति। न हि वचनस्यातिभारोऽस्ति ॥ १० ॥

## अतद्विकारश्च ॥ ११ ॥

न चायं तद्विकारः, यत्ततो धर्मान् गृह्णीयादिति ॥ ११ ॥

## तद्विकारेऽप्यपूर्वत्वात् ॥ १२ ॥

योऽपि तद्विकारस्तत्राप्यन्ते एव निवेशः । कुतः । अपूर्वत्वात् । वृषण्वतां तृचानां वृषण्वन्त एव प्राक्पर्यासात् । यावद् वचनं वाचनिकं, न सदृशमुपसङ्क्रामति ॥ १२ ॥ ॥ युक्तिः ॥ बहिष्पवमाने आगन्तूनां पर्यासोत्तरकालताधिकरणम् ॥ ४ ॥

## अन्ते तूत्तरयोर्दध्यात् ॥ १३ ॥

इहापि विवृद्धस्तोमकाः क्रतव उदाहरणम् । तत्रोत्तरयोः पवमानयोः साम्नामागम इति वक्ष्यते । तत्र आगम्यमानेषु सामसु सन्देहः । किं तेषामन्ते निवेशः, उत गायत्रीबृहत्यनुष्टुप्स्विति । किं

प्राप्तम् । अन्ते उत्तरयोर्द्दध्यात् । उक्तोऽत्र न्यायः- अन्ते तु बादरायण इति । तस्माद् अन्ते निवेश इति ॥ १३ ॥

## अपि वा गायत्रीबृहत्यनुष्टुप्सु वचनात् ॥ १४ ॥

गायत्रीबृहत्यनुष्टुप्सु निवेशः । कस्मात् । वचनात् । त्रीणि ह वै यज्ञस्योदराणि गायत्रीबृहत्यनुष्टुबिति । अत्र ह्येव आवपन्ति अत एवोद्वपन्तीति वचनेन अस्त्युपालम्भः । तस्मान्नैषामन्ते निवेश इति ॥ ॥ १४ ॥ ॥ सि० ॥ तत्रैवागन्तूनां साम्नां मध्ये निवेशाधिकरणम् ॥५॥

## ग्रहेष्टकमौपानुवाक्यं सवनचितिशेषः स्यात् ॥१५॥

औपानुवाक्ये काण्डे ग्रहा इष्टकाश्च समाम्नाताः । एष वै हविषा हविर्यजते, यो दाभ्यं गृहीत्वा सोमाय यजते इति । तथा, परा वा एतस्यायुः प्राण एति योंऽशुं गृह्णातीति । तथा इष्टकाश्चित्रिणीरुपदधाति, वज्रिणीरुपदधाति, भूतेष्टका उपदधातीति । तत्र सन्देहः । किं ग्रहेष्टकमौपानुवाक्यं सवनशेषश्चितिशेषश्च । अथ किं क्रतुशेषोऽग्निशेषश्चेति । किं प्राप्तम् । सवनचितिशेषः । कुतः । ग्रहैः सवनान्यारभ्यन्ते, इष्टकाभिश्चितयः । यच्च येनारभ्यते तत्तदङ्गम् ॥१५॥ पूर्व०

## क्रत्वग्निशेषो वा चोदितत्वादचोदनानुपूर्वस्य ॥१६॥

क्रत्वग्निशेषः स्यात् । कुतः ? चोदितत्वात् । अग्निश्चेतव्यः श्रूयते । य एवं विद्वानग्निं चिनुते इति । न चितिश्चेतव्या । इष्टकाचयनेन अग्निश्चेतव्यः श्रूयते । अग्निमिति द्वितीयानिर्द्देशात् । तथा यो दाभ्यं गृहीत्वा सोमाय यजते इति । अदाभ्यस्य यजतिना सम्बन्धः । तथा अंशोः । तस्मात् सकृद् यागसम्बन्धं कृत्वा कृतार्थः शब्दो भवति, श्रुतं सम्बन्धमभिनिर्वर्त्य । तथा सकृदग्निसम्बन्धं कृत्वा कृतो मन्येत । अचोदना चितिसवनयोः । न हि ते कर्त्तव्यतया चोद्येते । परार्थे हि तयोः श्रवणम् । किं प्रयोजनम् । सवनचितिशेषत्वे, प्रतिसवनं ग्रहणं, प्रतिचिति चेष्टकोपधानम् । क्रत्वग्निशेषत्वे सकृद् ग्रहणोपधाने ॥ १६ ॥ ॥ सि० ॥ ग्रहेष्टकादीनां क्रत्वग्निशेषताधिकरणम् ॥ ६ ॥

## अन्ते स्युरव्यवायात् ॥ १७ ॥

औपानुवाक्ये श्रूयते । चित्रिणीरुपदधाति, वज्रिणीरुपदधातीति । तत्र सन्देहः । किमेताः पञ्चम्यां चितावुपधेयाः, उत मध्यमा-

यामिति । किं प्राप्तम् । पञ्चम्यामेवेष्टकाः कृतक्रमाः । अन्या नैताभि-र्व्यवेष्यन्ते ॥ १७ ॥ ॥ पूर्व० ॥

## लिङ्गदर्शनाच्च ॥ १८ ॥

आवपनं वा उत्तमा चितिः । अन्या इष्टका उपदधातीति ॥ १८॥ युक्तिः ॥

## मध्यमायान्तु वचनात् ब्राह्मणवत्यः ॥ १९ ॥

नैवैता अन्त्यायां चितौ । कस्यां तर्हि । मध्यमायाम् । कुतः । ब्राह्मणवत्य एता इष्टकाः । तासां मध्यमा चितिराम्नायते । यां वै कांश्चिद् ब्राह्मणवतीमिष्टकामभिजानीयात्, तां मध्यमायां चितावुपदध्यादिति । ननु सर्वा एवेष्टका ब्राह्मणवत्यः । नेत्याह । अपरा लिङ्गक्रमात् समाख्यानाच्च । तस्मादेता नान्ते स्युरिति ॥१९॥ ॥ सिद्धान्तः ॥ चित्रिण्यादीनां मध्यमचितौ उपधानाधिकरणम् ॥ ७ ॥

## प्राग्लोकम्पृणायास्तस्याः सम्पूरणार्थत्वात् ॥ २० ॥

औपानुवाक्ये काण्डे इष्टकाः समाम्नाताः— वज्रिणीरुपदधाति, चित्रिणीरुपदधाति, भूतेष्टका उपदधातीति । तत्रेदं समधिगतं, मध्यमायां चितावुपधेया इति । तत्र सन्देहः । किं प्राग् लोकम्पृणायाः, उत पश्चादिति । किं प्राप्तम् । अन्ते तु बादरायण इति । एवं प्राप्ते उच्यते । प्राग् लोकम्पृणायाः । तस्याः सम्पूरणार्थत्वात् । सम्पूरणार्थता तस्याः श्रूयते— यदेवास्योनं, यच्छिद्रं, तदनया पूरयति, लोकम्पृण च्छिद्रम्पृण इति । अपूर्वत्वाद् वार्थस्य, विधिरेवायं संस्तवेनेति गम्यते । तस्मात् प्राग् लोकम्पृणायाः स्यात् ॥ २० ॥ ॥ लोकम्पृणातः पूर्वं चित्रिण्याद्युपधानाधिकरणम् ॥ ८ ॥

## संस्कृते कर्म्म संस्काराणान्तदर्थत्वात् ॥ २१ ॥

आधाने सन्ति पवमानेष्टयः । सन्ति च नियतानि कर्माण्यग्निहोत्रादीनि । अनियतानि चैन्द्राग्नादीनि । तत्र सन्देहः । किं पवमानेष्टीः कृत्वा कर्माणि प्रतिपत्तव्यानि, उत आहितमात्रेष्वग्निष्विति । किं प्राप्तम् । आहितमात्रेष्विति । कुतः । आहितमात्रेष्वसावग्निषु कर्माणि कर्तुं समर्थो भवति । यथा, आहिताग्निर्न क्लिन्नं दार्वादध्यादिति । दर्शयति च, अग्निं वै सृष्टमग्निहोत्रेणानुद्रवन्तीत्याहितमात्रेष्वग्निहोत्रं

दर्शयति । तस्मान्न पवमानेष्टयः प्रतीक्षितव्या इति ॥ एवं प्राप्ते ब्रूमः । पवमानेष्टिभिः संस्कृतेष्वग्निषु कर्माणि वर्त्तेरन् । कुतः । संस्काराणां तदर्थत्वात् । संस्कारशब्दा एत आहवनीयादयः । संस्कारस्य कस्यचिदभावेन, आहवनीयादिषु प्रतिपत्तिः स्यात् । तस्मात् संस्कृतेषु अग्निषु कर्माणीति ॥ २१ ॥ ॥ पूर्व० ॥

## अनन्तरं व्रतं तद्भूतत्वात् ॥ २२ ॥

यत्तु, आहिताग्निर्न क्लिन्नं दार्वादध्यादित्येवमादि । युक्तम् । यद् आहितमात्रेषु क्रियते, आहिताग्नेस्तद् व्रतमुच्यते । स च आहितमात्रेषु आहिताग्निः संवृत्तः। तस्मादनन्तरं व्रतं स्यात् । तद्भूतत्वात् ॥ २२ ॥ आ० नि० ॥

## पूर्वं च लिङ्गदर्शनात् ॥ २३ ॥

अथ यदुक्तम्, आहितमात्रेष्वग्निहोत्रं दर्शयति, पूर्वमिष्टिभ्यः इति । तस्य कः परिहारः ? इत्याभाषान्तं सूत्रम् ॥ २३ ॥ आभासः ॥

## अर्थवादो वाऽर्थस्य विद्यमानत्वात् ॥ २४ ॥

अर्थवाद एषः । कुतः । अर्थस्य विद्यमानत्वात् । विद्यमानो हि तत्रान्य एवाग्निहोत्रहोमः । कथं होतव्यम्, अग्निहोत्रं न होतव्यम् ? इति मीमांसन्ते ब्रह्मवादिनः । यद् यजुषा जुहुयाद् अयथापूर्वमाहुती जुहुयात् । यदि न जुहुयाद् अग्निः परापतेत् । तूष्णीमेव होतव्यमिति । तस्य तूष्णींहोमस्य प्रशंसार्थोऽयमर्थवादः ॥ २४ ॥ ॥ उत्तरम् ॥

## न्यायविप्रतिषेधाच्च ॥ २५ ॥

न्यायविप्रतिषेधश्च भवेत् । यद्यनन्तरमग्निहोत्रादयः स्युः । यः पूर्वोक्तो न्यायः, स विप्रतिषिध्येत । न वा तासां तदर्थत्वादिति । तस्मात् संस्कृते कर्माणि भवेयुरिति ॥ २५ ॥ ॥ युक्तिः ॥ इष्टिसंस्कृताऽग्नावग्निहोत्राद्यनुष्ठानाधिकरणम् ॥ ९ ॥

## सञ्चिते त्वग्निचिद्युक्तं प्रापणान्निमित्तस्य ॥ २६ ॥

अग्निचिद् वर्षति न धावेन्न स्त्रियमुपेयात् । तस्माद् अग्निचिता पक्षिणो न अशितव्या इत्येवमादयः पदार्थाः श्रूयन्ते । तेषु सन्देहः किं सञ्चितमात्रे प्रतिपत्तव्याः, उत क्रत्वन्ते ? इति । किं प्राप्तम् । सञ्चितमात्रे एवेति । अग्निं यश्चितवान् सोऽग्निचिदिति तस्य श्रूयमाणाश्चितवतोऽनन्तरमेव प्राप्नुवन्ति । प्राप्ते निमित्ते नैमित्तिकं कर्त्त-

ध्यम् । तस्मादनन्तरमेव ॥ २६ ॥ ॥ पूर्व० ॥

## क्रत्वन्ते वा प्रयोगवचनाभावात् ॥ २७ ॥

प्रयोगवचनो हि अत्र तान् पदार्थान् प्रापयति, येषां क्रत्वर्थत्वम् । न चैषां क्रत्वर्थत्वमस्ति । पुरुषार्था ह्येते । कथम् । प्रतिषेधे पुरुषः श्रूयते । वर्षति न धावेन्न स्त्रियमुपेयादित्येवमादि । न च क्रत्वर्था एते प्रसक्ताः, येन प्रतिषेधः क्रतोरुपकुर्यात् ॥ २७ ॥ ॥ सि० ॥

ननु पुरुषार्था अपि चितवतः श्रवणाच्चयनानन्तरं प्राप्ताः । नेति ब्रूमः—

## अग्नेः कर्मत्वनिर्देशात् ॥ २८ ॥

अग्न्यर्थं चयनं तत् । यदग्नेः स्वङ्कार्य्यं कुर्वतः साहाय्ये वर्त्तते, तत् तदर्थम् । कश्च तस्य स्वार्थः । यागसिद्धिः । सिद्धे च यागे चयनेन उपकृतं भवति । तस्मात् सिद्धे यागेऽग्निचित् । तेन क्रत्वन्ते इति ॥ २८ ॥ युक्तिः ॥ अग्निचिद्वर्षणादिव्रतानां क्रत्वन्तेऽनुष्ठानाधिकरणम् ॥ १० ॥

## परेणावेदनाद्दीक्षितः स्यात् सर्वैर्दीक्षाभिसम्बन्धात् ॥ २९ ॥

ज्योतिष्टोमे श्रूयते, आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति । तथा दण्डेन दीक्षयति, मेखलया दीक्षयति, कृष्णाजिनेन दीक्षयतीत्येवमादि । तत्र सन्देहः । किं सर्वैर्दीक्षितो भवति, अथवा इष्टयन्ते दीक्षित इति । किं तावत् प्राप्तम् । सर्वैरिति । कुतः । दीक्षाऽभिसम्बन्धात् । दीक्षासम्बन्धो भवति, दण्डेन दीक्षयति, दीक्षामस्य करोतीत्यर्थः । यदि इष्टयन्ते दीक्षितः स्यात् कथमस्य दण्डेन दीक्षां कुर्यात् । तेन इष्ट्या न दीक्षितः । न चाऽस्य इष्टयन्ते दीक्षितशब्दं पश्यामः । आवेदने त्वस्य दीक्षितशब्दः । तस्मान्न तावति दीक्षितः स्यात् । न च सम्भवति समुच्चये विकल्पो न्याय्यः । पक्षे बाधः स्यात् । तत्र प्रयोगवचनो बाध्येत । तस्माद् भिन्नेष्वपि दीक्षासम्बन्धवाक्येषु प्रयोगवचनेन सहैकवाक्यतेत्यावेदनकाले दीक्षितः स्यात् ॥ ॥ २९ ॥ ॥ पूर्व० ॥

## इष्टयन्ते वा तदर्था ह्यविशेषार्थसम्बन्धात् ॥ ३० ॥

इष्ट्यन्ते वा दीक्षितः स्यात् । तदर्था हि सा दीक्षणार्था । कथम् ।

दीक्षिष्यमाणस्य अदीक्षितस्य सा भवति । यदि तस्या उत्तरकाले दीक्षितः, एवं सा दीक्षिष्यमाणस्य । तस्माद् वाक्यादवगम्यते । भवति तदा दीक्षित इति । दीक्षाकरणे पदार्थे निर्वृत्ते किमिति न दीक्षितः स्यात् । वाक्यं हि निरपेक्षं दीक्षित इति ज्ञापयति ॥ यत्तु, दीक्षासम्बन्धो दण्डेन दीक्षयतीति कथं स दीक्षितत्वे स्यादिति दण्डेनैवं सम्पादयतीत्यवगच्छामः । यत्तु अनन्तरं दीक्षितशब्दो नाऽस्तीति । न शब्दस्याप्रयोगोऽर्थाभावे हेतुः । सत्यप्यर्थे तदवसराभावान्न प्रयुज्यते शब्दः। अन्येन च दीक्षित इत्यवगम्यते वाक्येन। आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाण इति । यच्चावेदनकाले दीक्षितशब्द इति। इष्ट्यन्तेऽपि दीक्षितस्यासावविरुद्धः। प्रयोगवचनश्चाविरुद्धः । यत एकं दीक्षाकरणमन्यैर्दीक्षितं सम्पादयतीति गम्यते ॥ ३० ॥ सि० ॥

## समाख्यानं च तद्वत् ॥ ३१ ॥

इतश्च पश्यामः, इष्टिर्दीक्षणार्था, इष्ट्यन्ते च प्रवृत्तिरिति । कस्मात् । समाख्यानं च तद्वदिति यद्वन्न्याय उपदिष्टः । कथम् ? । दीक्षणीया इति तादर्थ्यकरी समाख्या भवति । यथा– स्नानीयं, भोजनीयञ्चेति । तस्माच्च पश्यामः– इष्टिर्दीक्षणार्था, इष्ट्यन्ते च प्रवृत्तिरिति ॥ ३१ ॥ युक्तिः ॥ दीक्षाया इष्टिसिद्धताधिकरणम् ॥ ११ ॥

## अङ्गवत् क्रतूनामानुपूर्व्यम् ॥ ३२ ॥

इह काम्या इष्टय उदाहरणम् । ऐन्द्राग्नमेकादशकपालं निर्वपेदित्येवमादयः। गवादयः सोमाः। सौम्यादयः पशवः। तत्र सन्देहः। किं येन क्रमेणाधीतास्तेनैव क्रमेण प्रयोक्तव्याः, उतानियम इति । किं तावत् प्राप्तम् । क्रतूनामानुपूर्व्यं यत् पाठे, तदेव प्रयोगे भवितुमर्हति। एवं पाठक्रमोऽनुगृहीतो भविष्यति। इतरथा पाठक्रमो बाध्येत। तस्मा भूदिति क्रमेणानुष्ठातव्यम् ॥ ३२ ॥ ॥ पूर्व० ॥

## न वाऽसम्बन्धात् ॥ ३३ ॥

न वाऽयं क्रमो नियम्येत। कुतः। असम्बन्धात्। पृथक् पृथगेषां कर्मणां प्रयोगवचनानि । तानि स्वपदार्थानामुपसंहारकाणि। यो यस्य नोपकारकः, स तस्य न क्रमेण, नोत्क्रमेण। यो यस्योपकरोति कस्यचित् तस्योपकुर्वतः क्रमः साहाय्ये वर्त्तते । न चैतानि कर्माणि

अन्योऽन्यस्योपकुर्वन्ति । तस्मान्नैषां क्रमः साहाय्ये वर्त्तते । तस्मा-त्सम्बन्ध इति ॥ ३३ ॥ ॥ सि० ॥

काम्यत्वाच्च ॥ ३४ ॥

काम्यानि चैतानि कर्माणि । कामाश्च न क्रमेणोत्पद्यन्ते । तेन निमित्तस्याक्रमत्वान्न क्रमवन्त इति ॥ ३४ ॥ युक्तिः ॥

आनर्थक्यान्नेति चेत् ॥ ३५ ॥

इति यदुक्तं पूर्वपक्षे, तदेव पुनरुच्यते परिहर्तुम् । एवं क्रमेण पाठोऽर्थवान् भविष्यतीति । एतदाभाषान्तं सूत्रम् ॥३५॥ ॥ आ० ॥

स्याद्विद्यार्थत्वाद्यथा परेषु सर्वस्वारात् ॥ ३६ ॥

स्यादर्थवान् क्रमपाठः । असत्यपि प्रयोगे क्रमे, विद्याग्रहणार्थ-त्वात् {कर्मावबोधनार्थायां विद्यायां क्रमनियमादृष्टं तदाश्रयमेव भ-विष्यतीति । यथा, त्वत्पक्षे परेषु सर्वस्वारात् । यस्यापि क्रमोऽङ्ग-मिति पक्षस्तस्यापि सर्वस्वारात् परेषां सर्वस्वारेण यः क्रमस्तस्या-ऽदृष्टार्थता अवश्यं कल्पनीया ॥ ३६ ॥ ॥ आ० नि० ॥ काम्येष्टीना-मनियमेनानुष्ठानाधिकरणम् ॥ १२ ॥

य एतेनेत्यग्निष्टोमः प्रकरणात् ॥ ३७ ॥

ज्योतिष्टोमे श्रूयते, एष वाव प्रथमो यज्ञानां यज्ज्योतिष्टोमः, य एतेनानिष्ट्वाऽथान्येन यजेत गर्त्तपत्यमेव तज्जायते प्र वा मीयते इति । तत्र सन्देहः । य एतेनेति कस्यायं वाद इति प्रश्नेन एवोपक्रमः । उच्यते । य एतेनेत्यग्निष्टोमस्य वादः । कुतः । प्रकरणात् । तस्य हि प्रकरणे भवत्येतद्वचनम् । प्रकृतवाचीनि च सर्वनामानि भव-न्ति ॥ ३७ ॥ ॥ सि० ॥

लिङ्गाच्च ॥ ३८ ॥

लिङ्गमपि भवति । तत्र श्रूयते । यस्य नवतिशतं स्तोत्रीया इति । अग्निष्टोमस्य हि भवन्ति नवतिशतं स्तोत्रीयाः । कथम् । त्रिवृद्बहिष्पवमानं, पञ्चदशान्याज्यानि, तानि चत्वारि । सा एकोनसप्ततिः । पञ्चदशो माध्यन्दिनः पवमानः । तेन चतुरशीतिः । सप्तदशानि पृष्ठानि, तानि चत्वारि । साऽष्टषष्टिः । चतुरशीत्या सह द्विपञ्चाशच्छतम् । सप्तदश आर्भवः पवमानः । तेन षष्ट्यधिकं शतं नव च । एकविंशं यज्ञायज्ञीयमिति तदेतन्नवतिशतमग्निष्टोमस्य । तस्मा-

दृष्याग्निष्टोमः ॥३८॥ हेतुः॥ यज्ञानामग्निष्टोमपूर्वकताधिकरणम् ॥१३॥

## अथान्येनेति संस्थानां सन्निधानात् ॥ ३९ ॥

अथान्येनेति किं संस्थानां वादः, अथ ज्योतिष्टोमविकाराणामेवैकाहादीनामिति। किं तावत् प्राप्तम्। संस्थानामिति। कुतः। सन्निधानात्। सन्निहिता स्तस्मिन् प्रकरणे संस्थाः। तासां वादः। प्रकरणानुग्रहाय ॥ ३९ ॥ पूर्व० ॥

## तत्प्रकृतेर्वापत्तिविहारौ हि न तुल्येषूपपद्येते ॥ ४० ॥

तत्प्रकृतेर्वा गवादेर्वादः स्यात्। आपत्तिविहारौ हि प्रकृतिविकारमात्रेषूपपद्येते, न तुल्यशब्देष्वेव ज्योतिष्टोमशब्दकेषु। नैवमभिसम्बन्धः क्रियते। अथान्येन ज्योतिष्टोमशब्दकेनेति। कथं तर्हि। अन्येनेति प्रकृतादितरद् ब्रवीति। न स ज्योतिष्टोमेन विशिष्यते। न हि शब्दस्यार्थः समीपगतेन कृतप्रयोजनेनैकदेशेऽवस्थापयितव्यो भवति। न हि वाक्येन श्रुतिर्बाध्यते। अथ, ज्योतिष्टोमादन्येनेत्यभिसम्बद्ध्यते, ततो नतरां संस्थावादः। कथं पुनरापत्तिविहारौ। प्रजापतिर्वा अग्निष्टोमः, स उत्तरानेकाहानसृजतेति सृष्टा अब्रुवन्। न वै स्वेनात्मना प्रभवाम इति। तेभ्यः स्वातन्त्र्यं प्रायच्छत्। तथा च ते प्राभवन् तत्। यथा वा इदमग्नेर्जातादध्यग्नयो विह्रियन्ते। एवं वा, एतस्माद् यज्ञादन्ये यज्ञक्रतवो विह्रियन्ते। यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते, स तं दीपयति, यः पञ्चदशं स तं, यः सप्तदशं स तं, य एकविंशं स तमित्येवमाहुरेको यज्ञ इति। एते वै सर्वे ज्योतिष्टोमा भवन्तीति। एवं वैकृतानां सङ्कीर्त्तनात्, तेषामेव वाद इति गम्यते। कथम्। अथान्येनेति योऽसावन्यस्तत्र प्राकृतान् धर्मान् विहृतान् दर्शयति। अतो मन्यामहे, यस्यातो विहृतिः, तेनान्येनेति ॥४०॥

## प्रशंसा वा विहरणाभावात् ॥ ४१ ॥

यद्येवं न तर्हि तद्विकाराणां वादः। तत्र न विहारो नापत्तिः प्रकरणादिभिः। ते धर्मा ज्योतिष्टोमस्य। यदि हि गवादयो विह्रियेरन् प्रकरणादीनि बाध्येरन्। तदापत्तिः प्रत्यक्षविरुद्धा। प्रशंसा त्वेषा। आपत्तिविहाराभावात् ॥ ४१ ॥ ॥ आ० ॥

## विधिप्रत्ययाद्वा न ह्यकस्मात् प्रशंसा स्यात् ॥४२॥

अत्रोच्यते, यद्यप्यापत्तिविहारौ न विधीयेते, ते तथापि चोद-

केन विधीयेते । ये प्रकृतौ कर्त्तव्यास्ते चोदकवचनाद् विकृतावपि कर्त्तव्या गम्यन्ते । तदापत्तिविहाराविव यत्र भवतस्तेनान्येनेति गम्यते । न हि अकस्मात् प्रशंसा स्यात् । योऽसावन्यः, स कथमनया प्रशंसया लक्ष्येतेत्येवमर्था प्रशंसा ॥ ४२ ॥ आ० नि० ॥ ज्योतिष्टोमविकाराणामग्निष्टोमपूर्वकताधिकरणम् ॥ १४ ॥

## एकस्तोमे वा क्रतुसंयोगात् ॥ ४३ ॥

य एतेनानिष्ट्वा, अथान्येन यजेतेति श्रूयते । तत्र एषोऽर्थः समधिगतः । तद्विकाराणां वाद इति । अथेदानीं सन्दिह्यते । किमेकस्तोमकस्य, अनेकस्तोमकस्य चेति । किं प्राप्तम् । एकस्तोमकस्य वादः । कुतः । क्रतुसंयोगात् । एकस्तोमे क्रतुसंयोगो भवति । यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति, यः पञ्चदशं स तं, यः सप्तदशं स तं, यः एकविंशं स तम् । त्रिवृदादय एकस्तोमकाः । तस्मात् तेषां वाद इति ॥ ४३ ॥ ॥ पूर्व० ॥

## सर्वेषां वा चोदनाविशेषात् प्रशंसा स्तोमानाम् ॥ ४४ ॥

सर्वेषां चैष वादः, एकस्तोमकानामनेकस्तोमकानां च । कुतः । अविशेषवचनादन्यशब्दस्य । नन्वेकस्तोमकाः क्रतवः सङ्कीर्त्यन्ते । सत्यं सङ्कीर्त्यन्ते । प्रशंसार्थं, न विशेषार्थम् । कः पुनः प्रशंसार्थः । यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तं दीपयति, चोदकप्राप्ता धर्मा अभ्यस्ताः प्रकृतौ, विकृतौ सुखं प्रतिपद्यन्ते ॥ ४४ ॥ ॥ सिद्धान्तः ॥ सर्वेषामेकानेकस्तोमकानामग्निष्टोमपूर्वकताधिकरणम् ॥ १५ ॥ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये पञ्चमस्याध्यायस्य तृतीयः पादः ॥ ५ ॥ ३ ॥

### अथ पञ्चमे अध्याये चतुर्थः पादः ॥ ५ ॥ ४ ॥

## क्रमको योऽर्थशब्दाभ्यां श्रुतिविशेषादर्थपरत्वाच्च ॥ १ ॥

इह पाठक्रमस्य श्रुत्यर्थक्रमाभ्यां सह बाधां प्रति विचारणम् । किं पाठक्रमस्ताभ्यां तुल्यः, उत बाध्यते इति । किं प्राप्तम् । तुल्यबलावेतौ । पाठोऽपि हि कारणं श्रुत्यर्थावपि । न च प्रामाण्ये कश्चिद् विशेषोऽस्ति । तस्मादनियम इति । एवं प्राप्ते ब्रूमः । पाठक्रमो हि बाध्यते श्रुत्या अर्थेन च । कुतः । श्रुतिविशेषाद् अर्थपरत्वाच्च । श्रु-

तिविशेषः कः । यत्र श्रवणं तत्र प्रत्यक्षं कारणम् । पाठक्रमस्त्वानुमानिकः । पाठक्रमेण स्मरणम् । एवमभिनिर्वर्त्तयितव्यमित्यवगम्यते। तस्यार्थवत्त्वेनैकयोपपत्त्या तस्यैवानुष्ठानं, श्रुत्या पुनरनुष्ठानमेव। एवं भवतीति प्रत्यक्षादवगम्यते । तथाऽर्थेन । कुतः ? । अर्थपरत्वात् । अर्थार्थं हि सर्वं प्रधानार्थं, प्रधानमभिनिर्वर्त्तयतीति सर्वं क्रियते । तस्मात् पाठस्ताभ्यां बाध्यते ॥ किमुदाहरणं प्रयोजनं च । श्रुत्याम्, आश्विनो दशमो गृह्यते, तं तृतीयं जुहोति । अत्र पाठक्रमस्य बलीयस्त्वे तृतीयस्य ग्रहणं, सिद्धान्ते तु दशमस्य । अर्थे, अग्निहोत्रहोमः पूर्वमाम्नायते, पश्चाच्छ्रपणम् । एवं कर्त्तव्यं, यदि पाठो बलवान् । सिद्धान्ते श्रपणं पूर्वं, ततो होमः ॥ १ ॥ ॥ पाठक्रमापेक्षया श्रुत्यर्थयोर्बलवत्त्वाधिकरणम् ॥ १ ॥

## अवदानाभिघारणासादनेष्वानुपूर्व्यं प्रवृत्त्या स्यात् ॥ २ ॥

स्तो दर्शपूर्णमासौ । तत्र पूर्वं दध्नो धर्माः समाम्नाताः, पश्चादाग्नेयस्य । प्रदानं चाग्नेयस्य पूर्वम् । तत्र सन्देहः । किं प्रावृत्तिकेन क्रमेण पूर्वं दध्नोऽवदानाभिघारणासादनानि, उत मुख्यक्रमेण पूर्वमाग्नेयस्येति । किं प्राप्तम् । अनियम इति । एवं प्राप्ते ब्रूमः । अवदानादिषु प्रावृत्तिकेन पूर्वं दध्न इति । कुतः । एवमनुज्ञातेभ्यो व्यवधायकेभ्यो नाभ्यधिकोऽन्यो वा व्यवधायकः कल्पितो भविष्यति। दर्शयति च दध्नः पूर्वमेव देयमिति ॥ २ ॥ ॥ पूर्व० ॥

## यथाप्रदानं वा तदर्थत्वात् ॥ ३ ॥

यथाप्रदानं वा कर्तव्यानि। यस्य प्रदानं पूर्वं तस्यावदानानि पूर्वम् । तस्माद् आग्नेयस्य । कुतः । प्रदानचोदनागृहीतत्वाद् अवदानादीनाम् । प्रदानोपक्रमा एते, न पृथक्पदार्था एते इत्युक्तम् । अभिघारणमवदानं च तस्य प्रदानचिकीर्षयैव क्रियते । आसादनमपि प्रदानार्थमेव आसन्नकरणम् । एवं दृष्टार्थता भवति । तस्मान्मुख्यक्रमेणाऽङ्गानां प्रयोग इति ॥ यत्तु दध्नः पूर्वं प्रवृत्तिरिति । अर्थात् पूर्वं प्रवृत्तिः, न पाठात् । प्रावृत्तिकाच्च मुख्यक्रमो बलीयान्, मुख्यक्रमे गृह्यमाणे प्रथम एकः पदार्थो विप्रकृष्टकालः स्यात् । प्रावृत्तिके पुनर्गृह्यमाणे सर्वेषां विप्रकर्षः । तस्मान्मुख्यक्रमो बलीयानिति। अथ यल्लिङ्ग-

मुक्तं, दध्नः पूर्वमवदेयमिति । अत्रोच्यते । श्रुताभिप्रायमेतद् भविष्यति । तस्माददोषः ॥ ३ ॥ ॥ सि० ॥

## लिङ्गदर्शनाच्च ॥ ४ ॥

लिङ्गमप्यस्मिन् अर्थे भवति । स वै ध्रुवामेवाग्रेऽभिघारयाति, ततो हि प्रथमावाज्यभागौ यक्ष्यन् भवतीति । तस्मादपि मुख्यक्रमेण नियम इति ॥४॥ ॥ युक्तिः॥मुख्यक्रमेणाग्नेयस्य पूर्वमवदानाद्यनुष्ठानाऽधिकरणम् ॥ २ ॥

## वचनादिष्टिपूर्वत्वम् ॥ ५ ॥

इष्टिपूर्वत्वं समाम्नातम् । तत्र सन्देहः । किमिष्टिपूर्वत्वं, सोमपूर्वत्वं वा विकल्पः, अथवा इष्टिपूर्वत्वमेवेति । किं प्राप्तम् । इष्टिपूर्वत्वमेव स्यात् । कुतः । वचनात् । वचनमिदं भवति । एष वै देवरथो यद्दर्शपूर्णमासौ, यो दर्शपूर्णमासाविष्ट्वा सोमेन यजते, रथस्पष्ट एवावसाने वरे देवानामवस्यतीति । नास्ति वचनस्यातिभारः । तस्मादिष्टिपूर्वत्वमेवेति ॥ ५ ॥ युक्तिः ॥

## सोमश्चैकेषामग्न्याधेयस्यर्तुनक्षत्रातिक्रमवचनात्तदन्तेनानर्थकं हि स्यात् ॥ ६ ॥

इष्टिपूर्वत्वमित्येतद् गृह्णीमः । किन्तु सोमश्चैकेषां पुरो दर्शपूर्णमासयोः स्यात् । कुतः । अग्न्याधेयस्य ऋतुनक्षत्रातिक्रमवचनात् । यः सोमेन यक्ष्यमाणोऽग्नीनादधीत, नर्तुं स प्रतीक्षेद् न नक्षत्रमिति । यः सोमयागं क्रतुमादधीत, स न प्रतीक्षेत नक्षत्रं नाप्यृतुं तावत्येवादधीतेति आनन्तर्यमुच्यते । इतरथा, ऋतुनक्षत्रातिक्रमवचनमनर्थकं स्यात् । आनन्तर्येऽनपेक्ष्यमाणे यस्यैव ऋतुनक्षत्रे उक्ते तस्यैव तयोरनादरः कीर्त्तितः स्यात् । तस्मादस्ति सोमाधानयोरानन्तर्यमिति । अपि च विस्पष्टा चाद्यतनी विभक्तिः, सोमेन यक्ष्यमाण इति । सा च न इष्टिपूर्वत्वमनुज्ञाय विवक्ष्यते, न तदाऽद्यतनकालविवक्षा । तत्रायं शब्दो विप्रतिषिद्ध्येत । तस्माद् आनन्तर्यविवक्षेत्यवगम्यते ॥६॥ सि०

## तदर्थवचनाच्च नाविशेषात्तदर्थत्वम् ॥ ७ ॥

इतश्च सोमाधानयोरानन्तर्यम् । कुतः । तदर्थवचनात् । यः सोमेन यजेत सोऽग्निमादधीतेति च सर्वैरप्यसौ यक्ष्यमाणोऽग्निमाधत्ते सोमेन अग्निहोत्रादिभिश्च । न असति सोमस्य विशेषे सोमार्थता

स्यात् । अयमसौ विशेषः स्यात् । यदानन्तर्य्यं सोमाधानयोरिति ॥७॥

### अयक्ष्यमाणस्य च पवमानहविषां कालनिर्देशा-दानन्तर्य्याद्विशङ्का स्यात् ॥ ८ ॥

सोमेन अयक्ष्यमाणस्य च पवमानहविषां कालो निर्दिश्यते । यः सोमेन अयक्ष्यमाणोऽग्निमादधीत, स पुरा संवत्सराद् हवींषि निर्वपेदिति । न खलु कश्चिदयक्ष्यमाणः । सर्वस्य विहितत्वात् । तस्मादनन्तरमयक्ष्यमाण इति गम्यते ॥ ८ ॥ युक्तिः ॥

### इष्टिरयक्ष्यमाणस्य तादर्थ्ये सोमपूर्वत्वम् ॥ ९ ॥

इदं प्रयोजनसूत्रं वर्ण्यते । क्षीणमधिकरणम् । किं प्रयोजनं चिन्तायाः । इष्टिरयक्ष्यमाणस्य सोमेन निरभिसन्धिके आधाने तदर्थत्वे तु सोमपूर्वत्वम् । सोमार्थतायां त्वाधानस्य सोमपूर्वत्वं स्यात् ॥ ॥ ९ ॥ ॥ इष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् ॥ ३ ॥

### उत्कर्षाद् ब्राह्मणस्य सोमः स्यात् ॥ १० ॥

अस्ति आधानं, तत्रैषोऽर्थः समधिगतः । इष्टिपूर्वत्वं सोमपूर्वत्वं चेति । इदानीं सन्देहः । किं त्रयाणां वर्णानामिष्टिपूर्वत्वं सोमपूर्वत्वं वा, उत ब्राह्मणस्य सोमपूर्वत्वमेव, उत केवला पौर्णमासी उत्कृष्यते, ब्राह्मणस्य उभौ कल्पौ ? इति । अथ वा कर्मान्तरमिदं यदूर्ध्वं सोमात् । अथवैकं हविरुत्कृष्यते, ब्राह्मणस्योभावेव कल्पाविति । किं प्राप्तम् । त्रयाणां वर्णानामिष्टिपूर्वत्वं सोमपूर्वत्वं वा । कुतः ? । अविशेषात् । न कश्चिद् विशेषमवगच्छामः । एवं प्राप्ते ब्रूमः । ब्राह्मणस्य सोमपूर्वत्वं स्यात् । कस्मात् । उत्कर्षात् । उत्कर्षो हि श्रूयते । आग्नेयो वै ब्राह्मणो देवतया, स सोमेनेष्ट्वा अग्नीषोमीयो भवति । यदेवादः पौर्णमासं हविस्तत्र हि अनुनिर्वपेत् । तर्हि उभयदेवत्यो भवतीति । किमिव हि वचनं न कुर्यात् । तस्माद् ब्राह्मणस्य सोमपूर्वत्वमेवेति ॥ १० ॥ ॥ पूर्व० ॥

### पौर्णमासी वा श्रुतिसंयोगात् ॥ ११ ॥

यदुक्तं, ब्राह्मणस्य सोमपूर्वत्वमेवेति । तन्न । तस्याप्युभौ कल्पौ । कुतः । अविशेषात् । न हि कल्पयोर्ब्राह्मणस्य कश्चिद्विशेष आम्नायते । नन्विदानीमेवोक्तं, ब्राह्मणस्योत्कर्ष इति । नेति ब्रूमः । पौर्ण

मासीमात्रस्य तत्रोत्कर्षः । श्रुतिसंयोगः पौर्णमास्याः । तत्र यदेवाद: पौर्णमासं हविरिति । यावद्वचनं वाचनिकं, तत्र न न्यायः क्रमते। तुल्ययोरेकदेशे उत्कृष्टे नूनमपरोऽप्येकदेश उत्कृष्यते इति ॥११॥ सि०॥

## सर्वस्य वैककर्म्यात् ॥ १२ ॥

यदुच्यते केवला पौर्णमासी उत्कृष्यत इति । तन्न । कृत्स्नस्य दर्शपूर्णमासकर्मण उत्कर्षः । एवं फलेन सम्बन्धः । इतरथा न स्यात् फलम् । एकदेशत्वात् पौर्णमास्याः केवलायामुत्कृष्यमाणायामवशिष्टस्य पूर्वत्र क्रियमाणस्य न फलं स्यात् । एकदेशत्वाद् अफलत्वाच्चोक्तमपि न क्रियेत । समुदाये चोत्कृष्यमाणे भवति फलम् । तस्माद् अर्थात् समुदायस्योत्कर्षः, एवं कृत्स्नोपदेशोऽर्थवान् भविष्यतीति। तस्मात् सर्वस्योत्कर्षः । सोमपूर्वत्वमेव ब्राह्मणस्येति ॥ १२ ॥

## स्याद्वा विधिस्तदर्थेन ॥ १३ ॥

नैतदस्ति, यदेवं समुदायस्यासति वचने उत्कर्षः परिकल्प्येत, तस्मादन्यदेवैवन्नामकं कर्म ऊर्ध्वं सोमात् स्यात् । एवम् एकांशस्याश्रुते फलं न कल्पयितव्यं भविष्यति । नामधेयन्तु द्वयोः कर्मणोरेकम् । अक्षाः पादाः माषा इति । यथा पौर्णमासधर्मकं वा कर्मान्तरं चोद्यते इति कर्मविधानं, श्रुतेरेतद् भवति । तद् वाक्यस्य बाधकम् । तस्मात् कर्मान्तरमिति ॥ १३ ॥ ॥ पूर्व० ॥

## प्रकरणात्तु कालः स्यात् ॥ १४ ॥

कर्मान्तरस्यैतद्वाचकमिति प्रमाणाभावः । प्रकृतस्य कर्मणो वाचकमिति प्रत्यक्षम्।यच्च सप्रमाणकं, तद् ग्राह्यम्। अन्यायश्चानेकार्थत्वम् । धर्मग्रहणे लक्षणाशब्दः श्रुतिसम्भवे कल्प्यः स्यात् । अपि चास्य रूपं न गम्यते । रूपावचनान्न कर्मान्तरम् । तस्मात् प्रसिद्धेन नाम्ना प्रकृतस्य कर्मणो ग्रहणं कालविधानार्थं स्यात् । फलवत्त्वाच्च कृत्स्नस्योत्कर्षः।ब्राह्मणस्य च तथैव । यत्तु, श्रुतिर्वाक्याद् बलीयसीति । अत्रोच्यते । यत्र फलं न श्रूयते, वाक्यार्थोऽपि तावत् तत्र गृह्यते । न चेह फलस्य श्रवणमस्ति । कल्प्यं फलमिति यद्युच्यते, न तत् फलवचनमन्तरेण । तत्र फलवचनः शब्दः कल्प्येत । तेन च सहैकवाक्यता कालवचनेन तु सह प्रत्यक्षेणैकवाक्यतेति । तस्मान्न कर्मान्तरम् । स्थितं तावदपर्यवसितमधिकरणम् ॥ १४ ॥ ॥ सि० ॥

ब्राह्मणस्यापीष्टिसोमयोः पौर्वापर्यानियमाधिकरणम् ॥ ४ ॥

## स्वकाले स्यादविप्रतिषेधात् ॥ १५ ॥

यः सोमेन यक्ष्यमाणोऽग्निमादधीत, नर्तुं स प्रतीक्षेद् न नक्षत्रमिति। अत्र सन्देहः। किमाधानस्यायं कालविशेषबाधः, उत सोमस्येति। किं प्राप्तम्। आधानस्य कालबाधः। स्वकाले स्यात् सोमः। कुतः। अविप्रतिषेधात्। अङ्गमाधानम्। तस्य कालबाधो न्याय्यः, न प्रधानस्य। अङ्गगुणविरोधे च तादर्थ्यादिति वक्ष्यते ॥ १५ ॥ पूर्व० ॥

## अपनयो वाऽऽधानस्य सर्वकालत्वात् ॥ १६ ॥

अपनयो वा आधानात् सोमकालस्य स्यात्। कुतः। आधानस्य सर्वकालत्वात्। नैवाधाने कश्चित् कालनियमोऽस्ति, यदहरेवैनं श्रद्धोपनमेत् तदहरादधीत इति। अप्राप्तमेव तदाधानस्य। यत् प्रतिषिध्यते। तस्मात् सोमस्य कालबाध इति ॥ १६ ॥

## पौर्णमास्यूर्ध्वं सोमाद् ब्राह्मणस्य वचनात् ॥ १७ ॥

स्थितादुत्तरम्। न वा एतदस्ति। कृत्स्नौ दर्शपूर्णमासौ उत्कृष्येते। ऊर्ध्वं सोमात्। केवला पौर्णमासी उत्कृष्यते। कुतः। वचनात्। वचनमिदम्। यदेवादः पौर्णमासं हविस्तत्तर्ह्यनुनिर्वपेदिति। नास्ति वचनस्यातिभारः। तस्मात् पौर्णमासीमात्रमुत्कृष्येत। यत्तु फलं नास्तीति। समुदायादेव फलं भविष्यतीति। वचनादेवं विज्ञानात्। तस्माददोषः ॥ १७ ॥

## एकं शब्दसामर्थ्यात् प्राक् कृत्स्नविधानात् ॥ १८ ॥

एकं वा हविरुत्कृष्येत, न कृत्स्ना पौर्णमासी। कुतः। शब्दसामर्थ्यात्। एकं हविरुत्कष्टुं, शब्दः समर्थः। यदेवादः पौर्णमासं हविरिति श्रूयते। यावद्वचनं वाचनिकं, ताद्वचनेनोत्कष्टुं शक्यते, नान्यदपि। प्राक् सोमात् कृत्स्नं विधीयते। ततो यद् वचनेनोत्कृष्यते, तदूर्ध्वं सोमात्, यन्नोत्कृष्यते, तत् प्राग्भवितुमर्हति। तस्मादेकं हविरुत्कष्टव्यम्। ब्राह्मणस्योभौ कल्पाविति ॥ १८ ॥ ॥ सि० ॥ नर्तुं प्रतीक्षेदित्यादिना सोमकालबाधाधिकरणम् ॥ ५ ॥

## पुरोडाशस्त्वनिर्देशे तद्युक्ते देवताभावात् ॥ १९ ॥

इदं श्रूयते। आग्नेयो वै ब्राह्मणो देवतया स सोमेन इष्ट्वा अग्नीषोमी-

यो भवति । यद्देवादः पौर्णमासं हविस्तत्तह्यनुनिर्वपेत् । तर्ह्युभय-देवत्यो भवतीति । यस्मात् तस्मिन् काले सोऽग्नीषोमीयो भवति, न प्राचीने काले, तस्माद् अदो हविरनुनिर्वपेदिति । अग्नीषोमीयत्वं विधाय द्विदेवताकत्वं हेतुत्वेन निर्दिश्यते । तस्मादग्नीषोमीयं हवि-र्हेतुमत् स्यात्, नान्यदेवताकम् । तदा असौ अग्नीषोमौ यष्टुमर्हति, न प्राक्। सास्य देवता इति भवति पुरुषस्यापि यष्टुर्देवताभिसम्बन्धः। तस्मात् पुरोडाशोऽग्नीषोमीयो, नान्यद्धविरिति सिद्धम् ॥१९॥ सि०॥

## आज्यमपीति चेत् ॥ २० ॥

इति चेत् पश्यसि अग्नीषोमीयत्वात् पुरोडाश इति । आज्यम-पि हि अग्नीषोमीयम् । तस्मात् तदप्युत्कृष्येत ॥ २० ॥ आ० ॥

## न मिश्रदेवतत्वादैन्द्राग्नवत् ॥ २१ ॥

मिश्रदेवतं हि आज्यम् अग्नीषोमीयं प्राजापत्यं, वैष्णवमिति च। पुरोडाशस्त्वग्नीषोमीय एव । न त्वत्र मिश्रदेवतस्य वादः । मिश्र-देवतस्य हि प्रागपि भावोऽवकल्प्यते । यद्यपि तदानीं यजमानो ना-ऽग्नीषोमीयस्तद्देवतार्हः, तथापि आज्यं हविः करिष्यत्येव । प्रजापतिं यक्ष्यति, विष्णुं वा । तस्मात् तस्योर्ध्वभावे न एष हेतुरग्नीषोमीयत्वं नाम । यथा चतुर्धाकरणं मिश्रदेवतत्वादैन्द्राग्ने न भवति, तद्वत्तत्र आग्नेय इति ऐन्द्राग्नो न शक्यते वदितुम् । तद्धितः साकाङ्क्षान्नो-त्पद्यते इति । एवमिहाऽग्नीषोमीयशब्देन न शक्यमाज्यं वदितुम्। अग्नीषोमीयो हि असौ । तस्माच्छक्यं प्राग् यजमानेन कर्तुमिति। त-स्मान्न तस्योत्कर्षेऽग्नीषोमीयता यजमानस्य हेतुरिति । मिश्रदेवतस्य ग्रहणसामान्यादैन्द्राग्नवदित्युक्तम् ॥ २१ ॥ आ० नि० ॥ आज्यस्य सोमादनुत्कर्षाधिकरणम् ॥ ६ ॥

## विकृतेः प्रकृतिकालत्वात् सद्यस्कालोत्तरा विकृति-स्तयोः प्रत्यक्षशिष्टत्वात् ॥ २२ ॥

इह वैकृतानि कर्माण्युदाहरणम् । ऐन्द्राग्नमेकादशकपालं निर्वपेदित्येवमादीनि । तत्र सन्देहः । किमेता विकृतयः सद्यस्कालाः, उत द्व्यहकालाः ? इति । किं प्राप्तम् । विकृतिः प्राकृतान् धर्मांश्चोद-केन गृह्णाति। अतस्ते धर्मा आनुमानिकाः । पौर्णमासी चान्यः कालः। स यदि वा प्रकृत्या गृह्येत, यदि वा विकृत्या, असम्भवेऽन्यतरस्याः

कालस्यकव्यः तत्रानुमानिको वैकृतस्य त्यज्यतां, न प्रत्यक्षश्रुतः प्राकृतस्येति न्याय्यम् । तस्मात् सद्यस्काला एता विकृतयो भवेयुरिति ॥ २२ ॥ ॥ सि० ॥

## द्वैयहकाल्ये तु यथान्यायम् ॥ २३ ॥

द्वैयहकाल्ये क्रियमाणे यथान्यायं कृतं भवति । तस्माद् द्वैयहकाल्यं स्यात् । चोदकस्तथाऽनुगृहीतो भवति । प्रकृतौ हि श्रूयते । पूर्वेद्युरग्निं गृह्णाति । उत्तरमहर्देवतां यजेतेति । तस्माद् द्व्यहकालमेकमभिनिर्वर्त्य, तदहरेवोपक्रम्यापरेद्युः परिसमापयेत् ॥२३॥ ॥पूर्व०

## वचनाद्वैककाल्यं स्यात् ॥ २४ ॥

नैतदेवं, द्व्यहकाला विकृतयो भवेयुरिति । सद्यस्कालाः स्युः । कस्मात् । वचनमिदं भवति, य इष्टया पशुना सोमेन आग्रयणेन वा यक्ष्यमाणः स पौर्णमास्याममावास्यायां वा यजेतेति । साङ्गस्यैतद्वचनम् । तस्मात् साङ्गं पौर्णमास्याममावास्यायां वा कुर्वीतेति गम्यते । तेन सद्यस्काला विकृतयः ॥ २४ ॥ उत्तरम् ॥ विकृतानामैन्द्राग्नादीनां सद्यस्कालताधिकरणम् ॥ ७ ॥

## सान्नाय्याग्निषोमीयविकारा ऊर्ध्वं सोमात् प्रकृतिवत् ॥ २५ ॥

इह सान्नाय्यविकाराश्च अग्नीषोमीयविकाराश्च उदाहरणम् । सान्नाय्यविकारास्तावत् । यथा, आमिक्षा पशुरिति, अग्नीषोमीयमेकादशकपालं, निर्वपेच्छ्यामाकं, ब्राह्मणो वसन्ते ब्रह्मवर्चसकाम इत्येवमादयः । तत्र सन्देहः । किमेते प्रागूर्ध्वं च सोमात् । उत ऊर्ध्वमिति । किं प्राप्तम् । प्रागूर्ध्वं च विशेषानवगमात् । एवं प्राप्ते ब्रूमः । ऊर्ध्वं सोमात् स्युरिति । प्रकृतिर्हि एषामूर्ध्वं सोमात् । चोदकेन एभिरपि ऊर्ध्वं सोमाद् भवितव्यम् । सान्नाय्यस्योर्ध्वं सोमाद् वचनेन, असोमयाजी सन्नयेदिति । अग्नीषोमीयस्यापि, आग्नेयो ब्राह्मणो देवतया स सोमेन इष्ट्वा भवति, यदेवादः पौर्णमासं हविः, तत्तर्ह्यनुनिर्वपेदिति, तर्हि स उभयदेवत्यो भवतीति । तद्विकृतिरपि सोमादूर्ध्वं भवितुमर्हति ॥ २५ ॥ सोमात् सान्नाय्यविकारादीनामुत्कर्षाधिकरणम् ॥ ८ ॥

## तथा सोमविकारा दर्शपूर्णमासाभ्याम् ॥ २६ ॥

सोमविकारा गवादय एकाहाः । तेषु सन्देहः । किं दर्शपूर्णमासात् प्रागूर्ध्वं च प्रयोक्तव्याः, उत ऊर्ध्वमिति ? । किं प्राप्तम् ?। अनियमः, अविशेषात् । एवं प्राप्ते ब्रूमः । तथा सोमविकारा दर्शपूर्णमासाभ्यामूर्ध्वं स्युः । ज्योतिष्टोमो दर्शपूर्णमासाभ्यामूर्ध्वं भवति। दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति । चोदकेनैष धर्मो गवादिष्वप्येकाहेषु प्राप्नोति । तस्मात् तेऽपि दर्शपूर्णमासाभ्यामूर्ध्वं कर्त्तव्या इति ॥ २६ ॥ सोमविकाराणां दर्शपूर्णमासात् पूर्वं कर्त्तव्यताऽधिकरणम् ॥९॥ इति श्रीशबरस्वामिकृतौ मीमांसाभाष्ये पञ्चमस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ ५ ॥ ४ ॥ समाप्तश्च पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठे अध्याये प्रथमः पादः ॥ ६ ॥ १ ॥

## द्रव्याणां कर्म्मसंयोगे गुणत्वेनाभिसम्बन्धः ॥ १ ॥

दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येवमादि समाम्नायते । तत्र सन्देहः । किं स्वर्गो गुणतः, कर्म प्रधानतः । उत कर्म गुणतः, स्वर्गः प्रधानत इति । कुतः संशयः। इह स्वर्गकामोऽपि निर्दिश्यते, यजेतेत्यपि । अत्र स्वर्गकामयागयोः सम्बन्धो गम्यते। तस्मिँश्च सम्बन्धे किं यागः साधनत्वेन सम्बद्ध्यते, उत साध्यत्वेनेति भवति विचारणा ॥

तत्र यदि स्वर्गकामस्य पुरुषस्य यागः कर्त्तव्यतया चोद्यते, स्वर्गकामेन यागः कर्त्तव्य इति, स्वर्गेच्छाविशिष्टस्य स सिद्ध्यतीति गम्यते । स्वर्गेच्छा तत्र पुरुषस्य यागं प्रत्युपदिश्यते । तेन तस्य स सिद्ध्यति, नान्यस्य इति । यः स्वर्गकामः, स शक्नोति पुरुषो यागं साधयितुम् ॥ अथ स्वर्गकामस्य कामः कर्त्तव्यतया चोद्यते, ततो यागविशिष्टा कर्त्तव्यतेति यागः साधकोऽभ्युपगम्यते । स चायमुभयोरप्यर्थ एतस्मादुच्चरिताद्वाक्याद् गम्यते । यागो वा कर्त्तव्यः, कामो वेति । न चैतद् यौगपद्येन सम्भवति । यदा कामो, न तदा यागः । यदा यागो, न तदा कामः । वचनव्यक्तिभेदादुपपन्नः संशयः ॥

तथेदमपरं सन्दिग्धम् । किं प्रीतिः स्वर्गः ? उत द्रव्यमिति । यदि द्रव्यं स्वर्गस्ततः प्रधानं कर्म, द्रव्यं गुणभूतम् । अथ प्रीतिः स्वर्गस्ततो यागो गुणभूतः, स्वर्गः प्रधानम् ? इति । कुतः संशयः। नास्त्यत्र कामस्य गुणत्वेन प्राधान्येन वा श्रुतिः । सम्बन्धमात्रं त्वस्य

यागेन गम्यते । द्रव्यस्य तु कर्मार्थता स्वभावतः । पुरुषप्रयत्नस्य च फलार्थता ॥ किं तावत् प्राप्तम् । स्वर्गो गुणतः, कर्म प्रधानत इति । तत्र तावद्वर्णयन्ति । द्रव्यं स्वर्ग इति । कथमवगम्यते । सर्वेषामेव शब्दानामर्थज्ञाने लौकिकः प्रयोगोऽभ्युपायः । तस्मिंश्च लौकिके प्रयोगे द्रव्यवचनः स्वर्गशब्दो लक्ष्यते । कौशिकानि सूक्ष्माणि वासांसि स्वर्गः, चन्दनानि स्वर्गः, द्व्यष्टवर्षाः स्त्रियः स्वर्ग इति । यद् यत् प्रीतिमद् द्रव्यं, तत्तत् स्वर्गशब्देनोच्यते । तेन सामानाधिकरण्यात् प्रीतिमद् द्रव्यं स्वर्ग इति मन्यामहे । उपमानाच्छब्दप्रवृत्तिरिति चेत् । न हि कस्मिँश्चिदनुपमिते लोके प्रसिद्धः, यस्यैतदुपमानं स्यात् । तस्मान्नोपमानम् । अतो द्रव्यं स्वर्ग इति ॥ नेत्याह । प्रीतिः स्वर्ग इति । न द्रव्यम् । व्यभिचारात् । तदेव हि द्रव्यं कस्याञ्चिदवस्थायां न स्वर्गशब्दोऽभिदधाति । प्रीतिं तु कस्याञ्चिदवस्थायां न नाऽभिदधाति । तस्मादन्वयव्यतिरेकाभ्यामेतदवगम्यते— प्रीतौ स्वर्गशब्दो वर्त्तते इति ॥ नैतदस्ति, प्रीतेरभिधायकः स्वर्गशब्द इति। कुतः । विशेषणत्वात् । यद् विशेषणं, न तच्छब्देनोच्यते । तद् यथा, दण्डीति दण्डनिमित्तः पुरुषवचनः । दण्डोऽस्य निमित्तं, नाभिधेयः। एवमेष न प्रीतिवचनः । प्रीतिसाधनवचनस्त्वेष स्वर्गशब्द इति ॥ ननु स्वर्गशब्दो लोके प्रसिद्धो विशिष्टे देशे । यस्मिन्नोष्णं, न शीतं, न क्षुद्, न तृष्णा, न अरतिः, न ग्लानिः, पुण्यकृत एव प्रेत्य तत्र गच्छन्ति, नान्ये । अत्रोच्यते । यदि तत्र केचिदमृत्वा गच्छन्ति, तत आगच्छन्ति अजनित्वा, तर्हि स प्रत्यक्षो देश एवञ्जातीयको, न त्वनुमानाद् गम्यते ॥ ननु चान्ये सिद्धाः केचिद् दृष्टवन्तः, ते चाऽऽख्यातवन्त इति चेद् । न तत्र प्रमाणमस्ति, सिद्धा एवञ्जातीयकाः सन्ति, ते च दृष्ट्वाऽऽचक्षीरन्निति । तस्मादेवञ्जातीयको देश एव नास्ति ॥ ननु च लोकादाख्यानेभ्यो वेदाच्चावगम्यते, देश एवञ्जातीयकः स्वर्ग इति । तन्न । पुरुषाणामेवंविधेन देशेनाऽसम्बन्धादऽप्रमाणं वचः । आख्यानमपि पुरुषप्रणीतत्वादनादरणीयम् । वैदिकमपि स्वर्गाख्यानं विधिपरं नास्त्येव । भवति तु विध्यन्तरेणैकवाक्यभूतं स्तुतिपरम् । यद्यपि केवलसुखश्रवणार्थापत्त्या तादृशो देशः स्यात्, तथाप्यस्मत्पक्षस्याविरोधः । प्रीतिसाधने स्वर्गशब्द इति । तेन देशेन व्यवहाराभावात् कुतस्तस्याभिधायकः स्वर्गशब्दो भविष्यती-

ति । यदा प्रीतिमद् द्रव्यं स्वर्गस्तदा ब्रूमः । द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्ध इति । यागोऽत्र कर्त्तव्य इति श्रूयते स्वर्गकामस्य । तत्रावश्यं स्वर्गस्य यागस्य च सम्बन्धः । तत्र भूतं द्रव्यम्। भव्यं कर्म । भूतस्य च भव्यार्थता न्याय्या । दृष्टार्थत्वात् । न तु भव्यस्य भूतार्थता । तत्र दृष्ट उपकारस्त्यज्येत ॥ कथं पुनरवगम्यते, यागः कर्त्तव्यतया चोद्यते इति । यदा कामस्यापि कर्त्तव्यताऽस्माद् वाक्याद् अवगम्यते, उच्यते, कामस्य कर्त्तव्यता वाक्यात् । यज्यर्थस्य कर्त्तव्यता श्रुतेः । श्रुतिश्च वाक्याद् बलीयसी । तस्मादयमर्थः। स्वर्गकामो यागं कुर्यादिति । स्वर्गकामस्य यागः कर्त्तव्य इति। कर्त्तव्यश्च सुखवान् । स्वकर्त्तव्यो दुःखवान् । कर्त्तव्य इति चैनं ब्रूते। तस्मात् सुखफलो यागो भविष्यति, स तु यस्येच्छा तस्य सिद्ध्यति, नान्यस्येति गम्यते । तेन स्वर्गेच्छा यागस्य गुणभूता । स्वर्गस्यापि कर्मणो द्रव्येच्छा भवति गुणभूता । तया द्रव्यमानेतुं यतते दृष्टेनैव द्वारेण । इह तु स्वर्गसंज्ञकद्रव्येच्छैव नियम्यते । यथैव सा गुणभूता प्राप्ता । तथैव सती नियम्यते, दृष्टेनैव द्वारेण, नादृष्टेनोपकारेण । तेन स्वर्गेच्छया गुणभूतया स्वर्गद्रव्यं प्रति यतिष्यते यागं साधयितुम्। अथाप्यदृष्टेन तथापि न दोषः ॥ १ ॥ पूर्व० ॥

## असाधकं तु तादर्थ्यात् ॥ २ ॥

तुशब्देन पक्षो व्यावर्त्यते । तत एतावत् तावद् वर्णयन्ति, प्रीतिः स्वर्ग इति । कुतः । एवमुक्तं भवता । प्रीतिविशिष्टे द्रव्ये स्वर्गशब्दो वर्त्तते इति । यद्येवं, पूर्वं तर्हि प्रीतौ वर्त्तितुमर्हति । तां हि स न व्यभिचरति । व्यभिचरति पुनर्द्रव्यम् । यस्यैवं प्रीतिसाधनस्य द्रव्यस्य वक्ता स्वर्गशब्दस्तदेवं यदा न प्रीतिसाधनं भवति, तदा न स्वर्गशब्देनाभिधीयते । तस्मात् प्रीतिवचनोऽयम् । यत्तूक्तं दण्डिशब्दवदिति । सोऽपि प्रतीते शब्दाद्दण्डे, दण्डिनि प्रत्ययमादधाति । अन्तर्गतस्तत्र दण्डशब्दः । स दण्डस्य वाचकः । इह पुनः स्वर्गशब्द एव प्रीतेरभिधाता ॥ प्रीतिवचनश्चेद् यागो गुणभूतः, प्रीतिः प्रधानम । कुतः । तादर्थ्यात् पुरुषप्रयत्नस्य । प्रीत्यर्थं हि पुरुषो यतते । तेन न प्रीतिर्यागसाधनमिति विज्ञायते । द्रव्यं हि यागसाधनम् । न ऋते द्रव्याद् यागो भवति । यस्माद् द्रव्यदेवताक्रिये यजतिशब्दो वर्त्तते।

असत्यामपि प्रीत्यां भवति यागः । यदि च यागो न प्रीत्यर्थो भवेद् असाधकं कर्म भवेत् । साधयितारं नाधिगच्छेत् । यो हि प्रीत्यर्थः, स साध्यते, नान्यः ॥ ननु कर्त्तव्यतया यागः श्रूयते । उच्यते । सत्यं कर्त्तव्यतया श्रूयते, कामोऽपि कर्त्तव्यतयाऽवगम्यते । आह । श्रुत्या यागस्य, वाक्येन कामस्य । न चोभयोः । वाक्यभेदप्रसङ्गात् । उच्यते । यद्यपि यागः कर्त्तव्यः श्रूयते, तथापि न कर्त्तव्यः । सुखदः कर्त्तव्यो भवति । दुःखदो यागः । तस्मात् प्रत्यक्षेणाऽकर्त्तव्यः । प्रत्यक्षेण च दुःखदः । कर्त्तव्यतावचनादनुमानेन सुखदो भवतीति । उच्यते । अनुमानं च प्रत्यक्षविरोधान्न प्रमाणम् । तस्मादकर्त्तव्यो यागः । यदि न प्रीत्यर्थः ॥

अथान्येन फलवचनेन सम्भन्त्स्यते इति । उच्यते । सम्बद्ध्यमानोऽप्यविधीयमानो न समीपवचनमात्रेण फलवान् विज्ञायते । तस्मादनर्थको मा भूदिति स्वर्गस्य कर्त्तव्यता गम्यते । पुरुषप्रयत्नश्च यागविशिष्ट इति यागस्तस्य करणं स्यात् । तस्मात् सुष्ठूक्तं, यागो गुणभूतः, स्वर्गः प्रधानभूत इति ॥ २ ॥ सि० ॥

## प्रत्यर्थं चाभिसंयोगात् कर्म्मतो ह्यभिसम्बन्धस्तस्मात् कर्मोपदेशः स्यात् ॥ ३ ॥

न केवलमानर्थक्यभयाद् यागस्य गुणभावं ब्रूमः । किं तर्हि, स्वर्गसंज्ञकमर्थं प्रति करणत्वेन यागो विधीयते । ननु यागः कर्त्तव्यतया श्रुत्या विधीयते । सत्यमेवम् । आनर्थक्यं तु तथा भवति । स्वर्गं प्रत्यविहिते यागे, स्वर्गकामस्तस्मिन् निष्फले विधीयमानोऽपि निष्प्रयोजनः स्यात् । तत्रास्योपदेशवैयर्थ्यम् । द्वयोश्च विधीयमानयोः परस्परेणासम्बद्धयोर्वाक्यभेदप्रसङ्गः । अतो न स्वर्गकामपदेन स्वार्थो विधीयते । किं तर्हि, उद्दिश्यते । तत्र वाक्याद् अवगतस्य कामस्य कर्त्तव्यताऽवगम्यते, यागस्य च करणता । एवञ्च यागकर्त्तव्यतायां न प्रत्यक्षविरोधो भविष्यति । तस्मात् कर्मोपदेशः स्यात्। कर्म स्वर्गं प्रत्युपदिश्यते, न स्वर्गः कर्म प्रति ॥ किमतो यदि स्वर्गो नोपदिश्यते ? । एतदतो भवति ! न ह्यनुपदिष्टोऽनर्थप्राप्तश्च गुणो भवति । तस्मात् स्वर्गः प्रधानतः, कर्म गुणत इति ॥ अपिच । यस्य स्वर्ग इष्टः स्यात् स यागं निर्वर्त्तयेदित्यसम्बद्धमिव । अन्यदिच्छति,

अन्यत् करोतीति । अथ मतं, ततः स्वर्गो भवतीति सम्बन्धादिदं गम्यते इति । न शब्दप्रमाणकानामन्तरेण शब्दमवगतिर्न्याय्या । वाक्यादेवास्मादिमं सम्बन्धमवगच्छामः । यथा, काष्ठान्याहर्तुकामोऽरण्यं गच्छेदिति यदि ब्रूयाद्, ब्रूयादेतत्- दृष्टं तत्र प्रमाणान्तरेणाऽरण्यगमनस्य काष्ठाहरणसामर्थ्यमिति ॥ अथ मन्यते, उपदेशानर्थक्यं मा भूदित्यर्थापत्तिर्भविष्यतीति । उच्यते । नोपदेशानर्थक्यस्यैतत् सामर्थ्यं, यदन्तरेण फलवचनं यागस्य प्रीतिः फलमवगम्येत । काममस्यानर्थक्यं भवतु, न जातुचित् सामर्थ्यमस्य जायते । न हि दग्धुकामस्योदकोपादानमसति दाहेऽनर्थकमिति दहनशक्तिमस्य जनयेत् । अथ वा स्वर्गकामस्य यागो विधीयते इति पक्षान्तरावलम्बेन अस्यार्थवत्ता भविष्यति ॥

ननु इतरस्मिन्नपि पक्षे स्वर्गकामस्य यागो विधीयते, न यागात् स्वर्गः । नैतदेवम् । तस्मिन् खलु पक्षे स्वर्गं प्रार्थयमानस्यानुष्ठानमनूद्य यागस्तस्योपायत्वेन विधीयते इति न दोषः । तदनुष्ठानं स्वर्गं प्रतीति नास्ति वचनमिति चेत् । इष्टमर्थं प्रत्यनुष्ठानं भवति । स्वर्गकामस्य च स्वर्ग इष्टः । तदनुष्ठानविशेषग्रहणार्थमेव स्वर्गकामविशेषणग्रहणमिति निरवद्यम् । तस्मात्, स्वर्गकामस्य यागकर्मोपदेशः स्यात् । अतः स्वर्गः प्रधानतः कर्म गुणत इति स्वर्गकाममधिकृत्य, यजेतेति वचनमित्यधिकारलक्षणमिदं सिद्धं भवति ॥ ३ ॥ ॥ युक्तिः॥ यागादिकर्मणां स्वर्गादिफलसाधनताधिकरणम् ॥१॥ अधिकारन्यायः॥

## फलार्थत्वात् कर्मणः शास्त्रं सर्वाधिकारं स्यात् ॥४॥

इदमामनन्ति । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येवमादि । तत्र सन्देहः । किं यावत् किञ्चित् सत्त्वं तत् सर्वमधिकृत्य एतदुच्यते, उत समर्थमधिकृत्य ? इति । किं प्राप्तम् । सर्वाधिकारः । अविशेषात् । ननु वृक्षादयो न किञ्चित् कामयन्ते । कथं तेषामधिकारः स्यात् । उच्यते । मा भूदचेतनानाम् । तिरश्चस्त्वधिकृत्य यजेतेति ब्रूयात् । ननु तिर्यञ्चोऽपि न किञ्चित् कामयन्ते । नेति ब्रूमः । कामयन्ते सुखम् । एवं हि दृश्यते, घर्मोपतप्ताश्छायामुपसर्पन्ति, शीतेन पीड़िता आतपम् ॥ आह । ननु तिर्यञ्च आसन्नं फलं चेतयन्ते न कालान्तरफलं प्रार्थयन्ते । कालान्तर-

फलानि च वैदिकानि कर्माणि ।। उच्यते । कालान्तरेऽपि फलं कामयमाना लक्ष्यन्ते । शुनश्चतुर्दश्यामुपवसतः पश्यामः । श्येनाँश्चाऽष्टम्याम् । न चैषां व्याध्याशङ्का । नियतनिमित्तत्वात् । नानाऽऽहाराणामपि तस्मिन् काले दर्शनात् । समानाहाराणामप्यन्यस्मिन् काले अदर्शनात् । लिङ्गानि च वेदे भवन्ति । देवा वै सत्रमासते-त्येवमादीनि देवतानाम् ऋषीणां वनस्पतीनामधिकारं दर्शयन्ति ॥
ननु कात्स्न्र्येन विधिमुपसंहर्तुं न शक्नुवन्तीत्यनधिकृताः । उच्यते । यागं कर्तुं शक्नुवन्ति केचित् । तस्माद् यजेतेत्येवमादीन्यधिकरिष्यन्ति शक्नुवतः । विष्णुक्रमादिवचनानि त्वशक्तान्नाधिकरिष्यन्ति । तत्र योऽनुपदिष्टविष्णुक्रमादिकः स केवलं यागं करिष्यति । कस्तस्य दोषः । द्रव्यपरिग्रहोऽपि, देवग्रामः, हस्तिग्रामः, ऋषभस्य ग्राम इत्युपचारादस्त्येवेति । तस्मादमनुष्याणामपि शक्नुवतामधिकार इति ॥ ४ ॥ ॥ पूर्व० ॥

## कर्तुर्वा श्रुतिसंयोगाद्विधिः कात्स्न्र्येन गम्यते ॥ ५ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, तिर्यगादीनामप्यधिकार इति । कस्य तर्हि । यः समर्थः कृत्स्नं कर्माभिनिर्वर्त्तयितुम् । न चैते शक्नुवन्ति तिर्य्यगादयः कृत्स्नं कर्माभिनिर्वर्त्तयितुम् । तस्मादेषां न सुखस्याभ्युपायः कर्म इति । कथं यो न शक्यते कर्तुं, सोऽभ्युपायः स्यादिति । न देवानाम् । देवतान्तराभावात् । न हि आत्मानमुद्दिश्य त्यागः सम्भवति । त्याग एवासौ न स्यात् । न ऋषीणाम् । आर्षेयाभावात् । न भृग्वादयो भृग्वादिभिः सगोत्रा भवन्ति । न चैषां सामर्थ्यं प्रत्यक्षम् । अपि च तिर्यञ्चो न कालाऽन्तरफलेन अर्थिनः । आसन्नं हि कामयन्ते ॥
ननु चोक्तं, कालान्तरफलार्थिनस्तिरश्चः पश्यामः, शुनः श्येनांश्चतुर्दश्यामष्टम्यां चोपवसत इति। उच्यते । न जन्मान्तरफलार्थिन उपवसन्ति।कथमवगम्यते। वेदाध्ययनाभावात्।ये वेदमधीयते ते एतद्विदुः इदं कर्म कृत्वा इदं फलममुत्र प्राप्नोतीति । न चैते वेदमधीयते । नापि स्मृतिशास्त्राणि । नाप्यन्येभ्योऽवगच्छन्ति । तस्मान्न विदन्ति धर्मम् । अविद्वांसः कथमनुतिष्ठेयुः । तस्मान्न धर्मायोपवसन्तीति ॥

किमर्थं तर्ह्येषामुपवासः । उच्यते । रोगादरुचिरेषाम् । कथं पुनर्नियते काले रोगो भवति । उच्यते । नियतकाला अपि रोगा भवन्ति। यथा तृतीयकाश्चातुर्थकाश्चेति । तस्मान्मनुष्याणामधिकार इति। न च तिरश्चां द्रव्यपरिग्रहः । न हि एते द्रव्यं स्वेच्छया उपयुञ्जाना दृश्यन्ते । तस्मादनीशाना धनस्य । यत्तु, देवग्रामो हस्तिग्राम इति। उपचारमात्रं तत् । तस्मादपि न तिरश्चामधिकार इति ॥ यानि पुनर्लिङ्गानि, देवा वै सत्रमासतेत्येवमादीनि अर्थवादास्ते विधिप्ररोचनार्थाः । विद्यते हि विधिरन्यः स्तेषु सर्वेषु न च विधेर्विधिनैकवाक्यभावो भवति । वचनव्यक्तिभेदात् । स्तुतिस्तु सा । इत्थं नाम सत्राणि आसितव्यानि, यत् कृतकृत्या अपि आसते देवाः, आसन्नचेतना अपि तिर्यञ्चः, अचेतना अपि वनस्पतयः, किमङ्ग पुनर्विद्वांसो मनुष्या इति ॥

ननु विष्णुक्रमादिष्वनाधिकृताः केवलं यागं करिष्यन्ति । नैवम् । गुणा यागं प्रत्युपदिश्यन्ते, न कर्त्तारं प्रति । तेन यागमात्रे क्रियमाणे वैगुण्यमिति न फलसम्बन्धः स्यात् । कथं पुनर्यागं प्रत्युपदिश्यते ? इति चेत्, इतिकर्त्तव्यताकाङ्क्षस्य यागवचनस्यान्तिकादुपनिपातिताः शक्नुवन्ति तं निराकाङ्क्षीकर्तुम् । इतरथा हि कर्तृनधिकुर्वत्सु गुणवचनेष्वनिवृत्ताकाङ्क्षं फलवचनमनर्थकमेव स्यात् । अनुषङ्गश्च फलवचनमभविष्यत् । तत्र साकाङ्क्षत्वाद् वाक्यमुपरोत्स्यते । अथैतदेव वाक्यं समर्थानां सगुणं कर्म विधास्यति, असमर्थानां विगुणमिति। तन्न । सकृदुच्चारणे उभयशक्तिविरोधाद् वाक्यम्भिद्येत । साकाङ्क्षं हि तदितिकर्त्तव्यतां प्रति। तस्मात् साङ्गयागोपदेशः स इति निरङ्गयागोपदेशाभावः । तस्मान्मनुष्याणामेव अधिकार इति ॥ प्रयोजनं पक्षोक्तं केचिदाहुः । सहस्रसंवत्सरं न नियोगतो दिवसेषु कल्पयितव्यम् । पूर्वपक्षे तदायुषां देवतादीनां सम्भवतीति । सिद्धान्ते तत्र सम्भवदपि दिवसेष्वेवावकल्पयितव्यमिति । तत्तूपरिष्टाद् व्याख्यास्यामः ॥ ५ ॥ सि० ॥ यागादिषु मनुष्यस्यैवाधिकाराधिकरणम् ॥२॥

## लिङ्गविशेषनिर्देशात् पुंयुक्तमैतिशायनः ॥ ६ ॥

दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्येवमादि समाम्नायते। तत्र सन्देहः । किं स्वर्गकामं पुमांसमधिकृत्य यजेतेत्येष शब्द उच्चरितः। अथ वाऽनियमः, स्त्रियं पुमांसं च ? इति। किं प्राप्तम्। पुंलिङ्गमधिकृतं

मेने ऐतिशायनः । कुतः ?। लिङ्गविशेषनिर्देशात् । पुंलिङ्गेन विशेषण निर्देशो भवति, स्वर्गकामो यजेतेति । तस्मात् पुमानुक्तो यजेतेति, न स्त्री ॥ ६ ॥ पूर्व० ॥

## तदुक्तित्वाच्च दोषश्रुतिरविज्ञाते ॥ ७ ॥

अविज्ञाते गर्भे हते भ्रूणहत्यानुवादो भवति । तस्मादविज्ञातेन गर्भेण हतेन भ्रूणहा भवतीति । भ्रूणहा पापकृत्तमः । यश्चोभयोर्लोकयोरुपकरोति, तस्य हन्ता भ्रूणहा । यज्ञहन्ता भ्रूणहा । स यज्ञसाधनवधकारी । तस्माद् यज्ञं भ्रूणशब्देन अभिदधाति । स हि बिभर्त्ति वा सर्वं, भूतिं वा आनयति । अतो भ्रूणहा यज्ञवधकारी । स पुंयुक्तत्वादनुवादोऽवकल्पते । अविज्ञाते गर्भे हन्यमाने कदाचित् पुमान् हन्येत। तत्र यज्ञाधिकृतस्य हतत्वाद्यज्ञवधो भ्रूणहत्या स्यात् । इतरथा यद्युभयोरधिकारस्ततो विज्ञाते चाविज्ञाते च यज्ञवधः स्यात् । तत्राविज्ञातग्रहणमतन्त्रमिति कल्प्येत । तस्माद्विवक्षिता पुँल्लिङ्गस्य वाचिका विभक्तिरिति ॥ तथा, आत्रेयीं हत्वा भ्रूणहा भवति । आत्रेयीमापन्नगर्भामाहुः । अत्र = कुक्षौ अस्या विद्यते इत्यात्रेयी । तस्मादपि पुंसोऽधिकारो गम्यते । यथा, पशुमालभेतेति पुंपशुरेवालभ्यते । लिङ्गविशेषनिर्देशात् । एवमिहापि द्रष्टव्यमिति ॥७॥ युक्तिः ॥

एवं प्राप्ते ब्रूमः—

## जातिं तु बादरायणोऽविशेषात् तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात् ॥ ८ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति, पुंसोऽधिकार इति । जातिं तु बादरायणोऽधिकृतां मन्यते स्म । आह । किमयं स्वर्गकाम इति जातिशब्दः समधिगतः । नेत्याह । कथं तर्हि । यौगिकः, स्वर्गेच्छायोगेन वर्त्तते। केन तर्हि शब्देन जातिरुक्ता या अधिकृतेति गम्यते ?। नैव च वयं ब्रूमो, जातिवचन इह शब्दोऽधिकारक इति । किन्तर्हि । स्वर्गकामशब्देनोभावपि स्त्रीपुंसावधिक्रियेते इति । अतो न विवक्षितं पुंलिङ्गमिति । कुतः । अविशेषात् । न हि शक्नोत्येषा विभक्तिः स्वर्गकामं लिङ्गेन विशेष्टुम् । कथम् । लक्षणत्वेन श्रवणात् । स्वर्गे कामो यस्य, तमेष लक्षयति शब्दः । तेन लक्षणेनाधिकृतो यजेतेति शब्देन उच्यते । तत्र लक्षणमविशिष्टं स्त्रियां पुंसि च । तस्माच्छब्देनोभाव-

ऽपि स्त्रीपुंसावधिकृताविति गम्यते । तत्र केनाधिकारः स्त्रिया निवर्त्यते । विभक्त्या इति चेत् । तन्न । कस्मात् । पुंवचनत्वात् । स्त्रीनिवृत्तावशक्तिः । पुंसो विभक्त्या पुनर्वचनमनर्थकमिति चेद् न । आनर्थक्येऽपि स्त्रीनिवृत्तेरभावः । परिसङ्ख्यायां स्वार्थहानिः परार्थकल्पना प्राप्तबाधश्च । न चानर्थक्यम् । निर्देशार्थत्वात् । तस्मात् स्त्र्यपि प्रतीयेत जात्यर्थस्याविशिष्टत्वात् ॥ ८ ॥ सि० ॥

## चोदितत्वाद् यथाश्रुति ॥ ९ ॥

अथ यदुक्तं, पशुमालभेतेति पुंपशुरालभ्यते । पुंलिङ्गवचनसामर्थ्यात् । एवमिहापि पुंलिङ्गवचनसामर्थ्यात् पुमानधिक्रियते यागवचनेनेति । तत्परिहर्त्तव्यम् । अत्रोच्यते । नात्र जातिर्द्रव्यस्य लक्षणत्वेन श्रूयते । यदि हि लक्षणत्वेन श्रूयेत, ततः स्त्रिया अपि याग उक्तो न पुंवचनेन विवर्त्येत । इदं तु पशुत्वं यागस्य विशेषणत्वेन श्रूयते । तत्र पशुत्वस्य यागस्य च सम्बन्धो, न द्रव्ययागयोः । यथा पशुत्वं यागसम्बद्धमेवं पुंस्त्वमेकत्वं च । सोऽयम् अनेकविशेषणविशिष्टो यागः श्रूयते । स यथाश्रुति एव कर्त्तव्यः । उपादेयत्वेन चोदितत्वात् ॥ यच्च दोषश्रुतिरविज्ञाते गर्भे हते आत्रेय्यां च पुंयुक्तत्वेनेति तत् परिहर्त्तव्यम् । अत्रोच्यते । अविज्ञातेन गर्भेणेत्यनुवादः प्रशंसार्थः । आत्रेयी च न हन्तव्येति । इत्थं गर्भो न हन्तव्यः । यदऽन्यकेनाप्येनस्वी भवति । पुंलिङ्गविभक्तिः श्रूयमाणा न शक्नोति स्त्रियं निवर्त्तयितुम् । किमङ्ग पुनरविज्ञातगर्भवचनं लिङ्गम् । तथा गोत्रप्रशंसार्थमात्रेय्या अवधसङ्कीर्त्तनम् । न चापन्नसत्त्वा आत्रेयी । गोत्रं हि एतत् । न हि अत्रशब्दादयं तद्धित उत्पन्नः । समर्थानां हि तद्धित उत्पद्यते । न च अत्र-शब्दस्य सामर्थ्यमस्ति ॥ ९ ॥ आ० नि० ॥

## द्रव्यवत्त्वात्तु पुंसां स्याद् द्रव्यसंयुक्तं क्रयविक्रयाभ्याम-द्रव्यत्वं स्त्रीणां द्रव्यैः समानयोगित्वात् ॥ १० ॥

पुंसां तु स्यादधिकारः । द्रव्यवत्त्वात् । द्रव्यवन्तो हि पुमांसो न स्त्रियः । द्रव्यसंयुक्तं चैतत् कर्म । व्रीहिभिर्यजेत, यवैर्यजेतेत्येवमादि । कथम् अद्रव्यत्वं स्त्रीणाम् । क्रयविक्रयाभ्याम् । क्रयविक्रयसंयुक्ता हि स्त्रियः । पित्रा विक्रीयन्ते । भर्त्रा क्रीयन्ते । विक्रीतत्वाच्च पितृधनानामनीशिन्यः । क्रीतत्वाच्च भर्तृधनानाम् । विक्रयो

हि श्रूयते । शतमधिरथं दुहितृमते दद्यात्, आर्षे गोमिथुनमिति । न चैतद् दृष्टार्थे सति आनमनेऽदृष्टार्थं भवितुमर्हति । एवं द्रव्यैः समानयोगित्वं स्त्रीणाम् ॥ १० ॥ पूर्व० ॥

## तथा चान्यार्थदर्शनम् ॥ ११ ॥

या पत्या क्रीता सत्यथान्यैश्चरतीति क्रीततां दर्शयति ॥ ११॥ उदाहरणम् ॥

## तादर्थ्यात् कर्मतादर्थ्यम् ॥ १२ ॥

आह । यदनया भक्तोपसर्पणेन वा कर्त्तनेन वा धनमुपार्जितं, तेन यक्ष्यते इति । उच्यते । तदप्यस्या न स्वम् । यदा हि साऽन्यस्य स्वभूता, तदा यत् तदीयं तदपि तस्यैव । अपिच, स्वामिनस्तया कर्म कर्त्तव्यम् । न तत् परित्यज्य स्वकर्मार्हति कर्तुम् । यत्तयाऽन्येन प्रकारेणोपार्ज्यते, तत् पत्युरेव स्वं भवितुमर्हतीति । एवञ्च स्मरति—

भार्या दासश्च पुत्त्रश्च निर्द्धनाः सर्व एव ते ।
यत्ते समधिगच्छन्ति, यस्य ते तस्य तद्धनमिति ॥ ॥१२॥ आ०नि०

## फलोत्साहाविशेषात्तु ॥ १३ ॥

तुशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति । निर्द्धना स्त्रीति । द्रव्यवती हि सा । फलोत्साहाविशेषात् । स्मृतिप्रामाण्याद् अस्वया तया भवितव्यं, फलार्थिन्यापि । श्रुतिविशेषात् फलार्थिन्या यष्टव्यम् । यदि स्मृतिमनुरुद्ध्यमाना परवशा निर्द्धना च स्यात्, यजेतेत्युक्ते सति न यजेत । तत्र स्मृत्या श्रुतिर्बाध्येत । न चैतन्न्याय्यम् । तस्मात् फलार्थिनी सती स्मृतिमप्रमाणीकृत्य द्रव्यं परिगृह्णीयाद् यजेत चेति ॥ १३ ॥ उत्तरम् ॥

## अर्थेन च समवेतत्वात् ॥ १४ ॥

अर्थेन चास्याः समवेतत्वं भवति । एवं दानकाले संवादः क्रियते— धर्मे च अर्थे च कामे च नाऽतिचरितव्येति । यत्तूच्यते । भार्याऽऽदयो निर्द्धना इति । स्मर्यमाणमपि निर्धनत्वमन्याय्यमेव । श्रुतिविरोधात् । तस्मादस्वातन्त्र्यमनेन प्रकारेणोच्यते, संव्यवहारप्रसिद्ध्यर्थम् ॥ १४ ॥ युक्तिः ॥

## क्रयस्य धर्ममात्रत्वम् ॥ १५ ॥

यत्तु क्रयः श्रूयते । धर्ममात्रं तु तत् । नासौ क्रय इति । क्रयो हि

उच्चनीचपण्यपणो भवति । नियतं त्विदं दानम् । शतमधिरथं, शोभनामशोभनाञ्च कन्यां प्रति । स्मार्त्तं च श्रुतिविरुद्धं विक्रयं नानुमंस्यन्ते । तस्माद् अविक्रयोऽयमिति ॥ १५ ॥ ॥ आ० नि० ॥

स्ववत्तामपि दर्शयति ॥ १६ ॥

पत्नी वै पारिणय्यस्य ईष्टे पत्यैव गतमनुमतं क्रियते । तथा भसदा पत्नीः संयाजयन्ति । भसद्वीर्या हि पत्नयः । भसदा वा एताः परगृहाणामैश्वर्यमवरुन्धते इति ॥ १६ ॥ युक्तिः ॥ यागादिषु स्त्रीपुंसयोरुभयोरधिकाराधिकरणम् ॥ ३ ॥

स्ववतोस्तु वचनादैककर्म्यं स्यात् ॥ १७ ॥

स्ववन्तावुभावपि दम्पती इत्येवं तावत् स्थितम् । तत्र सन्देहः। किं पृथक् पत्नी यजेत, पृथग् यजमानः ? उत सम्भूय यजेयातामिति । किं प्राप्तम् । पृथक्त्वेन । कुतः । एकवचनस्य विवक्षितत्वात्। उपादेयत्वेन कर्त्ता यजेतेति श्रूयते । तस्मादेकवचनं विवक्ष्यते। यथा न द्वौ पुरुषौ सम्भूय यजेयातां, तथाऽत्रापि द्रष्टव्यम् ॥ एवं प्राप्ते ब्रूमः । स्ववतोस्तु वचनादैककर्म्यं स्यात् । वचनात्तयोः सहक्रिया । एवं हि स्मरन्ति, धर्मे चार्थे च कामे च नातिचरितव्येति। तथा सहधर्मश्चरितव्यः सहापत्यमुत्पायितव्यमिति । उच्यते। स्मृतिवचनेन न श्रुतिवचनं युक्तं बाधितुम् । नेति ब्रूमः । इह किञ्चित् कर्म स्त्रीपुंसकर्तृकमेव । यथा दर्शपूर्णमासौ ज्योतिष्टोम इति । यत्र पत्न्यवेक्षितेन यजमानावेक्षितेन चाज्येन होमं उच्यते, तत्रान्यतराऽभावे वैगुण्यम् ॥

ननु पुंसो यजमानस्य यजमानावेक्षितमाज्यं, स्त्रिया यजमानायाः पत्न्यवेक्षितं भविष्यतीति । नेत्याह । न अयमीक्षितृसंस्कारः। ईक्षितुः संस्कारो यदि, तदैवं स्यात् । आज्यसंस्कारश्चायम् । गुणभूतौ ईक्षितारौ । तत्रान्यतरापाये नियतं वैगुण्यम् । सर्वाङ्गोपसंहारी च प्रयोगवचनः। तत्रैतत् स्यात् । स्त्री यजमाना पुमांसं परिक्रेष्यत्याज्यस्येक्षितारं, पुमांश्च स्त्रियन्त्ववेक्षित्रीमिति । तच्च न । पत्नीति हि यज्ञस्य स्वामिनीत्युच्यते, न क्रीता । पत्नीति सम्बन्धिशब्दोऽयम् । यजमान इति च स्वामी, न क्रीतः । तस्मात् स्त्रीपुंसयोरेकमेवजातीयकं कर्मेति ॥ तत्र श्रुतिसामर्थ्याद् यः कश्चिद् यया कया-

उच्चनीचपण्यपणो भवति । नियतं त्विदं दानम् । शतमधिरथं, शो-
भनामशोभनाञ्च कन्यां प्रति । स्मार्त्तं च श्रुतिविरुद्धं विक्रयं नानुम-
न्यते । ... नि० ॥

॥

तं क्रियते । तथा
। भसदा वा पता
यागादिषु स्त्रीपुंस-

॥ १७ ॥

म् । तत्र सन्देहः ।
भूय यजेयातामि-
विवक्षितत्वात् ।
वचनं विवक्ष्यते ।
द्रष्टव्यम् ॥ एवं
नात्तयोः सहक्रि-
नातिचरितव्येति ।
। उच्यते । स्मृति-
। इह किञ्चित्
ष्टोम इति । यत्र
यते, तत्रान्यतरा-

स्त्रिया यजमाना-
दीक्षितृसंस्कारः ।
रश्चायम् । गुण-
। सर्वाङ्गोपसंहा-
नुमांसं परिक्रेष्य-
च न । पत्नीति

| दिनांक | सदस्य संख्या | दिनांक | सदस्य संख्या |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |

... स्वामिनीत्युच्यते, न क्रीता । पत्नीति सम्बन्धिशब्दो-
ऽयम् । यजमान इति च स्वामी, न क्रीतः । तस्मात् स्त्रीपुंसयोरेकमे-
कजातीयकं कर्मेति ॥ तत्र श्रुतिसामर्थ्याद् यः कश्चिद् यया कया-

चित् सह सम्भूय यजेतेति प्राप्ते, इदमुच्यते– यस्त्वया कश्चिद् धर्मः कयाचित् सह कर्त्तव्यः, सोऽनया सहेति । तेन न श्रुतिविरोधः स्मृतेरिति गम्यते । अथ यदुक्तं, केवलस्य पुंसोऽधिकारः, केवलायाश्च स्त्रियाः । यजेतेत्येकवचनस्य विवक्षितत्वादिति । तत् परिहर्त्तव्यम् । इदं तावदयं प्रष्टव्यः । यजेतेत्येकवचने विवक्षिते, कथं षोडशभिर्ऋत्विग्भिः सह यागो भवतीति । एवमुच्यते, प्रतिकारकं क्रियाभेदः । याजमानानेव पदार्थान् परिक्रयादीन् कुर्वन्, यजते इत्युच्यते यजमानः । आध्वर्य्यवानेव कुर्वन् अध्वर्य्युर्यजतीत्येवमुच्यते । यथा सम्भरणमेव कुर्वती स्थाली पक्तिं करोतीत्युच्यते । यस्य च कारकस्य य आत्मीयो व्यापारः, स एकवचने विवक्षिते एकेन कर्त्तव्यो भवतीति । एव चेद् यावान् व्यापारो यजमानस्य स तावान्, न सम्भूय कर्त्तव्यः । एकैनैको याजमानोऽपरेणापरः । द्वादशे वा शते एकेन षट्पञ्चाशत्, अपरेणापि षट्पञ्चाशदिति । इह तु पत्नीव्यापारोऽन्य एव । न तत्र पत्नी प्रवर्त्तमाना यजमानस्यैकत्वं विहन्ति । यथाऽध्वर्य्युराध्वर्य्यवेषु प्रवर्त्तमानोऽवश्यं च सह पत्न्या यष्टव्यम् । मध्यकं हीदं दम्पत्योर्धनम् । तत्र यागोऽवश्यं सह पत्न्या कर्त्तव्यः । इतरथाऽन्यतरानिच्छायां त्याग एव न संवर्त्तेत । तथा हि द्वितीयया पत्न्या विना त्यागो नैवावकल्पते । यस्य द्वितीया पत्न्यस्ति, तत्र क्रत्वर्थान् एका करिष्यति । कर्तृसंस्कारार्थेषु नैव दोषः । सम्भवन्ति हि तानि सर्वत्रेति ॥ १७ ॥ सि० ॥

## लिङ्गदर्शनाच्च ॥ १८ ॥

लिङ्गं खल्वपि दृश्यते । योक्त्रेण पत्नीं सन्नह्यति मेखलया यजमानं मिथुनत्वायेति । यदि स्त्रीपुंसावेकत्र, योक्त्रस्य मेखलायाश्च विभागो वाक्याद् गम्यते । मिथुनसंस्तवश्च । तदेतत् स्त्रीपुंससाधनके कर्मण्युपपद्यते, नान्यथा ॥ १८ ॥ युक्तिः ॥

## क्रीतत्वात्तु भक्त्या स्वामित्वमुच्यते ॥ १९ ॥

स्थितादुत्तरमुच्यते । तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति । यदुक्तं स्ववती स्त्रीति । क्रीता हि सा । दृष्टार्थत्वादधिरथशतदानस्य । अतो यदस्याः स्वामित्वमुच्यते, तद् भक्त्या । यथा, पूर्णकोऽस्माकं बलीवर्द्दानामीष्टे इति । एवं पत्न्यपि पारिणय्यस्य ईष्टे इति ॥१९॥पूर्व०

## फलार्थित्वात्तु स्वामित्वेनाभिसम्बन्धः ॥ २० ॥

नैतदस्ति । क्रयो मुख्यो, गौणं स्वामित्वमिति । फलार्थिनी हि सा, स्मृतिर्नादरिष्यते । स्मृत्यनुरोधादस्वा स्यात् । स्ववती श्रुत्यनुरोधात् ॥ २० ॥

## फलवत्तां च दर्शयति ॥ २१ ॥

सं पत्नी पत्या सुकृतेन गच्छतां यज्ञस्य धुर्य्यौ युक्तावभूताम् । सञ्जानानौ विजहीताम् । अरातीर्दिवि ज्योतिरजरमारभेतामिति दम्पत्योः फलं दर्शयति । तस्माद्प्युभौ अधिकृताविति सिद्धम् ॥२१॥

उत्तरम् ॥ यागे दम्पत्योः सहाधिकाराधिकरणम् ॥ ४ ॥

## आधानं च द्वियज्ञवत् ॥ २२ ॥

अस्त्याधानं, य एवं विद्वानग्निमाधत्त इति । तत्रेदमामनन्ति, क्षौमे वसानावग्निमादधीयातामिति । तत्रैषोऽर्थः सांशयिकः । किं द्वौ पुरुषावादधीयाताम्, उतैकः पुरुष इति । कथं संशयः । उच्यते । इहैतच्छ्रूयते, वसानावादधीयातामिति । तत्र वचनमर्थप्राप्तं पुनः श्रूयते । तत् किं पुंलिङ्गसम्बन्धार्थमुत क्षौमविध्यर्थमिति । उभयोर्विद्यमानत्वाद् भवति संशयः। यदि लिङ्गसम्बन्धार्थमुभौ पुरुषावाधास्येते। अथ क्षौमसम्बन्धार्थं तत एकः । किं प्राप्तम् । आधानन्तु द्वियज्ञवत् स्यात् । यथा, एतेन द्वौ राजपुरोहितौ सायुज्यकामौ यजेयातामिति द्वयोः पुरुषयोर्द्वियज्ञो भवति । एवं आधानं द्वयोः पुरुषयोः स्यात् । ततोऽविशेषाद्, वसानौ इति श्रवणादेव पुरुषौ गम्येते । न पदान्तरगतेन क्षौमेणास्य सम्बन्धः । श्रुत्यवगतं हि श्रवणाद् अवगतम् । पदान्तरसम्बन्धं वाक्याद् अवगतम् । श्रुतिश्च वाक्याद् बलीयसी । वसानशब्दगतश्चाऽर्थ आधानेन सम्बद्ध्यते, न क्षौमशब्दगतः ॥ आह वसानौ इति नायं केवलं पुंलिङ्ग एव । स्त्रीपुंसयोरप्यभिधायको भवति । यथा कुक्कुटश्च कुक्कुटी च कुक्कुटौ । शूकरश्च शूकरी च शूकराविति । एवं वसानश्च वसाना च वसानौ स्यातामिति । अत्रोच्यते। यत्र न अर्थः प्रकरणं वा विशेषकं; विधायकश्च शब्दो, नास्त्यऽनुवादस्तत्र द्वौ पुमांसौ गम्येते । यथा द्वावानयेत्युक्तः पुमांसावानयति । द्वे आनयेति स्त्रियौ । तेन स्त्रियो वाचकमेकारान्तं द्विवचनमिति गम्यते । औकारान्तमपि द्वयोः पुंसोर्वाचकमिति । यत्रेदानीं

स्त्रीपुंसयोः प्रयुज्यमानमौकारान्तं दृश्यते, तत्र किं पुमान् सद्वितीयस्तस्य निमित्तम् ? उत स्त्री सद्वितीयेति । उच्यते । पुंसि सद्वितीये दृष्टः । यथा ब्राह्मणावानयेति । इहापि पुमान् सद्वितीयोऽर्थः । तस्मात् पुंनिमित्तमिति गम्यते ॥ अत्राह । प्रयोगो यदि दृष्टं प्रमाणं, द्वयोः पुंसोर्दृष्टः, कथमेकस्मिन् स्यात् । अत्रोच्यते । पुंसि च द्वित्वे च दृष्ट इति शक्यते वदितुं, न द्वयोर्द्रव्ययोरिति । पुंभावं द्वित्वं चैष शब्दो न व्यभिचरति । द्रव्यं पुनर्व्यभिचरति । अपि च युगपदधिकरणवचनताया द्वन्द्वस्मृतेर्द्विवचनबहुवचनोपपत्तेश्च । प्रमित्रयोर्वरुणयोरिति च दर्शनात् इतरेतरयोगे चार्थे समासविधानाद् द्वंद्वाऽपवादत्वाच्चैकशेषस्य । यथैव खदिरौ च धवलौ चेति निदर्शनं क्रियते, एवमत्रापि द्रष्टव्यम् । तस्मात् पुंसि द्वित्वे च वर्त्तते इति गम्यते । न च स्त्रीद्वित्वे दृष्टः ॥ अत्राह । नन्वत्रैव दर्शनात्, स्त्रीपुंसयोर्वाचक इति गम्यते । अत्रोच्यते । उक्तमेतत् । अन्यायश्चानेकार्थत्वमिति पुमान् सद्वितीयोऽस्यार्थो भविष्यति । स्त्रीपुंसौ चेत्यन्याय्यम् । अथेदानीं सद्वितीयस्य पुंसो विधौ कोऽन्यः सहाय इति । स्त्रिया अनभिधेयत्वाद्, अवश्यम्भावित्वाच्च द्वितीयस्य । अपरः सद्वितीयः पुमान्, एवमितरोऽपीतरेण सद्वितीयः, इतरोऽपीतरेणेति द्वावेव पुमांसावुपादीयेते । तस्मादिह द्वौ पुमांसावाधाने विधीयेते इत्युच्यते ॥

ननु स्त्रीपुंसयोर्वाचकमौकारान्तं द्विवचनं स्मरन्ति । नैषा स्मृतिरस्तीति ब्रूमः । आह । भगवतः पाणिनेर्वचनात् स्मृतिमनुमास्यामहे । पुमान् स्त्रिया इति । उच्यते । न पाणिनेर्वचनं, कुक्कुटौ इति औकारः स्त्रीपुंसयोर्वाचक इति । कथन्तर्हि । यत्र स्त्रीपुंसयोः सहवचनं, तत्र सद्वितीयो वा पुमानिति कृत्वा अकारान्तस्य औकारः प्राप्नोति । सद्वितीया वा स्त्रीति कृत्वा एकारः । पुंशब्दस्तत्र साधुर्न स्त्रीशब्द इति पाणिनेर्वचनम् । पुमान् शिष्यते इति च ब्रूते । तेन सुतरां गम्यते, पुंसोर्वाचक औकार इति । तस्माद् द्वयोः पुंसोरधिकार इति ॥

ननु क्षौमविधानपरमेतद् वाक्यम् । क्षौमसम्बन्धस्यार्थवत्त्वात् । इतरथा क्षौमवचनमनर्थकं स्यात् । अत्रोच्यते । वसानावादधीयातामित्यस्ति सम्बन्धः । न क्षौमे आदधीयातामिति । तस्मात् सन्निकृष्ट-

मपि न तत्सम्बद्धमधानेन । आह । वसानशब्देन सह सम्बद्ध्यमान-मर्थवद् भविष्यति । वसानसन्निकृष्टे अपि क्षौमे न विधीयेते, विधायकस्य शब्दस्याभावात् । न हि वसानशब्दो विधायको, न क्षौमशब्दो, नानयोः समुदायः । कस्तर्हि विधातुं शक्नोति ? । आदधीयातामित्यत्र या लिङ् ॥ आह । सा खलु विधास्यति ? । उच्यते । सा स्वशब्दगतमाधानं शक्नोति विधातुम् । श्रवणाद् विहितत्वादाधानस्य । आनर्थक्ये, वसानौ इति शक्नोति वाक्येन विधातुम् । भवति हि वसानयोराधानसम्बन्धः । तत्र नात्यन्ताय स्वार्थः परित्यक्तो भवति । क्षौमवसानसम्बन्धे तु विधातव्ये, आदधीयातामित्याधानमुत्सृज्य विदधानोऽत्यन्ताय श्रुतिं जह्यात् । आधानसन्निकृष्टे च लिङ्गे विधातव्ये श्रुतिर्विप्रकृष्टं न क्षौमवसानसम्बन्धं विधातुमुत्सहते । अर्थविप्रकर्षात् । अपि चोत्सृज्य श्रुतिं, क्षौमवसानसम्बन्धे विधीयमाने क्षौमं वसानस्याङ्गं स्यान्नाधानस्य । तत्र क्षौमाभावेऽपि नाधानं विगुणमिति क्षौमाभावेऽप्याधानं स्यात् ॥ आह । वसानगुणतायां तर्हि कोऽर्थो विवक्ष्यते । उच्यते । न कश्चित् । अत एवास्य पक्षस्य परित्यागः । आह । क्षौमवसानश्रवणमिदानीं कथमिति । उच्यते । न शक्यते उभयं विधातुं, क्षौमं लिङ्गं च । भिद्येत हि तथा वाक्यम् । तस्मादक्षौमयोः क्षौमशब्दोऽनुवादः । अर्थप्राप्ते च वसने वसानौ पुमांसावित्यर्थः । ते च प्रायेण विचेष्टमानस्य मलिने क्षौमसदृशे भवतः । विचेष्टमानस्य वा शब्दवती भवत इति । तस्माद् द्वयोः पुंसोरधिकार इति ॥ २२ ॥ पूर्व० ॥

## गुणस्य तु विधानत्वात् पत्न्या द्वितीयशब्दः स्यात् ॥ २३ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति । यदुक्तं द्वौ पुरुषौ आदधीयातामिति । एक एवादधीत । वसन्ते ब्राह्मणोऽग्निमादधीतेति । एकवचनं हि विवक्षितम् । तस्मादेक एव आदधीत । नन्विदं वचनं द्वौ पुमांसावादधीयातामिति । नेत्याह । गुणस्य तु विधानत्वात् क्षौमविधानमस्मिन् वाक्ये न्याय्यम् । तथा हि अपूर्वोऽर्थो विहितो भवति । गम्यते हि विशेषनियमः । इतरथा क्षौमवचनमनुवादमात्रं स्यात् । वादमात्रं चानर्थकम् । पक्षे चानुवादः । न चैकपक्षवचन

एष शब्दः । गौणत्वे च साधारणं सादृश्यम् । तस्मात् प्रमादाध्ययनमवगम्येत विनैव हेतुना॥ आह । ननु पुमांसौ विधेयौ । तद्विधाने च न क्षौमविधानम् । वाक्यभेदो हि तथा स्यात् । श्रुतिगम्यौ च पुमांसौ, वाक्यगम्यं च क्षौमं बाधेयातामिति । अत्रोच्यते । न पुंमांसौ विधेयौ । प्राप्त एवात्र सद्वितीयः पुमान् । सोऽनूद्यते । कथम् । एकोऽत्र पुमान् श्रूयते । तस्य पत्न्या द्वितीयशब्दः स्यात् । न च यत् प्राग् वचनाद् गम्यते, तद् विधेयं भवति । तस्मात् क्षौमविधानं, न वाक्यभेदो भवति ॥ यदुच्यते, न क्षौमस्य विधायकोऽस्तीति । तदुच्यते। आदधीयातामिति तद्विधास्यति। नन्वेतदाधानं श्रुत्वा विधातुं समर्थं, नान्यदिति । उच्यते । शब्दान्तरेण विहितत्वादाधानस्य न विधायकं, विहितत्वाच्च पुंसः सद्वितीयस्य तस्यापि न विधायकम्। अतस्तदसम्भवात् क्षौमस्य विधायिका लिङ् भविष्यति । वाक्यसामर्थ्यात् । यत्त्वस्मिन् पक्षेऽत्यन्ताय स्वार्थं जहातीति । नात्यन्ताय हास्यति । आधाने वासः क्षौमं कुर्यादिति । अस्मिन् पक्षे पुंशब्दः स्त्रीपुंसयोर्वृत्त इति गम्यते । अस्ति हि तत्र तस्य निमित्तं पुमान् सद्वितीयः । एवमादि च दृष्ट्वा भगवता पाणिनिना सूत्रं प्रणीतं, पुमान् स्त्रिया इति । तस्य विषयः पुंशब्दः शिष्यमाणः साधुर्भवति, न स्त्रीशब्द इति । तस्मादेकः पुमानाधीते, न द्वाविति ॥ २३ ॥ सि० ॥ एकस्यैव पुंस आधानाधिकाराधिकरणम् ॥ ५ ॥

## तस्या यावदुक्तमाशीर्ब्रह्मचर्यमतुल्यत्वात् ॥ २४ ॥

दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यवमादिष्वेतदुक्तं स्त्रीपुंसयोः सहाधिकार इति । अथेदानीं सन्दिह्यते । किं सर्वं याजमानं पत्न्या कर्त्तव्यम्, उत यावदुक्तमाशीर्ब्रह्मचर्यं चेति । किं प्राप्तम् । सर्वं याजमानं पत्न्याः स्यात् । सापि हि यजमाना । तुल्यत्वात् । तस्मात् सर्वं तस्या इति ॥ एवं प्राप्ते ब्रूमः । तस्या यावदुक्तं स्यात् । वचनप्रामाण्यात् । आशीः ब्रह्मचर्यं च स्यात् । कस्मात् । अतुल्यत्वात् । अतुल्या हि स्त्रीपुंमाः । यजमानः पुमान् विद्वांश्च, पत्नी स्त्री च अविद्या च ॥ किमतः ? यद्येवं हि एतदतुल्यत्वम् । एतदतो भवति । क्रत्वर्थेषु यानि याजमानानि श्रवणानि, तेषूपादेयत्वेन श्रवणाद् विवक्षितं लिङ्गम् । तेन तेषु पत्नी न स्यात् । यानि च क्रत्वर्थानि समन्त्रकाणि तेष्वविद्यत्वात् पत्नी न स्यात् ।

नतू पत्न्या अध्ययनस्य प्रयोजकं स्यादिति यद्युच्येत । तन्न । असत्यपि प्रयोजकत्वे तस्य निर्वृत्तिर्भविष्यति । अस्ति हि तस्य पुमान् निर्वर्त्तकः । यच्च क्रत्वर्थं, तदेकेन येन केनचिन्निर्वर्त्तयितव्यम् । तस्मात् प्रतिषिद्धस्य पत्न्या अध्ययनस्य पुनः प्रसवे, न किञ्चिदस्ति प्रमाणम् । अतस्तदपि पत्नी न कुर्यात् । यास्त्वाशिषो, यच्च ब्रह्मचर्यं, तत् पुरुषं प्रति गुणभूतम् । न तत्रान्यतरेण कृते सिद्ध्यति । अन्यतरस्य हि संस्कारो हीयेत । न च तत्रोपादेयत्वेन यजमानस्य श्रवणम् । तस्माल्लिङ्गमप्यविवक्षितम् । अत आशीर्ब्रह्मचर्यं चोभयोरपि स्यात् । यच्चाहत्य उच्यते । यथा, पत्न्या आज्यमवेक्षते इति । तस्मादतुल्यत्वादसमानविधाना पत्नी यजमानेन भवितुमर्हतीति ॥ ॥२४॥ पत्न्या यावदुक्ताशीर्ब्रह्मचर्यादावेवाधिकाराधिकरणम् ॥ ६ ॥

## चातुर्वर्ण्यमविशेषात् ॥ २५ ॥

अग्निहोत्रादीनि कर्माण्युदाहरणम् । तेषु सन्देहः । किं चतुर्णां वर्णानां तानि भवेयुः, उत अपशूद्राणां त्रयाणां वर्णानामिति । किं तावत् प्राप्तम् । चातुर्वर्ण्यमधिकृत्य, यजेत, जुहुयादित्येवमादि शब्दमुच्चरति वेदः । कुतः । अविशेषात् । न हि कश्चिद्विशेष उपादीयते । तस्माच्छूद्रो न निवर्त्तते ॥ २५ ॥ पूर्व० ॥

## निर्देशाद्वा त्रयाणां स्यादग्न्याधेये ह्यसम्बन्धः क्रतुषु ब्राह्मणश्रुतिरित्यात्रेयः ॥ २६ ॥

वाशब्दः पक्षं व्यावर्त्तयति । त्रयाणामधिकारः स्यात् । कुतः । अग्न्याधेये निर्देशात् । अग्न्याधेये त्रयाणां निर्देशो भवति । वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः, शरदि वैश्य इति । शूद्रस्याधाने श्रुतिर्नास्तीत्यनग्निः शूद्रोऽसमर्थोऽग्निहोत्रादि निर्वर्त्तयितुम् । तस्मादग्निहोत्रं जुहुयात् स्वर्गकाम इत्येवमादिषु शूद्रस्य प्रापिका श्रुतिर्नास्ति । ब्राह्मणादीनेवाधिकृत्य सा प्रवर्त्तते । ते हि समर्थाः । अग्निमत्त्वात् । आहवनीयादयो न शूद्रस्य । अविधानात् । संस्कारशब्दत्वाच्चाहवनीयादीनाम् । तस्मादनधिकृतोऽग्निहोत्रादिषु शूद्र इत्यात्रेयो मन्यते स्म ॥ २६ ॥ सि० ॥

## निमित्तार्थेन बादरिस्तस्मात् सर्वाधिकारं स्यात् ॥ २७ ॥

यदुक्तम् । अनधिकारः शूद्रस्येति । तन्न । सर्वं हि अर्थिनमधिकृत्य यजेतेत्युच्यते । सोऽस्ति प्रतिषेधवचने शूद्रान्न व्यावर्त्तते । यत्त्वसमर्थोऽग्न्यभावादिति । स्यादेवास्यग्निरर्थप्राप्तः । कामश्रुतिपरिगृहीतत्वात् ॥ अत्राह । नन्वग्न्याधेयचोदना ब्राह्मणादिसंयुक्ता, न शूद्रस्येति । उच्यते । निमित्तार्थेन ताः श्रुतयो न प्रापिकाः । कथम् । निमित्तस्याभावा एते शब्दाः । ब्राह्मण आदधानो वसन्ते, राजन्यो ग्रीष्मे, वैश्यः शरदीति ब्राह्मणादीनां वसन्तादिभिः सम्बन्धो गम्यते । तेन वसन्तादिसम्बन्धार्था ब्राह्मणादय इत्येव गम्यते । तथा च आदधातिर्न वाक्येन शूद्राद् व्यावर्त्तितो भविष्यति । तस्माद् बादरिः सर्वाधिकारं शास्त्रं मन्यते स्मेति गम्यते ॥ २७ ॥ पूर्व० ॥

## अपि वान्यार्थदर्शनाद् यथाश्रुति प्रतीयेत ॥ २८ ॥

अपि वेति पक्षो व्यावर्त्यते । यथाश्रुत्येव प्रतीयेत । ब्राह्मणादयो हि आधाने श्रूयन्ते । तेन ब्राह्मणादिकर्तृकमाधानम् । वसन्तादिश्रवणाच्च वसन्तादिकालकम् । तथा च इदं शूद्रवर्जितानामेवानुक्रमणं भवति । बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्येति । शूद्रस्य साम नाऽऽमनन्ति । तथा, पयो व्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्येति।तथा आधाने अष्टसु प्रक्रमेषु ब्राह्मणोऽग्निमादधीत, एकादशसु राजन्यः, द्वादशसु वैश्य इति । एवमब्रह्मसामकमव्रतकमप्रक्रमकं च शूद्रस्य प्रयुक्तमपि कर्म निष्फलं स्यात् । तस्मान्न शूद्रो जुहुयाद् यजेद् वा ॥ २८ ॥ उत्तरम् ॥

## निर्देशात्तु पक्षे स्यात् ॥ २९ ॥

नैतदेवम् । शूद्रस्याग्न्यभावादनधिकारोऽग्निहोत्रादिष्विति । अस्ति हि शूद्रस्याधानम् । य एवं विद्वानग्निमाधत्ते इति शास्त्रं सामान्येन । इदमपि निमित्तार्थं भविष्यति । तस्मात् सर्वाधिकारं शास्त्रं भवितुमर्हतीति ॥ २९ ॥ पूर्व० ॥

## वैगुण्यान्नेतिचेत् ॥ ३० ॥

अथ यदुक्तं, अब्रह्मसामकमव्रतकमप्रक्रमकं च शूद्रस्य कर्म प्रयुक्तमपि फलं न साधयेद् विगुणमिति, तत् परिहर्त्तव्यम् ॥ ३० ॥ आ० ॥

## न काम्यत्वात् ॥ ३१ ॥

नैष परिहारः । कामत्वात् । कामयिष्यते शूद्रः । अभीवर्त्त नाम

ब्रह्मसाम । तद्धि अनारभ्य किञ्चिद् आम्नातमविशेषेण । चक्षुर्विमित आदध्यादिति अनियतप्रक्रमेषु शूद्रस्य नियम्यते । व्रतेऽपि, मस्तु शूद्रस्येति सम्बन्धदर्शनादध्यवसीयते । मस्तु एव शूद्रस्य । तस्माच्चातुर्वर्ण्यमधिक्रियेत ॥ ३१ ॥

## संस्कारे च तत्प्रधानत्वात् ॥ ३२ ॥

व्रते च विशेषोऽवगम्यते तत्प्राधान्यम् । पुरुषप्राधान्यं हि व्रते । किमतो, यत् पुरुषप्रधानता । एतदतो भवति । पुरुषप्रधानः संस्कारो न शक्नोत्यनुपसंह्रियमाणस्तस्याधिकारं व्यावर्त्तयितुम् । तत् कथमिति । यजेतेति हि स्वर्गकामेऽभिधीयमाने तत्कामः शूद्रो, नाभिहिते इति कथं गम्यते । किं हि स यागस्य पुरुषनिर्वर्त्यं न निर्वर्त्तयति । व्रतमिति चेत् । न । सामर्थ्योपजननाय हि तद् यस्यैवोच्येत, तस्यैव तेन विना न सामर्थ्यं, नान्यस्य । एवमेव हि व्रतस्याङ्गभावो, यत् कर्त्तारं समर्थं करोति । यस्य तु तेन न प्रयोजनं, स तदनपेक्ष्यैव यागमभिनिर्वर्त्तयति । तस्मादप्यशूद्रवर्जनम् ॥ ३२ ॥ युक्तिः ॥

## अपि वा वेदनिर्देशादपशूद्राणां प्रतीयेत ॥३३॥

एवं न प्रापकाणि श्रवणानीत्युक्तम् । शक्यते तु वक्तुं प्रापकाणीति । न च सूत्रकारेण तद् व्यपदिष्टं, नैमित्तिकेष्वपि तेषु सत्सु शक्य एव शूद्रपर्युदासो वक्तुमिति, न तदादृतम् । हेत्वन्तरं व्यपदिष्टम् । अपि वेति पक्षव्यावर्त्तनम् । एवमपि सति नैमित्तिकेऽपि ब्राह्मणादिश्रवणे सति अपशूद्राणामेवाधिकारः । कुतः । वेदनिर्देशात् । वेदे हि त्रयाणां निर्देशो भवति । वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यं, वर्षासु वैश्यमिति । वेदाभावादसमर्थः शूद्रो यष्टुम् । तस्मान्नाधिक्रियेत ॥ ३३ ॥ उत्तरम् ॥

## गुणार्थित्वान्नेति चेत् ॥ ३४ ॥

गुणेनाध्ययनेन अर्थः । शूद्रोऽनुपनीतः स्वयमुपेत्याध्येष्यते । तथाऽस्य सामर्थ्यं जनिष्यते इति ॥ ३४ ॥ आ० ॥

## संस्कारस्य तदर्थत्वाद् विद्यायां पुरुषश्रुतिः ॥ ३५ ॥

उच्यते । विद्यायामेवैषा पुरुषश्रुतिः । उपनयनस्य संस्कारस्य तदर्थत्वात् । विद्यार्थमुपाध्यायस्य समीपमानीयते, नादृष्टार्थं, कुड्यं वा कर्त्तुम् । सैषा विद्यायां पुरुषश्रुतिः । कथमवगम्यते । आचार्य-

करणमेतदभिधीयते । कुतः । आत्मनेपददर्शनात् । नयतिराचार्य्य-करणे वर्त्तते । तदर्थसम्बन्धादुपनयनमाचार्य्यकरणप्रयुक्तम् । वेदाध्यापनेन ह्याचार्य्यो भवति । तस्माद् वेदाध्ययने ब्राह्मणादयः श्रुताः । शूद्रस्य न श्रुतं वेदाध्ययनम् । अतोऽवेदत्वादसमर्थः शूद्रो नाधिक्रियते इति ॥ ३५ ॥ आ० ॥

## विद्यानिर्देशान्नेतिचेत् ॥ ३६ ॥

इति चेत् पश्यसि, अवैद्यत्वादसामर्थ्यादनधिकृतः शूद्र इति । नैष दोषः । विद्यानिर्देशात् । विद्यां निर्देक्ष्यति । अनुक्तामप्यध्येष्यते इति शक्यते हि अनुक्तमप्यध्येतुम् । तस्माच्चातुर्वर्ण्यस्याप्यधिकारः ॥ ३६ ॥

## अवैद्यत्वादभावः कर्मणि स्यात् ॥ ३७ ॥

न चैतदस्ति । शूद्रोऽध्येष्यते इति । प्रतिषिद्धमस्याध्ययनं, शूद्रेण नाध्येतव्यमिति । अधीयानस्याप्यध्ययनं सफलं न भवति, दोषश्च जायते । अतोऽवैद्यः शूद्रः । अस्याभावः कर्मणीति सिद्धम् ॥ अथापि वैद्यत्वेन सिद्ध्येत्, तथाप्यनग्नित्वादभावः कर्मणि स्यात् । अथ कथमनग्नितेति । प्रापकाणि हि ब्राह्मणादीनामाधाने वाक्यानि । ननु य एवं विद्वानग्निमाधत्ते इत्याधानस्य विधायकम् । तत्र ब्राह्मणस्य, वसन्ते अग्निमादधीतेति निमित्तार्थानि वचनानीति गम्यते । अत्रोच्यते । ब्राह्मणोऽग्निमादधीतेति श्रुत्या विधानं गम्यते । य एवं विद्वानग्निमाधत्ते इति स्तुत्या । तदानुमानिकं प्रत्यक्षश्रुताद् दुर्बलम् । तस्मात् प्रापकाणि वचनानि । अतः शूद्रस्यानधिकारः ॥ ३७ ॥ आ०नि० ॥

## तथा चान्यार्थदर्शनम् ॥ ३८ ॥

अन्यार्थदर्शनं च भवति । यथा शूद्रस्य नाध्ययनमिति । किं लिङ्गं भवति ॥ यद्यु वा एतत् श्मशानं यत् शूद्रः । तस्मात् शूद्रसमीपे नाध्येयमित्यनध्ययनं शूद्रस्य दर्शयति । तस्मादपशूद्राणामधिकारः । नन्वाहवनीयाद्विनापि, यागो वचनप्रामाण्याच्छूद्रस्य विधीयते । उच्यते । नाऽत्र यागसद्भावो विधीयते स्वर्गकामस्य, किं तर्हि स्वर्गफलता विशिष्टस्य यागस्य । तस्मादसम्भवः शूद्रस्याग्निहोत्रादिषु ॥ ३८ ॥ युक्तिः ॥ यागे शूद्रस्यानधिकाराधिकरणम् ॥ ७ ॥

## त्रयाणां द्रव्यसम्पन्नः कर्मणो द्रव्यसिद्धित्वात् ॥ ३९ ॥

अग्निहोत्रादिष्वेव सन्देहः । किमद्रव्यस्याधिकारो न ? इत्युच्यते । त्रयाणां द्रव्यसम्पन्नोऽधिक्रियेत, नाऽद्रव्यः । कुतः । न हि शक्नोत्यद्रव्यो द्रव्यसंयुक्तं कर्मानुष्ठातुम् । तस्मादद्रव्यस्यानधिकारः ॥ ॥ ३९ ॥ ॥ पूर्व० ॥

## अनित्यत्वात्तु नैवं स्यादर्थाद्धि द्रव्यसंयोगः ॥ ४० ॥

नैवं स्यात् । यदुक्तमद्रव्यस्यानधिकार इति । कुतः । अनित्यत्वात् । अनित्यो द्रव्यसंयोगः । न हि कश्चिज्जात्या अद्रव्य एवं पुरुषः । अस्त्युपायो येन द्रव्यवान् भवति । यः शक्नोति यष्टुं, तस्य यजेतेति वाचको भवति । यो न कथञ्चिदपि शक्नोति यागमभिनिर्वर्त्तयितुं, तं नाधिकरोति यजेत—शब्दः । यस्तु केनचित् प्रकारेण शक्नोति, न तं वर्जयित्वा प्रवर्त्तते । अर्थाच्च द्रव्यसंयोगो भविष्यति । जीविष्यति विना धनेनेत्येतदनुपपन्नम् । तस्मादर्थाद् द्रव्यसंयोगः ॥ ४० ॥ सिद्धान्तः ॥ यागे निर्धनस्याधिकाराधिकरणम् ॥ ८ ॥

## अङ्गहीनश्च तद्धर्मा ॥ ४१ ॥

अग्निहोत्रादिष्वेवाङ्गहीनं प्रति सन्देहः । किमसावधिक्रियते, उत नेति । तत्राप्यधिकरणातिदेशः । असमर्थ इति कृत्वा पूर्वः पक्षः । शक्तेर्विद्यमानत्वादुत्तरः । तदिदमभिधीयते, अङ्गहीनश्च तद्धर्मा । किं धर्मा ? अद्रव्यधर्मा इति ॥ ४१ ॥ यागेऽङ्गहीनस्याप्यधिकाराऽधिकरणम् ॥ ९ ॥

## उत्पत्तौ नित्यसंयोगात् ॥ ४२ ॥

यस्य त्वप्रतिसमाधेयमङ्गवैकल्यं तं प्रति विचारः । किमधिक्रियते, न ? इति । पूर्वाधिकरणेन अधिक्रियते इति प्राप्ते ब्रूमः । नाधिक्रियते इति । कुतः । शक्त्यभावात् । नासौ केनाचिदपि प्रकारेण शक्नोति यष्टुम् । तस्मात्तस्याऽधिकारो न गम्यते ॥ ननु यच्छक्नोति तत्राधिक्रियत इति चक्षुर्विकलो विना आज्यावेक्षणेन, विना विष्णुक्रमैः पङ्गुः, विना प्रैषादिश्रवणेन च बधिरः । एतान् पदार्थान् प्रति चक्षुर्विकलादीनामनधिकार इति । नेत्युच्यते । न आज्यावेक्षणादि पुरुषं प्रति निर्दिश्यते । यदि हि तं प्रति निर्दिश्येत ततो विकलोऽप्यधिक्रियेत । क्रतुं प्रति एषामुपदेशः, प्रकरणाविशेषात् । पुरुषस्य चाख्यातेनानभिधानादिति । उक्तमेतद्, विधिर्वा संयोगान्तरादित्यत्र । तैश्च विना

विगुणं कर्म प्रयुक्तमपि न फलं साधयेत् । तस्मात्तस्यानधिकारः ॥ ४२ ॥ अचिकित्स्याङ्गवैकल्यस्य यागानधिकाराधिकरणम् ॥ १० ॥

### अत्र्यार्षेयस्य हानं स्यात् ॥ ४३ ॥

दर्शपूर्णमासयोः श्रूयते– आर्षेयं वृणीते, एकं वृणीते, द्वौ वृणीते, त्रीन् वृणीते, न चतुरो वृणीते, न पञ्चातिवृणीते इति । तत्र सन्देहः । किम् अत्र्यार्षेयस्य अधिकारः, उत नेति । किं प्राप्तम् । अत्र्यार्षेयोऽप्यधिक्रियते इति । कुतः । आर्षेयं वृणीते इति सामान्यवचनम् । तस्मादेकं वरिष्यति द्वौ वा । तच्च दर्शयति— एकं वृणीते द्वौ वृणीते इति । तथा प्रतिषेधति, न चतुरो वृणीते इति न पञ्चातिवृणीते इति । न हि अप्राप्तस्य प्रतिषेधोऽवकल्पते । तस्मादत्र्यार्षेयोऽप्यधिक्रियेत ॥ एवं प्राप्ते ब्रूमः । यो न त्र्यार्षेयः स नाधिक्रियेत । कुतः ? । त्रीन् वृणीते इति विशेषवचनात् । विधिश्च अप्राप्तत्वात् । नन्वेकं वृणीते इत्यपि विशेषवचनमस्ति । नेत्युच्यते । विधायिकाया विभक्तेरभावात् । ननु स्तुत्या विधास्यन्ते । यथा, त्रीन्, वृणीते इति । उच्यते । त्रयाणामेव स्तुतिः । सा त्रित्वं विधास्यति । एकं वृणीते इत्यवयुत्यनुवादोऽयं त्रयाणामेव । तत्रापि त्रित्वमेव श्रूयते विधातुम् । एवमेकवाक्येन विधानं भविष्यतीति । न चतुरो वृणीते, न पञ्चातिवृणीत इति नित्यानुवादो भविष्यति । तस्मात् त्र्यार्षेयस्य अधिकारो, नान्यस्येति ॥४३॥ दर्शपूर्णमासयोस्त्र्यार्षेयस्यैवाऽधिकाराधिकरणम् ॥ ११ ॥

### वचनाद्रथकारस्याधानेऽस्य सर्वशेषत्वात् ॥ ४४ ॥

आधाने श्रूयते, वर्षासु रथकार आदधीतेति । तत्र सन्देहः । किं त्रैवर्णिकानामन्यतमो रथकारः, आहोस्वित् अत्रैवर्णिक इति । किं प्राप्तम् । रथकारस्य अत्रैवर्णिकस्याधानमेतत् । कुतः । वचनात् । न हि वचनस्य किञ्चिदकृत्यमस्ति । सर्वशेषश्चात्रैवर्णिक आधाने । ब्राह्मणराजन्यविशामुक्तमाधानम् । परिशेषादत्रैवर्णिको रथकारः स्यात् ॥ ४४ ॥ सि० ॥

### न्याय्यो वा कर्म्मसंयोगाच्छूद्रस्य प्रतिषिद्धत्वात् ॥४५॥

न्याय्यो वा स्यात् त्रैवर्णिको रथकारः, रथकर्मणा विशेषेणोच्यते । शूद्रो हि असमर्थत्वात् प्रतिषिद्धः । तस्मात् त्रैवर्णिको रथ-

कारः स्यात् ॥ ४५ ॥ पूर्व० ॥

अकर्म्मत्वात्तु नैवं स्यात् ॥ ४६ ॥

नास्ति त्रैवर्णिको रथकारः । प्रतिषिद्धं हि तस्य शिल्पोपजीवित्वम् । अत्रैवर्णिकस्त्वास्ति । तस्माद् वचनप्रामाण्यात् स आधास्यते ॥ ४६ ॥ उत्तरम् ॥

आनर्थक्यं च संयोगात् ॥ ४७ ॥

ब्राह्मणादिषु वसन्तादयो नियताः । तान् प्रति वर्षा उच्यमाना अप्यसम्बन्धादानर्थक्यं प्राप्नुयुः । तस्मादत्रैवर्णिको रथकार इति ॥ ४७ ॥ युक्तिः ॥

गुणार्थेनेति चेत् ॥ ४८ ॥

एवं चेत् पश्यसि, नास्ति त्रैवर्णिको रथकारः । प्रतिषिद्धत्वाच्छिल्पोपजीवित्वस्येति गुणार्थेन कश्चिद्भविष्यति रथकारो वैतथ्येन। तस्येदमाधानं विज्ञायते ॥ ४८ ॥ आ० ॥

उक्तमनिमित्तत्वम् ॥ ४९ ॥

उक्तमेतदस्माभिः, न निमित्तार्थान्येतानि श्रवणानीति । किमतो यदि न निमित्तार्थानि ॥ एतदतो भवति, प्रापकाणीति । प्रापितत्वात् तेषामाधानस्य, पुनः प्रापकमनर्थकम् । तेन यस्याप्राप्तं, तस्य भविष्यतीति । अथोच्येत, एतदेकं निमित्तार्थं भविष्यतीति । नैतदेवमवकल्पते । वसन्तादिसंयुक्तं तत् कथमिव वर्षाभिः सम्बद्ध्येत। अपि च । प्रापकपक्षे आधानं विधीयते श्रुत्या । निमित्तपक्षे पुनर्वर्षा विधातव्याः, वाक्येन । श्रुतिश्च वाक्याद् बलीयसीति । तस्मादत्रैवर्णिकस्येदमाधानमिति ॥ ४९ ॥ आ० नि० ॥

सौधन्वनास्तु हीनत्वान्मन्त्रवर्णात् प्रतीयेरन् ॥५०॥

न तु सर्व एवाऽत्रैवर्णिको रथकारः । सौधन्वनाः इत्येष जातिवचनः शब्दः । सौधन्वना नाम जातिरभिधीयते । हीनास्तु किञ्चित् त्रैवर्णिकेभ्यः । जात्यन्तरं, न तु शूद्राः, न वैश्या, न क्षत्रियाः । तेषामिदमाधानम् । कथमवगम्यते । प्रसिद्धेर्मन्त्रवर्णाच्च । मन्त्रवर्णो हि भवति। सौधन्वना ऋभवः शूरचक्षस इति । ऋभूणान्त्वेति रथकारस्याधानमन्त्रः । तस्मात् सौधन्वना ऋभव इति । ऋभवश्च रथकाराः । अपिच, नेमिं नयन्ति ऋभवो यथा इति ये नेमिं नयन्ति ते

ऋभव इत्युच्यन्ते । रथकाराश्च नेमिं नयन्ति । तस्मात्त्रैवर्णिकाना-मशूद्राणामेतदाधानमिति ॥ ५० ॥ द्वितीयसिद्धान्तः ॥ चातुर्वर्णाति-रिक्तस्य रथकारस्याधानेऽधिकाराधिकरणम् ॥ १२ ॥ रथकारन्यायः ॥

## स्थपतिर्निषादः स्याच्छब्दसामर्थ्यात् ॥ ५१ ॥

वास्तुमध्ये रौद्रं चरुं निर्वपेद् यत्र रुद्रः प्रजाः शमयेदित्येता-मिष्टिं प्रकृत्य उच्यते । एतया निषादस्थपतिं याजयेदिति । निषाद-स्थपतिं प्रति सन्देहः । किमधिकृतानामन्यतमः, उतान्य एवेति । अन्यतम इति ब्रूमः । स हि समर्थः । विद्वत्त्वादग्निमत्त्वाच्च । अन्यो-ऽविद्वत्त्वादनग्नित्वादसमर्थ इति ॥

ननु निषादस्थपतिशब्दस्तत्र नोपपद्यते । उच्यते । न, नोपपद्य-ते । निषादानां स्थपतिरिति षष्ठीसमासो भविष्यति, श्रेष्ठो निषा-दानाम् । तस्मादधिकृताधिकारमेतच्छास्त्रमिति । एवं प्राप्ते ब्रूमः । स्थपतिर्निषादः स्यात् । शब्दसामर्थ्यान्निषाद एव स्थपतिर्भवितुमर्ह-ति ? । कस्मात् । शब्दसामर्थ्यात् । निषादं हि निषादशब्दः शक्नो-ति वदितुं श्रवणेनैव । निषादानां तु स्थपतिं लक्षणया ब्रूयात् । श्रुति-लक्षणाविषये च श्रुतिर्न्याय्या, न लक्षणा । अथोच्यते, नैष दोषः । निषादशब्दो निषादवचन एव । षष्ठी सम्बन्धस्य वाचिकेति । तन्न । षष्ठ्यश्रवणात् । नात्र षष्ठीं शृणुमः । आह । लोपसामर्थ्यात् षष्ठ्यर्थोऽवगम्यते इति । सत्यमवगम्यते । न तु लोपेन । केन तर्हि । निषादशब्दलक्षणया । तस्याश्च दौर्बल्यमित्युक्तम् । समानाधिकरण-समासस्तु बलीयान् । तत्र हि स्वार्थे शब्दौ वृत्तौ भवतः । द्विती-या च विभक्तिस्तन्त्रेणोभाभ्यां सम्बद्ध्यते । तेन द्वितीयानिर्दिष्टो निषादो गम्यते । तत्र षष्ठ्यर्थं कल्पयन्नश्रुतं गृह्णीयात् । तस्मान्निषाद एव स्थपतिः स्यात् ॥ ५१ ॥

## लिङ्गदर्शनाच्च ॥ ५२ ॥

लिङ्गं दृश्यते । कूटं दक्षिणा इति निषादस्य द्रव्यं दर्शयति । कूटं हि निषादानामेवोपकारकं, न आर्य्याणाम् । एवं स्वमेव तन्निषा-दानामिति ॥ ५२ ॥ त्रैवर्णिकभिन्नस्य निषादस्य रौद्रयागेऽधिका-राधिकरणम् ॥ १३ ॥ निषादस्थपतिन्यायः ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्य प्रथमः पादः ॥ ६ ॥ १ ॥

अथ षष्ठे अध्याये द्वितीयः पादः ॥ ६ ॥ २ ॥

## पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्यात् ॥ १ ॥

द्वादशाहेन प्रजाकामं याजयेद् ऋद्धिकामा उपेयुः । तथा तत्र तत्रैवङ्कामाः सत्रमुपेयुः, सप्तदशावराश्चतुर्विंशतिपरमाः सत्रमासीरन्निति । तेषु सन्देहः । किं तस्य तस्य कृत्स्नेन फलेन अर्थिनः सत्रेऽधिकारः ? उत पर्षदोऽर्थिन्या अधिकार इति । आह । नन्वार्थिनो बहुसंख्याविशिष्टा निर्दिश्यन्ते, कथमेषामेकशोऽधिकारो भविष्यतीति । उच्यते । ऋद्धिकामा इत्येवमादि विधीयमानम् ऋद्धिलक्षितेषु समस्तेषु व्यस्तेषु च प्राप्तं न शक्यं बहुवचनेन विशेषेऽवस्थापयितुम् । तेन तं तमधिकुर्य्यात्, पर्षदं वेति भवति सन्देहः ॥

किं तावत् प्राप्तम् । एकैको न समर्थो बहुकर्तृकं सत्रं रचयितुम् । पर्षदं तु कर्त्रीमर्थिनीमवगच्छामः । न चाकर्तुः फलं भवति न चैकः कर्त्ता उच्यते । तस्मात् समस्तानां फलम् । एकैकस्य फलाऽवयवः । मध्यकं स्यात् कृत्स्नं फलमिति ॥ एवं प्राप्ते ब्रूमः । तस्य तस्यार्थिनः कृत्स्नं फलं सत्रान्निवर्त्तते । कुतः । पुरुषार्थस्यैकैकस्य सिद्धिर्यतो भवति । सह क्रियमाणे सर्वे एकैकः पुरुषार्थं साधयति तन्त्रेण । कर्तॄणां फलं च भवति । एकैकश्चात्र कर्त्ता ॥ आह । नन्वेतदुक्तमेकैको न शक्नोति बहुकर्तृकं कर्तुमिति । उच्यते । शक्नोत्येकैकस्य स्वातन्त्र्यविवक्षायाम् । यदा एकैकः स्वातन्त्र्येण प्रवर्त्तते तदाऽन्यान् सङ्ख्यानिर्वृत्त्यर्थं सामादिभिः प्रयोक्ष्यते । एवमेकः पुरुषार्थं साधयति, इतर इतरश्चातेन सर्वे कर्त्तारः सव्यपेक्षा भविष्यन्ति । सर्वेऽत्र कर्त्तारः, पृथक्पृथगेव फलेन सम्भन्त्स्यन्ते ॥ १ ॥ सि० ॥

## अपि चोत्पत्तिसंयोगो यथा स्यात् सत्त्वदर्शनं तथा भावो विभागे स्यात् ॥ २ ॥

अपि च, नैतदविरुद्धम् । यदेकं कर्म बहुभिः क्रियत इति यदुच्येत । विरुद्धम् । एकेन कर्मणि कृते द्वितीयः किं कुर्यादिति । अत्रोच्यते । पर्यायेण । क्रियायामेवं दोषः । तन्त्रेण तु क्रियायां भवति कश्चित् सम्भवः । यथा स्यात् सत्त्वदर्शनं तथा भावो विभागे स्यात् । यथा एकैकस्य सत्त्वस्य हस्तिनोऽश्वस्य वा दर्शनमेकैकेन कृत्स्नम्

ऽभिनिर्वर्त्यते । एवमेव सत्रे तन्त्रभावो भवेत् । सर्वेषां मध्यकं द्रव्यम् । मध्यकस्याऽऽहवनीयस्योपरि अध्वर्युरपविद्धाति । तत्र सर्वे कर्त्तारस्तन्त्रेण भवन्ति ॥ न चायोत्पन्नसंयोगः । उत्पत्त्यैव तु सङ्ख्यया कर्म संयुज्यते । यदि हि उत्पन्नं संयुज्येत, ततोऽनेकसम्बन्धार्थमिति वचनं गम्येत । उत्पत्तिसंयोगे त्वेतन्नास्ति । तस्मादेकैकस्य कृत्स्नेन फलेनाऽभिसम्बन्ध इति ॥ २ ॥ युक्तिः ॥ सत्रे प्रत्येकस्य सत्रिणः फलसम्बन्धाधिकरणम् ॥ १ ॥

## प्रयोगे पुरुषश्रुतेर्यथाकामी प्रयोगे स्यात् ॥ ३ ॥

दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेतेति श्रूयते । अत्र सन्देहः । किमानियमेन एको द्वौ बहवो वा यजेरन्, अथवैक एव यजेतेति । ननु तृतीये उक्तं, शास्त्रफलं प्रयोक्तरीति । यदा प्रयोक्तरि, तदा विवक्षितमेकत्वं यथा, तथा वक्ष्यामः । इह तु तदेवाक्षिप्यते । पुनश्च निर्णेष्यते इति ॥

किं प्राप्तम् ? यथाकामी प्रयोगे स्यात् । कुतः ? । पुरुषश्रुतेः । पुरुषः श्रूयते । पुरुषे यागं श्रावयित्वा कृतार्थः शब्द एकस्य द्वयोर्बहूनां वा यागं न वारयति । नाऽसौ पुरुषो यागे श्रूयते, यागमभिनिर्वर्त्तयेद्, यागेन वा फलमभिनिर्वर्त्तयेदिति । कथन्तर्हि । यागेन फलं प्राप्नुयादिति । यागस्य वा फलनिर्वृत्तेर्वा नाङ्गं पुरुषः । यदि हि अङ्गमभविष्यद् यागे फलनिर्वृत्तौ वा, तदा संख्या गुणभूता तदङ्गं पुरुषं परिच्छिन्द्यात् । अथ पुनरनङ्गीभूतं प्रकाशयल्लक्षणत्वेनैव पुरुषेऽभिसम्बद्ध्येत, न गुणवचनतया । तत्र चाविवक्षितं सङ्ख्यावचनम् । यावान् अर्थी समर्थश्च तावन्तं सर्वमधिकृत्य एतदुच्यमानं न शक्यते एकेन वचनेन विशेषयितुम् । कथञ्च पुरुषप्राधान्यम् । न फलोत्पत्त्या किञ्चित् प्रयोजनमस्ति, न यागोत्पत्त्या । आत्मा तु फलसम्बद्धः सर्वस्येष्टः । तदर्थं कर्म कर्त्तव्यम् । इतरथोच्यमानमपि न क्रियेत । तत्र वचनानर्थक्यं स्यात् । तस्माद् यथाकाम्यं स्यादेको द्वौ बहवो वा यजेरन्निति । तथा च दर्शयति, युवं हि स्थः स्वर्पती इति । द्वयोर्यजमानयोः प्रतिपदं कुर्यादिति । एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्य इति द्वयोर्बहूनां च यागं प्रदर्शयति ॥३॥ पूर्व०॥

## प्रत्यर्थं श्रुतिभाव इति चेत् ॥ ४ ॥

इति चेत् । इदं चेत् पश्यसि— प्रत्यर्थं श्रुतिभावः स्यात्, यागमभिनिर्वर्त्तयेत् ततश्च फलं प्राप्नुयादिति । कुतः ? । एतदुभयं हि एतस्माद् अवगम्यते । कतरदत्र जहीम इति नाध्यवस्यामः । तस्माद् उभयमपि प्रत्येतव्यम् । आह । नन्वनेकार्थवचनता न न्याय्येति । उच्यते । यद् अवगम्यते तन्न्याय्यम् । उभयं च प्रतीयते । तस्मादुभयार्थवचनतैव न्याय्या । यागं प्रति च गुणभावाद् विवक्षितमेकवचनम् ॥ ४ ॥ आ० ॥

## तादर्थ्ये न गुणार्थताऽनुक्तेऽर्थान्तरत्वात् कर्तुः प्रधानभूतत्वात् ॥ ५ ॥

नैतदेवं, तादर्थ्ये पुरुषे प्रधानभूते सति न अङ्गभूतः पुरुषः प्रतीयते । अनुक्ते हि न्याये न प्रतीमोऽर्थान्तरम् । यतो गुणभावात् प्रधानभावः । प्रधानभूतश्चात्र कर्त्ता । वचनस्यार्थवत्त्वात् । अतो न गुणभावः कर्तुरवकल्पते । चोदनैकत्वात् । एका हि विधायिका चोदना। सा यदि फलोत्पत्तिं वा यागोत्पत्तिं विधत्ते, तदा कर्त्ता न स्वार्थेन । यदा पुनः स्वार्थेन, तदा यागः फलं वा तादर्थ्येन । न चैतद् यौगपद्येन भवति, स्वार्थ एकस्तदर्थ इतरो वैपरीत्येन वेति । यथोभाभ्यां बाहुभ्यामिषूनस्यति देवदत्त इति । गम्यते, न च यौगपद्येन । यदा दक्षिणेनास्यति, तदा सव्येन धनुःपृष्ठं नमयति, न तेनाप्यस्यतीति गम्यते । तत्र व्यापृतत्वात् । एवं यदा पुरुषप्राधान्यं, तदा यागस्य फलस्य वा गुणभावो गम्यते । तत्र व्यापृतत्वान्न तयोः प्राधान्यमपि गम्यते । तस्मान्न यागे फले वा पुरुषस्य गुणभावः । अतो यथाकाम्यं स्याद्, एको द्वौ बहवो वा यजेरन्निति ॥ ५ ॥ आ०नि० ॥

## अपि वा कामसंयोगे सम्बन्धात् प्रयोगायोपदिश्येत प्रत्यर्थं हि विधिश्रुतिर्विषाणावत् ॥ ६ ॥

अपि वेति पक्षव्यावृत्तिः । प्रयोगायोपदिश्येत कर्त्ता, न स्वार्थेन। कथम् । यजेतेत्यस्यार्थः, यागं कुर्याद्, यागेन वा कुर्यादिति । सत्ताऽभिव्यक्तिमात्रं गम्यते, न फलस्य कर्त्ता धाता वा । स्वर्गकामशब्दश्च स्वर्गकाममात्रे वर्त्तते, न विशेषमवलम्बते, आत्मनः परस्य वेति । शब्दप्रमाणकाश्च वयमीदृशेष्वर्थेषु । कथन्तर्हि कामस्यात्मसम्बन्धोऽवगम्यते । सम्बन्धात् । फलकामोऽनुक्तेऽपि शब्देन आत्मन एव

फलं कामयते, न परस्य । यत्र तूभावर्थौ वक्तव्यौ भवतः, प्रत्यर्थं तत्र विधिः श्रूयते । यथा कृष्णविषाणया कण्डूयति, चात्वाले कृष्णविषाणां प्रास्यतीति । यत्रैवं द्वे श्रुती विधात्र्यौ भवतस्तत्र गुणभावः प्राधान्यं च गम्यते।न त्वत्रैवं द्वे विधायिके श्रुती विद्येते। गुणभूतस्तु पुरुषः श्रूयते भावयेदिति । तत्र यज्यर्थः करणं कर्म वा । सम्बन्धात्तु पुरुषप्राधान्यं, न कस्यचित् सुखेन उत्पन्नेन प्रयोजनम्।सुखसम्बन्धेन आत्मनस्तु कृत्यम् । तस्मात् सम्बन्धात् पुरुषप्राधान्यं गम्यते, न श्रुतेः । अतो गुणभूतस्य पुरुषस्य सङ्ख्या विवक्षितेति ॥ ६ ॥ सि० ॥

## अन्यस्य स्यादिति चेत् ॥ ७ ॥

इति चेद् भवान् पश्यति, एवं सति यदि स्वर्गकामोऽन्यस्यापि स्वर्गं कामयमानो भवति । अन्यस्य स्वर्गं कामयमानोऽपि अन्यो यजेत । तत्र पूर्वोक्तो न्यायः प्रत्युद्धृतो भवति, शास्त्रफलं प्रयोक्तरीति ॥ ७ ॥ आ० ॥

## अन्यार्थेनाभिसम्बन्धः ॥ ८ ॥

न परस्य स्वर्गकाम इत्येवं न यजेत, न अन्यस्य स्वर्गकामशब्दो न वाचक इति । कथं तर्हि । फलमसौ न प्राप्नोऽतीति । कथं पुनः फलस्याप्राप्तिः । उपग्रहविशेषश्रवणात् । यजेतेति । यद्वा आधाने । ब्राह्मणो वसन्तेऽग्निमादधीतेति । तदा तु कामश्रुतावुपग्रहोऽनुवाद एव ॥ ८ ॥ आ० नि० ॥

## फलकामो निमित्तमिति चेत् ॥ ९ ॥

एवञ्चेद् भवान् मन्यते, न स्वर्गकामशब्दो न वाचक इति । अन्यो न यजते फलाभावात् । नास्य याग इति । सूक्तवाकफलार्थितया तर्हि यजेत। आशास्तेऽयं यजमानः, आयुराशास्ते इति प्रयोजयितारं निर्देक्ष्यति होता । फलविधिश्च सूक्तवाकेन प्रस्तरं प्रहरतीति विधानात् । यदि फलविधिरयं मान्त्रवर्णिकस्तर्हि सूक्तवाकेन प्रस्तरः प्रहृतो भवति । इतरथा अदृष्टं कल्प्येत।तस्माद् आनुषङ्गिकफलार्थमन्यस्य स्वर्गकामोऽन्यो यजेतेति ॥ ९ ॥ आ० ॥

## न नित्यत्वात् ॥ १० ॥

नैतदस्ति । यस्यैव प्रधानकर्म्मफलं, तस्यैवानुषङ्गिकमपि भवितुमर्हति । एवं स्वार्थेन आधानं कृतं भवति । न हि आधानस्य

स्वार्थतायामस्ति विशेषः । प्रधानफलं वा आनुषङ्गिकं वा सर्वमेव आधातरि समवेतुमर्हति । नित्यकाम्यता च विरुध्येत । यद्यायुरादिकामो यजेत, न तर्हि नित्यम् । यदि नित्यं न आयुरादिकामः । तस्मान्नावस्थितो न्यायः प्रत्युद्ध्रियेत । न च पुरुषः प्रधानभूतश्चोद्यते । गुणभावात्त्वस्य विवक्षितमेकत्वम् । तस्मादेक एव यजेत ॥ ॥ १० ॥ आ०नि० ॥

## कर्म तथेति चेत् ॥ ११ ॥

अथ यदुक्तं, द्वयोर्बहूनाञ्च यागं दर्शयति । युवं हि स्थः स्वःपती इति द्वयोर्यजमानयोः प्रतिपदं कुर्य्यात् । एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः प्रतिपदं कुर्य्यादिति । द्वियजमानके बहुयजमानके च कर्मणि प्रतिपद्विधानं कर्म तथा युक्तं स्यादिति । तत् परिहर्तव्यम् ॥ ११ ॥ आ० ॥

## न समवायात् ॥ १२ ॥

नैतदेवम् । समवेतं हि कर्म विद्यते द्वाभ्यां यजमानाभ्यां बहुभिश्च यजमानैः । वचनेन । यथा अहीनाः । तेषु प्रतिपद्विधानमर्थवद् भविष्यति । तस्मादेको यजेतेति ॥ १२ ॥ ॥ आ० नि० ॥ दर्शादौ कर्त्रैक्यनियमाधिकरणम् ॥ २ ॥

## प्रक्रमात्तु नियम्येतारम्भस्य क्रियानिमित्तत्वात् ॥१३॥

प्रजाकामो यजेत, ग्रामकामो यजेतेत्येवमादि कर्म समाम्नायते। तत्र सन्देहः । किं प्रक्रान्तं नियोगतः समापनीयम्, उतेच्छया कार्यं हेयं वेति । किं प्राप्तम् । नियोगतः परिसमापयितव्यमिति । कुतः । एवं हि श्रूयते । इदङ्कामो यजेतेति । एवं तस्याऽऽख्यातस्यार्थमुपदिशन्ति । उपक्रमप्रभृति अपवर्गपर्यन्तमाहेति । उपक्रमादारभ्य यावत् परिसमाप्तिरित्येतावान् व्यापारविशेषस्तस्यार्थो, न यथा पाकस्त्याग इति । तत्र हि पाकसत्तामात्रं निर्दिश्यते, न आरभ्य परिसमापयितव्यमिति । एवञ्चाऽऽख्यातार्थे लौकिका अपि प्रतिपद्यन्ते। तत्र न आरम्भे पुरुषप्रयत्नश्चोद्यते इति गम्यते । यतश्चोदितं न नियोगत आरभन्ते । नियोगतः पुनः परिसमापयन्ति । तेन नोभे आरम्भपरिसमाप्ती शब्दार्थः । किन्तर्हि । परिसमाप्तिः शब्दार्थः । परिसमाप्त्यामर्थप्राप्तत्वादारम्भस्य ।

तस्मात् परिसमाप्तिः शब्दार्थ इति गम्यते। सा चेच्छब्दार्थः, सा कर्त्तव्यतया चोद्यते । आरम्भे नास्ति कर्तव्यतावचनम्। तेन न नियोगत आरम्भः। नियोगतस्तु परिसमाप्तिः । तेनोपक्रान्ते कर्मणि यदि वीयात् फलेच्छा, अवाप्नोति वा फलं, तस्यामप्यवस्थायां कर्त्तव्यमेवोपक्रान्तस्य परिसमापनम् ॥ नन्वर्थिनो योऽर्थः, सोऽत्र कर्त्तव्यतयोच्यते । नैतदेवम् । वाक्यार्थो हि स भवति । यागस्य तु कर्त्तव्यता श्रुत्या गम्यते । तस्माद् ग्रामकामेन याग आरब्धः परिसमापनीयः। ग्रामादिकामनावचनं निमित्तत्वेन तदा भवति । निमित्ते चोत्पन्ने यत् कर्त्तव्यमित्युच्यते तद् विनष्टेऽपि निमित्ते कर्त्तव्यमेव । उपक्रान्तस्य समापनं कर्त्तव्यमिति चोद्यते । तद् विनष्टेऽपि निमित्ते कर्त्तव्यम् । न हि तद्विनष्टमनुत्पन्नं भवति । उत्पत्तिश्च निमित्तं, न भावः। तस्माद् वीतायामपि फलेच्छायामुपक्रान्तं परिसमापयितव्यम् । क्रियाया हि निमित्तमारम्भः । सोऽपि परिसमाप्तेरिति ॥१३॥ सि० ॥

## फलार्थित्वाद्वाऽनियमो यथानुपक्रान्ते ॥ १४ ॥

वाशब्दः पक्षं व्यावर्त्तयति । अनियमो वा । कस्मात् । फलार्थित्वात् । फलार्थिनः फलं चिकीर्षमाणस्योपायोऽयं विधीयते, न कर्त्तव्यता । सा हि विधीयमाना फलस्य वा यागस्य वा स्यात् । फलस्य न तावद् वक्तव्या । न हि यो यत् कामयते तस्य तत्कर्त्तव्यता उपदेष्टव्या । वेदैवासौ मयैवैतत् कर्त्तव्यमिति । उपायं तु न वेद, तमाकाङ्क्षते । इदमुपदिश्यते, याग उपाय इति यागेन क्रियते इति । न च यागस्य कर्त्तव्यता । प्रत्यक्षविरोधात् । प्रत्यक्षस्तु क्लेशो यागः। यदि यागेनान्यस्य कर्त्तव्यता, तदा न विरोधः । यागकर्त्तव्यतायां फलं कल्प्यम् । न च कल्प्यमानस्य प्रमाणमस्ति । कर्त्तव्योपदेशश्च शक्यादिष्वर्थेषु भवति । तस्माद् न यागः कर्त्तव्यः । फलकामस्य यदिष्टं तत् कर्त्तव्यमनूद्य यथाप्राप्तं यागस्य साधनता विधीयते । तेन नावश्यं समापनीयं भवति । यथाऽनुपक्रान्तं नावश्योपक्रमितव्यम् एवमुपक्रान्तं नावश्यं समापयितव्यम् । यत्तु वाक्यार्थः श्रुत्या बाध्यते इति । यत्र श्रुत्यर्थो न सम्भवति, तत्र वाक्यार्थो गृह्यते इत्युक्तमेव । तस्मादनियमः ॥ १४ ॥ पूर्व० ॥

## नियमो वा तन्निमित्तत्वात् कर्त्तुस्तत्कारणं स्यात् ॥१५॥

आरम्भो हि निमित्तं समाप्तेः । कथम् । तत् कर्तुः कारणं स्यात् । किं कारणम् । सत्यसङ्कल्पता । यो हि आरब्धमेवञ्जातीयकं समापयति, न तं शिष्टा विगर्हन्ते । प्राक्रमिकोऽयम् असंव्यवहार्य इति शिष्टविगर्हणा च दोषः । तस्माद् आरभ्य समपयितव्यम् । आह । शिष्टाः पुनः किमर्थं विगर्हन्ते इति । उच्यते । विगर्हन्ते तावत्, किं नो विदितेन कारणेनेति ॥ १५ ॥ ॥ उत्तरम् ॥ आरब्धकाम्यकर्मणोऽपि समाप्तिनियमाधिकरणम् ॥ ३ ॥

**लोके कर्माणि वेदवत्ततोऽधिपुरुषज्ञानम् ॥ १६ ॥**

केनचिद् गृहमुपक्रान्तं भवति, शकटं, रथो वा । वीता अस्य फलेच्छा, अवाप्नोति वा फलम् । तत्र सन्देहः । किं तेन नियोगतः परिसमापयितव्यम्, उतेच्छयोत्स्रष्टव्यमपीति । किं प्राप्तम् ? । लोके कर्माण्येवञ्जातीयकान्युपक्रम्य परिसमापयितव्यानि । यथैव वैदिकानि तथैव तानि नियोगतः परिसमापनीयानि । कुतः । ततोऽधिपुरुषज्ञानम् । ततस्तत्पुरुषज्ञानं भवितुमर्हति । कुतः । शास्त्रात् । आम्नायते हि तक्ष्णां शास्त्रम् । तत्रापि देवताव्यापारोऽङ्गीक्रियते । पूर्वस्यां दिशि एता देवताः, इतरासु एता इति । यदि शास्त्रकृते देवताव्यापारे उपक्रम्यापरिसमाप्यमाने शिष्टविगर्हणम्, एवमिहापि भवितुमर्हति ॥ १६ ॥ पूर्व० ॥

**अपराधेऽपि च तैः शास्त्रम् ॥ १७ ॥**

तेषां च लौकिकानामपराधे तैस्तक्षभिः प्रायश्चित्तशास्त्रमाम्नायते । आरे भग्ने इन्द्रबाहुर्वर्द्धव्यः । पायसं च ब्राह्मणो भोजयितव्य इति । प्रायश्चित्तं च यद्यदृष्टार्थं, न शास्त्रादृते । अथ प्रसङ्गपरिहारार्थं, ततोऽव्याहतमेव तदिति गम्यते ॥ १७ ॥ युक्तिः ॥

**अशास्त्रा तूपसम्प्राप्तिः शास्त्रं स्यान्न प्रकल्पकं तस्माद्दर्थेन गम्येताप्राप्ते वा शास्त्रमर्थवत् ॥ १८ ॥**

तुशब्दः पक्षं व्यावर्त्तयति । अशास्त्रा त्वेषामुपसम्प्राप्तिरिति ब्रूम । स्मृतेरस्याः शास्त्रं भवता अनुमीयते । न शास्त्रमन्तरेण स्मृतिः । न च स्मृतिः । न च स्मृतिमन्तरेण तक्ष्णां ग्रन्थ उपपद्यते इति । अत उच्यते, भवत्यत्र स्मृतिरेवमिदं गृहादि कर्म रमणीयं भवतीति । ना॰

ऽस्मात् कर्मणोऽदृष्टं किञ्चिदिति । या चासौ रमणीयता साऽन्तरेणाऽपि शास्त्रं शक्या ज्ञातुम् । ज्ञात्वा च स्मर्य्यते । तस्मान्नास्याः स्मृतेः शास्त्रं प्रकल्प्यम् । यद्यन्तरेण शास्त्रं, न प्राप्येत, ततः शास्त्रमत्राऽर्थवदिति प्रकल्प्येत । तस्मान्नेदं शास्त्रोक्तम् । शास्त्रोक्ते च सामिकृते त्यक्तेऽत्यन्तं शिष्टा गर्हन्ते, देवताश्रये च । नन्वत्रापि देवताः परिगृहीताः, अस्यां दिशि इयं देवता यक्ष्यतेऽस्यामियमिति । उच्यते । पुरुषमनु देवताः शिष्टाः स्मरन्ति, न गृहमनु । तस्माददोष इति ॥१८॥ सिद्धान्तः ॥ आरब्धलौकिककर्मणः समाप्तेरनियमाधिकरणम् ॥ ४ ॥

**प्रतिषेधेष्वकर्मत्वात् क्रिया स्यात् प्रतिषिद्धानां विभक्तत्वादकर्मणाम् ॥ १९ ॥**

इदं हि उपदिशन्ति । न कलञ्जं भक्षयितव्यम्, न लशुनं न गृञ्जनं चेति । तत्र सन्देहः । किमेवञ्जातीयकं फलकामेन न भक्षयितव्यम्, निष्कामेण आद्यम्, अथवा नियोगतो वर्जयितव्यमेवेति । किं प्राप्तम् । फलार्थिना न भक्षयितव्यम् । अनर्थिनोऽनियम इति । कुतः । नियमो ह्ययमुच्यते, इदं न भक्षयितव्यमिति । एवमुक्ते द्वयमापतति । यदि वा अभक्षणं कर्त्तव्यमिति, यदि वा भक्षणं न कर्त्तव्यमिति । यदि नञ्विशिष्टं भक्षणं कर्त्तव्यमित्यभ्युपगम्यते, ततोऽभक्षणं श्रुत्या तव्यो विदधाति । नञ् भक्षयतिविशेषणम् । तद्व्यापाराश्च कर्त्तव्यतया नञ् न सम्बद्ध्यते । अथ नञर्थः, ततो वाक्येन विधानम् । भक्षयतिश्च नञ्विशेषणम् । श्रुतिश्च वाक्याद् बलीयसी । तस्मादभक्षणं कर्तव्यमिति गम्यते ।

अभक्षणं च भक्षणाभावः । न तस्य कर्त्तव्यताऽस्ति । तस्माद् यस्तत्र मानसो व्यापारः, स इह उपदिश्यते । येनोपायेन नञ्विशिष्टं भक्षणं भवति । पूर्वं नञ्भक्षयत्योः सम्बन्धः । ततो विधानम् । यथा, नोद्यन्तमादित्यमीक्षेतेत्येवमादिषु प्रजापतिव्रतेषु कुर्वतः फलम्, अकुर्वतो न फलं न दोषः । एवमिहापि, विभक्तत्वादकर्म्मणाम् । नात्र कर्म प्रतिषिद्ध्यते । अकर्ममात्रमुपदिश्यते । अन्यद्धि कर्म भक्षणं प्रतिषिद्ध्यमानम्, अन्यदकर्म मानसः सङ्कल्प इति ॥ १९ ॥ पूर्व० ॥

**शास्त्राणां त्वर्थवत्त्वेन पुरुषार्थो विधीयते तयोरसमवायित्वात्तादर्थ्ये विध्यतिक्रमः ॥ २० ॥**

उपवर्णनापरिहारस्तावदुच्यते । युक्तं यत् प्रजापतिव्रतेषु शास्त्राणामर्थवत्त्वेन पुरुषार्थौ विधीयते । तत्र नियमः कर्त्तव्यतयोपदिश्यते । यश्च कर्त्तव्यः, स कल्याणोदयः । यो न कर्त्तव्यः स पापोदयः । कथं पुनः प्रजापतिव्रतेषु नियमः कर्त्तव्यतया चोद्यते ? इति । उच्यते । तस्य व्रतमिति प्रकृत्य प्रजापतिव्रतानि समाम्नातानि । व्रतमिति च मानसं कर्मोच्यते । इदं न करिष्यामीति यः सङ्कल्पः । कतमत्तद् व्रतम् । नोद्यन्तमादित्यमीक्षेतेति, यथा तदीक्षणं न भवति, तथा मानसो व्यापारः कर्त्तव्यः । तस्य च पालनम् । तत्र तस्मात् पुरुषार्थोऽस्तीत्यवगन्तव्यम् । तत्र चैतान्येव प्रकृत्य उच्यते । एतावता हैनसाऽयुक्तो भवतीति । एतावता कृतेन अयुक्त एनसा भवतीति ॥ अथेह तयोरसमवायित्वम् । इह क्रिया प्रतिषिद्ध्यते, न अक्रियोपदिश्यते । न हि कलञ्जं भक्षयन् प्रतिषेधविधिं नातिक्रामति । इह पुनरादित्यं पश्यन् नातिक्रामति विधिम् । न हि तस्य दर्शनं प्रतिषिद्धम् । नियमस्तत्रोपादिष्टः । यस्तं नियमं करोति, स फलेन सम्बध्यते । इह तु प्रतिषिद्ध्यते कलञ्जादि ।

कथमवगम्यते । नात्र तस्य, व्रतमिति प्रकृत्य वचनमस्ति । न च न भक्षयितव्यमित्यस्य मानसो व्यापारोऽर्थः । भक्षयितव्यमिति च भक्षणं कर्त्तव्यं शब्देनोच्यते । न इति तत् प्रतिषिद्ध्यते श्रुत्यैव । एवं प्रसिद्धोऽर्थोऽनुगृहीतो भवति । इतरथा लक्षणा स्यात् । श्रुतिलक्षणाविषये च श्रुतिर्ज्यायसी न लक्षणा । तस्मादिह प्रतिषेधः ॥ उच्यते । अस्तु प्रतिषिद्धं नाम दोषः । अत्र न श्रूयते । तस्मात् प्रतिषिद्धमप्यनुष्ठातव्यमिति । कल्पयिष्यते इति चेन्न प्रमाणाभावात् । अर्थापत्तिः प्रमाणम् । उपदेशवैयर्थ्यप्रसङ्गादिति यद्युच्येत । नैतदेवम् । व्यर्थोऽपि हि उपदेशोऽज्ञानात् सम्भवति । तस्मान्न कल्प्यो दोष इति । उच्यते । सत्यं न कल्पनीयः । किन्तु क्लृप्त एव । कथम् । अनन्तरमेवैनं शिष्टा वर्जयेयुः, पतितः कर्मफलेभ्य इति वदन्तः । महाँश्चैष दोषो, यच्छिष्टा वर्जयन्ति । तस्मान्नियोगतः कलञ्जादि न भक्षयितव्यमिति । यथा, न सर्पायाङ्गुलिं दद्यात्, तत्र दोषदर्शनान्नियोगतो न सर्पायाङ्गुलिर्दीयते, कण्टको वा न पादेनाधिष्ठीयते । एवमिदमपीति ॥ २० ॥ सिद्धान्तः ॥ प्रतिषिद्धकर्मणामनुष्ठानेऽनिष्टापाताऽधिकरणम् ॥ ५ ॥ कलञ्जन्यायः ॥

## तस्मिँस्तु शिष्यमाणानि जननेन प्रवर्त्तेरन् ॥२१॥

इह स्मार्त्ताः पदार्था उदाहरणम् । प्रत्युपस्थितनियमाश्चाचाराः । गुरुरनुगन्तव्योऽभिवादयितव्यश्च । वृद्धवयाः प्रत्युत्थेयः सम्मन्तव्यश्चेति । तत्र सन्देहः । किं जातमात्राणामिमे पदार्था उतोपनीतानामिति । किं प्राप्तम् । अविशेषोपदेशाज्जातमात्राणाम् । कुतः ? पुरुषे ते शिष्यन्ते, जातमात्रश्च पुरुषो भवति । तस्माज्जातमात्राणामिमे पदार्था इति ॥ २१ ॥ पूर्व० ॥

एवं प्राप्ते ब्रूमः—

## अपि वा वेदतुल्यत्वादुपायेन प्रवर्त्तेरन् ॥ २२ ॥

अपि वेति पक्षव्यावृत्तिः । उपायेन प्रवर्त्तेरन् । उपनयनेन सह प्रवर्त्तेरन् । वेदतुल्यत्वात् । वेदतुल्या हि स्मृतिः । वैदिका एव पदार्थाः स्मर्यन्ते इत्युक्तम् । वैदिकाश्च पदार्था उपनयनोत्तरकाले समाम्नाताः । स्मार्त्ताश्चैते वैदिका एव । तस्मादुपनयनोत्तरकाला एते इति ॥ २२ ॥ सिद्धान्तः ॥ गुर्वनुगमनादीनामुपनयनोत्तरकालकर्तव्यताधिकरणम् ॥ ६ ॥

## अभ्यासोऽकर्मशेषत्वात् पुरुषार्थो विधीयते ॥ २३ ॥

इदमामनन्ति, यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति पुरुषार्थोऽयं यागो विधीयते । नायमभ्यासः कर्मशेष इत्युक्तम् । इहेदानीं सन्दिह्यते । किं सातत्येन होतव्यम्, उत न सातत्येनेति । किं प्राप्तम् । पुरुषं प्रत्युपदिष्टत्वात् सातत्येन । अयं पुरुष इति सातत्येनानुष्ठातव्यम् । ननु प्रदोषमग्निहोत्रं होतव्यं, व्युष्टायां प्रातरिति श्रूयते । पौर्णमास्यां पौर्णमासेन यजेत, अमावास्यायामामावास्येन यजेतेति । नैष सर्वाङ्गोपसंहारेण प्रयोगः । अतः कालमात्रेण हीने दोषः ॥ २३ ॥

## तस्मिन्नसम्भवन्नर्थात् ॥ २४ ॥

नैतदस्ति, यत्, जुहुधि जुहुधीत्येव होतव्यमिति । यथा शक्नोति, तथा जुहुयादित्युच्यते । न च सातत्येन शक्यते । अवश्यमनेन आहारविहाराः कर्त्तव्याः । तस्मादर्थाविरुद्धेषु कालेषु होतव्यमिति ॥२४॥ पूर्व०

## न कालेभ्य उपदिश्यन्ते ॥ २५ ॥

न चैतदस्ति । यदुक्तम्, अर्थाविरुद्धेषु कालेषु सततं होतव्यमिति । काल एषः श्रूयते । प्रदोषमग्निहोत्रं होतव्यं, व्युष्टायां प्रातरिति । तथा, पौर्णमास्यां पौर्णमासेन यजेत, अमावास्यायामामावास्येन यजेतेति । तस्मान्न सातत्यमिति । आह । ननु विगुणस्यापि प्रयोगान्न काल आदरणीय इति । अत्रोच्यते । न कालो गुणः । निमित्तं ह्येतदित्युक्तम् । तस्मादन्येषु कालेष्वविहितत्वात् कृतमप्यकृतं स्यात् । तस्मादाश्रितकालस्य यावज्जीवं प्रयोग इति ॥ २५ ॥ सि० ॥

## दर्शनात् काललिङ्गानां कालविधानम् ॥ २६ ॥

लिङ्गं च भवति, अप वा एष स्वर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन् पूर्णमासीममावस्यां वा अतिपातयेदिति । यदि सर्वस्मिन् काले होमस्तदा कस्यातिपत्तिः स्यात् । तस्मादपि न सततमभ्यासः ॥ २६ ॥ युक्तिः ॥ अग्निहोत्रादियावज्जीवकर्मणां स्वकालसात्रकर्तव्यताधिकरणम् ॥ ७ ॥ अग्निहोत्रन्यायः ॥

## तेषामौत्पत्तिकत्वादागमेन प्रवर्त्तेत ॥ २७ ॥

प्रदोषे अग्निहोत्रं होतव्यम्, व्युष्टायां प्रातरिति । तथा पौर्णमास्यां पौर्णमासेन यजेतामावास्यायामामावास्येन यजतेति । तत्र सन्देहः । किं सकृत् प्रदोषे होतव्यम्, उत प्रदोषे प्रदोषे इति । तथा सकृद् व्युष्टायां प्रातः ? उत व्युष्टायां व्युष्टायामिति । तथा किं सकृत् पौर्णमास्याममावास्यायां वा, उत आगते आगते काले इति । किं प्राप्तम् । सकृत् कृत्वा कृतार्थः शब्दो, न नियमः पौनःपुन्ये ॥ इत्येवं प्राप्ते ब्रूमः । आगमेन प्रवर्त्तेत । आगते आगते काले प्रयोगः कर्त्तव्य इति । कुतः । तेषामौत्पत्तिकत्वात् । उत्पद्यमानं कर्म कालसंयुक्तमेवोत्पद्यते । तदुक्तं, निमित्तार्थाः कालश्रुतय इति । निमित्ते च संप्राप्ते नैमित्तिकोऽर्थः कर्त्तव्यो भवति । तस्माद् आगते आगते काले प्रयोगः कर्त्तव्यः ॥ २७ ॥ सि० ॥

## तथा हि लिङ्गदर्शनम् ॥ २८ ॥

अप वा एष स्वर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन् पौर्णमासीममावास्यां वा अतिपातयेदिति । आगते आगते काले प्रयोगं दर्शयति ॥ २८ ॥ युक्तिः ॥ अग्निहोत्रादीनां स्वकालावृत्त्या आवृत्त्यधिकरणम् ॥ ८ ॥

## तथाऽन्तःक्रतुप्रयुक्तानि ॥ २९ ॥

भिन्ने जुहोति स्कन्ने जुहोति इति दर्शपूर्णमासयोः श्रूयते । तत्र सन्देहः । सकृद् भिन्ने स्कन्ने च हुत्वा कृतार्थः, उत भिन्ने भिन्ने स्कन्ने स्कन्ने चेति । तत्राऽधिकरणातिदेशः । यः पूर्वत्र पूर्वः पक्षः स इह पूर्वः, य उत्तरः स इहोत्तर इति । सकृत् कृत्वा कृतार्थ इति पूर्वः पक्षः । निमित्तत्वात् पुनः प्रयोग इत्युत्तरः ॥ २९ ॥ दर्शादौ भेदाद्यावृत्त्या होमावृत्त्यधिकरणम् ॥ ९ ॥

## आचाराद् गृह्यमाणेषु तथा स्यात् पुरुषार्थत्वात्॥३०॥

गुरुरनुगन्तव्योऽभिवादयितव्यश्च, वृद्धवयाः प्रत्युत्थेयः सम्मन्तव्यश्चेति । तत्र सन्देहः । किमागते आगते गुरौ वृद्धवयसि च यदुक्तं तत् कर्त्तव्यम्, उत सकृत्कृते कृतार्थतेति । आचाराद् गृह्यमाणेषु तथा स्यात् पुरुषार्थत्वादित्यधिकरणातिदेशः । तत्र यः पूर्वः पक्षः स इह पूर्वः, य उत्तरः स उत्तरः । सकृत्कृत्वा कृतार्थ इति पूर्वः पक्षः । निमित्तत्वात् पुनः प्रयोग इत्युत्तरः ॥ ३० ॥ गुर्वनुगमनादीनां प्रतिनिमित्तमावृत्त्यधिकरणम् ॥ १० ॥

## ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात्॥३१॥

इदं श्रूयते । सोमेन यजेत, गर्भाष्टमेषु ब्राह्मणमुपनयीत, प्रजामुत्पादयेदिति । तत्र सन्देहः । किं नित्यान्येतानि, उतानित्यानीति । किं प्राप्तम् । कामसंयोगादनित्यानि ॥ इति प्राप्ते उच्यते । ब्राह्मणादीनां सोमादीनि नित्यानीति । कुतः । ऋणवाक्येन हि संयोगो भवति । जायमानो ह वै ब्राह्मणस्त्रिभिर्ऋणवान् जायते, यज्ञेन देवेभ्यः, ब्रह्मचर्येण ऋषिभ्यः, प्रजया पितृभ्य इति । स वै तर्ह्यनृणो यदा यज्वा ब्रह्मचारी प्रजावानिति । ऋणसंस्तवोऽवश्यकर्त्तव्यानां भवति । तस्मान्नित्यानीति ॥ ननु लिङ्गमसाधकं, न्याय उच्यतां, यस्यैतद् द्योतकमिति । उच्यते । अकामसंयुक्तानि एषां पृथग् वाक्यानि भवन्ति । वसन्ते वसन्ते ज्योतिषा यजेत, यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवं दर्शपूर्णमासाभ्यां यजेत । तथा विद्यामधीयीत । तथा प्रजा उत्पादयितव्या इति । एवं नित्यतायां प्राप्तायां इदं लिङ्गं भवतीति ॥ अथवा अयमन्योऽर्थः । ब्राह्मणस्य तु सोमविद्याप्रजमृणवाक्येन संयोगात् । सोमादयो नियताः किं ब्राह्मणस्यैव, राजन्यवैश्य-

योरनियताः, उत सर्वेषां नियता इति । किं प्राप्तम् । ब्राह्मणस्यैव नियता नेतरयोरिति । कुतः । एवं श्रूयते । जायमानो ह वै ब्राह्मण इति । ब्राह्मणस्य नियमो दृश्यते, नेतरयोः । ब्राह्मणसङ्कीर्त्तनात् । एवं प्राप्ते ब्रूमः । सर्वेषां नियमः । कुतः । अविशेषेण नियमविधानं यत्, तदऽकामसंयुक्तं वचनं नियामकम् । तद् अविशिष्टं सर्वेषाम् । तस्मात् सर्वेषां नियम इति ॥ ननु, जायमानो ह वै ब्राह्मण इति ब्राह्मणस्य सङ्कीर्त्तनम् । उच्यते । भवत्यस्मिन् वचने ब्राह्मणसङ्कीर्त्तनं, न त्वेतन्नियमस्य विधायकम् । एतैरकामसंयुक्तैर्वचनैर्विहितस्य नियमस्यानुवादोऽयमवदानस्तुत्यर्थः । तस्मान्नात्र ब्राह्मणसङ्कीर्त्तनेन राजन्यस्य वैश्यस्य वाऽनियमो विज्ञायते । ब्राह्मणग्रहणं तु प्रदर्शनार्थम् । जायमानो ब्राह्मणो राजन्यो वैश्यो वेति । तथा जायमानो जातश्चेति ॥ ॥ ३१ ॥ ऋणत्रयापाकरणस्य ब्राह्मणक्षत्रियवैश्यानां नित्यताधिकरणम् ॥ ११ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्य द्वितीयः पादः ॥ ६ ॥ २ ॥

अथ षष्ठे अध्याये तृतीयः पादः ॥ ६ ॥ ३ ॥

## सर्वशक्तौ प्रवृत्तिः स्यात् तथाभूतोपदेशात् ॥ १ ॥

बह्वृचब्राह्मणे श्रूयते । यावज्जीवमग्निहोत्रं जुहोति, यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति । नित्यमग्निहोत्रं नित्यौ च दर्शपूर्णमासौ। तत्र यदेतत् कामश्रवणादन्यदकामश्रवणं द्वितीयं, तत्र सन्देहः ॥ किं यः कात्स्न्येन विधिमुपसंहर्त्तुं शक्नोति तस्यैवाऽधिकारः ? उत विगुणमपि तत् प्रयोक्तव्यमिति । एकादशे कामसंयुक्ते प्रथमे श्रवणे चिन्तयिष्यते साङ्गे । इह नित्ये श्रवणे द्वितीये इति ॥ किं प्राप्तम् । सर्वशक्तौ प्रवृत्तिः स्यात् । तथाभूतोपदेशात् । कात्स्न्येन विधिमुपसंहर्त्तुं शक्नोति, स एवानुतिष्ठेत् । तथाभूतोपदेशात् । यथाभूतं हि तत् कामसंयुक्तं श्रुतं, तथाभूतमेव नित्यमप्युपदिश्यते । तस्मात् सर्वाङ्गोपहारेण प्रयोगः कर्त्तव्यः । दर्शपूर्णमासशब्दश्च साङ्गस्यैव वाचकः । कथम् । पौर्णमास्याममावास्यायां च साङ्गं विधीयते । यच्च पौर्णमास्यां विहितं, सा च पौर्णमासी । यदमावास्यायां विहितं, सा चामावास्या इति । साङ्गममावास्यायां विहितं, पौर्णमास्यां च । तस्मात् साङ्गं दर्शपूर्णमासशब्देनोच्यते इति जैमिनिर्मन्यतेस्म ॥ १ ॥ पूर्व०

**अपि वाऽप्येकदेशे स्यात् प्रधाने ह्यर्थनिर्वृत्तिर्गुण-मात्रमितरत्तदर्थत्वात् ॥ २ ॥**

अपिवेति पक्षव्यावृत्तिः । अप्येकदेशेऽङ्गानां स्यादेव प्रयोगः । यतः साङ्गस्याप्यनङ्गस्यापि प्रयुज्यमानस्य प्रधानादेवायमर्थो निष्पद्यते । गुणमात्रं सर्वाङ्गप्रयोगेण भवति । को गुणः । साङ्गात् स्वर्गोऽभिनिर्वृत्तिः, प्रधानमात्रादिदमन्यत् फलम् । तस्मात् स्वर्गप्राप्त्यर्थं संपूर्णाङ्गं करिष्यामीत्यारब्धम् । यदि कानिचिद् अङ्गानि न शक्नोति कर्त्तुं, तथाप्यस्मादेकदेशाङ्गगुणयुक्तात् प्रधानात् फलं भविष्यति । तस्मात् प्रधानमात्रस्य प्रयोगमाह, नाङ्गानाम् । दर्शपूर्णसशब्दकोऽग्निहोत्रशब्दकश्च प्रधानपदार्थोऽन्यान्यङ्गानि तदर्थानीति ॥ २ ॥ सि० ॥

**तदकर्मणि च दोषस्तस्मात्ततो विशेषः स्यात् प्रधानेनाभिसम्बन्धात् ॥ ३ ॥**

प्रधानातिक्रमे दोषः श्रूयते, अप वा एष स्वर्गाल्लोकाच्छिद्यते यो दर्शपूर्णमासयाजी सन् पौर्णमासीममावास्यां वाऽतिपातयेदिति प्रधानातिक्रमे दोषं ब्रुवँस्तस्य नित्यतां दर्शयति ॥ ३ ॥ युक्तिः ॥

**कर्मभेदं तु जैमिनिः प्रयोगवचनैकत्वात् सर्वेषामुपदेशः स्यादिति ॥ ४ ॥**

यदुक्तं, नास्ति भेदः । इमान्यङ्गानि, इमानि प्रधानानीति । प्रयोगवचनैकत्वादिति जैमिनिराह स्म । सर्वेषामुपदेशकः । पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाममावास्यया यजेतेति ॥ ४ ॥ आ० ॥

**अर्थस्य व्यपवर्गित्वादेकस्यापि प्रयोगे स्याद् यथा क्रत्वन्तरेषु ॥ ५ ॥**

एकाङ्गप्रयोगेऽपि स्याद् विगुणादपि फलमित्यर्थः । कुतः । अर्थस्य व्यपवर्गित्वात् । व्यपवृक्तमङ्गेभ्यः प्रधानम् । अग्निहोत्रसंज्ञकाद्दर्शपूर्णमाससंज्ञकाच्च फलमिह भवति । तद्धि कर्त्तव्यतयोपदिश्यते । यत् पौर्णमास्यामुपदिष्टं सा पौर्णमासी, यदमावास्यायां सा अमावास्या । यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवतीति । तस्मादग्नये पुरोडाशोऽग्नीषोमाभ्यां च, आज्यं चाग्नीषोमादिभ्यः पौर्णमास्याम्, आग्नेयसान्नाय्यादीनाममावास्यायाम् ॥ यदुक्तं,

पौर्णमास्यां पौर्णमास्या यजेत, अमावास्यायाममावास्यया यजेतेति साङ्गस्य विधानात् साङ्गं दर्शपूर्णमासशब्देनाभिधीयते इति । नैतदेवम् । सिद्धे हि दर्शार्थे पौर्णमासार्थे च साङ्गं फले विधीयते । तस्मान्न साङ्गमग्निहोत्रपदवाच्यं दर्शपौर्णमासपदवाच्यञ्च । यच्चाऽग्निहोत्रं तदिह चोद्यते कर्त्तव्यतया, यौ च दर्शपूर्णमासौ । तस्माद् विगुणमपि कर्त्तव्यमेवाग्निहोत्रं दर्शपूर्णमासौ च । यथा क्रत्वन्तरेषु प्रकृतिविकृतिषु परस्य धर्माः परस्य न भवन्ति, एवं न कामसंयुक्तस्य धर्मा नित्यस्य भवितुमर्हन्ति ॥ ५ ॥ आ० नि० ॥

## विध्यपराधे च दर्शनात् समाप्तेः ॥ ६ ॥

विध्यपराधेषु च समाप्तिं दर्शयति । तदेव यादृक् तादृग् होतव्यमिति विगुणस्य समाप्तिं दर्शयति ॥ ६ ॥

## प्रायश्चित्तविधानाच्च ॥ ७ ॥

विध्यपराधे च प्रायश्चित्तानि विधीयन्ते निमित्ते कर्माङ्गभूतानि। यथा, भिन्ने जुहोतीति । विगुणे निष्फले सति कस्याङ्गभूतैः प्रयोजनं स्यात् । तस्माद् विगुणानामपि प्रयोगः कर्त्तव्य इति ॥ ७ ॥ युक्तिः ॥ नित्ये यथाशक्त्यङ्गानुष्ठानाधिकरणम् ॥ १ ॥

## काम्येषु चैवमर्थित्वात् ॥ ८ ॥

ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकामः, सौर्य्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः, वैश्वदेवीं सांग्रहायणीं निर्वपेद् ग्रामकाम इत्येवमादिषु सन्देहः । किं विगुणमपि फलवद्, उताविगुणमेव फलवदिति । किं प्राप्तम् । काम्येषु चैवं स्याद्, विगुणमपि फलवदिति। कुतः । अर्थित्वात् । यदि विगुणमपि फलवदेवमर्थिमात्रमधिकृतं भविष्यति । अन्यथा सामान्यशब्दोऽन्तरेण विशेषं, विशेषेऽवस्थापितो भविष्यति । असमर्थत्वान्नाधिक्रियते इति चेत् । साङ्गं न समर्थः कर्त्तुम् । प्रधानमात्रं तु शक्नोति।प्रधानमात्रेऽधिकरिष्यति॥८॥ पूर्व०॥

## असंयोगात्तु नैवं स्याद् विधेः शब्दप्रमाणत्वात् ॥९॥

तुशब्दात् पक्षो विपरिवर्त्तते । नैवं स्यात् । यदुक्तं विगुणमपि फलवदिति । असंयोगात् प्रधानमात्रस्य फलेन । साङ्गाद्धि फलं श्रूयते प्रधानाद्, न केवलात् । तेन यद्यपि केवलमुच्यते, तथापि नैवआ-ञ्जीयकं तत् कुर्य्यात् । न केवलस्य फलेन संयोग इति। शब्दप्रमाणक-

श्च अयमर्थो विधीयते । शब्दश्च साक्षात् फलमाहेति वक्ष्यामः । तस्माच्च विगुणं कर्म कर्त्तव्यमेवञ्जातीयकमिति ॥ ९ ॥ सि० ॥

## अकर्मणि चाप्रत्यवायात् ॥ १० ॥

न चात्र प्रधानमात्रस्याकर्मणि प्रत्यवाय उच्यते, यथा दर्शपूर्णमासयोः । तस्मादपि न विगुणमेवँल्लक्षणकं कर्म प्रयोक्तव्यमिति ॥ ॥ १० ॥ युक्तिः ॥ अङ्गवैकल्ये काम्यस्य निष्फलत्वाधिकरणम् ॥ २ ॥

## क्रियाणामाश्रितत्वाद् द्रव्यान्तरे विभागः स्यात्॥ ११ ॥

दर्शपूर्णमासयागः पुरोडाशेनोक्तः । स च पुरोडाशो व्रीहिमयः कर्त्तव्य इति श्रूयते । तत्रैतच्चिन्त्यते । यदि नीवारमयेन पुरोडाशेन यागः क्रियेत, किं स एव यागः स्यादुतान्य इति । किं प्राप्तम् ? । द्रव्यान्तरे विभागः स्यात् । अन्यो यागः । कुतः ? । आश्रितत्वात् । आश्रयभेदाद्धि गम्यते विशेषः । अयमन्यो नीवाराश्रयो व्रीह्याश्रयादिति । आश्रयभेदस्तावद् विस्पष्ट एव । तद्भेदाद् रूपमपि भिन्नं गम्यते । तस्मादन्यो यागो द्रव्यान्तरः, इति ॥ ११ ॥ पूर्व० ॥

## अपि वाऽव्यतिरेकाद्रूपशब्दाविभागाच्च गोत्ववदैककर्म्यं स्यान्नामधेयं च सत्त्ववत् ॥ १२ ॥

अपि वेति पक्षव्यावृत्तिः । ऐककर्म्यं स्याद् द्रव्यान्तरेऽपि । यदा क्रिया भवति चलनं पतनं वा, तदापि तावानेव सोऽर्थो, न च कश्चित् तत्र व्यतिरिक्तो विशेषो हीनो वा । खल्वप्यन्यदेव रूपम् । न च शब्दान्तरं वाचकम् ॥ नन्वाश्रयभेदो विस्पष्टः । उच्यते । भिन्नमेव वयमाश्रयं प्रतिजानीमहे, न तु तद्भेदादाश्रितस्य भेदः । अन्यत्वात् । न हि, स्रजि वाससि वा भिन्ने तद्भेदात् पुरुषभेदो गम्यते । सोऽपि तस्यात्मा भिन्न इति चेत् । नैतदेवम् । विशेषमुपलभमानैरेवं शक्यं वक्तुम् । न चास्य विशेष उपलभ्यते ॥ नन्वयमेव विशेषो यद्, एकोऽपि विनष्टः, एकोऽपि वर्त्तते । न विनष्ट इति यदुच्यते । तन्न । प्रागस्योपलम्भनात् सत्त्वे प्रमाणं नास्ति । तस्माद् विनष्टः । न च प्रत्यभिज्ञायते, तद्द्रव्यातिरिक्तः । भेदानुपलम्भात् । कथं तर्हि चलतीति प्रत्यय इति चेत् । उच्यते । देशान्तरे सम्प्रतिपत्तिदर्शनात् । तद् देशान्तरं गच्छदागच्छच्च चलतीत्युच्यते । तत्र गन्तापि प्रत्यक्षो, देशान्तरमपि । तेन गत इति चोच्यते, आगत इति चोच्यते ।

सत्यं विनष्टाद्विनष्टोऽन्यः । योऽपि त्वसावन्यः, सोऽपि यजतिशब्द-वाच्य एव । यजतिसामान्यं न भिद्यते । न च शब्देन नोच्यते । तस्माद् योऽपि नीवारैर्यागं कुर्यात्, तेनापि चोदितमेव कृतम् । चोदितं च कुर्वत ईप्सितं भवति, नापूर्वकृतम् । नामधेयं च दर्शयति, दर्श इति वा पूर्णमास इति वाऽस्यैव सामान्यस्य नामधेयं, न व्यक्तीनाम् । किं प्रयोजनं चिन्तायाः । उत्तरेणाधिकरणेनैतद् विचार्य्यते ॥ १२ ॥ सिद्धान्तः ॥ द्रव्यभेदेऽपि कर्माभेदाधिकरणम् ॥ ३ ॥

## श्रुतिप्रमाणत्वाच्छिष्टाभावे नागमोऽन्यस्याशिष्टत्वात् ॥ १३ ॥

अग्निहोत्रादीनि नित्यानि कर्माण्युदाहरणम् । तेषु श्रुतद्रव्यापचारे भवति सन्देहः । किं प्रतिनिधिमुपादाय प्रयोगः कर्त्तव्यः, उत तदन्तं कर्मोत्स्रष्टव्यमिति । किं प्राप्तम् । शिष्टस्याभावे न आगमोऽन्यस्य । तदन्तमेवोत्स्रष्टव्यम् । कुतः । अशिष्टत्वात् । यद् व्रीहियवगुणकं श्रुतं फलवत्, तद् नीवारगुणकं क्रियमाणमफलकं भवति । तस्मात् तदन्तमेवोत्स्रष्टव्यमिति ॥ १३ ॥ पूर्व० ॥

## क्वचिद्विधानाच्च ॥ १४ ॥

क्वचिद् विधीयते।यदि सोमं न विन्देत् पूतीकानभिषुणुयादिति । यदि च प्रतिनिधिमुपादाय प्रयोगः कर्त्तव्यः स्याद्, न विधीयेत । विधीयते तु । तस्माद् यच्च न विधीयते, न तत्र प्रतिनिधिरिति ॥१४॥ युक्तिः

## आगमो वा चोदनार्थाविशेषात् ॥ १५ ॥

आगमो वा प्रतिनिधेयस्य द्रव्यस्य । कुतः । चोदनार्थाविशेषात् । यजतिचोदनाचोदितो हि अर्थो, न विशिष्यते व्रीहिभिर्नीवारैर्वा क्रियमाणः । यागश्चावश्यकर्त्तव्यो नित्येष्वनित्येषु च प्रारब्धेषु ॥१५॥

## नियमार्थः क्वचिद्विधिः ॥ १६ ॥

अथ यदुक्तं, क्वचिद् विधानादिति । उच्यते । नियमार्थः क्वचिद् विधिः । सोमाभावे बहुषु सदृशेषु प्राप्तेषु नियमः क्रियते । पूतीका एवाभिषोतव्या इति । तस्मात् प्रतिनिधिमुपादाय प्रयोगः कर्त्तव्य इति ॥ १६ ॥ युक्तिः ॥

## तन्नित्यं तच्चिकीर्षा हि ॥ १७ ॥

कथं पुनरिदमवगम्यते, नियमार्थमेव तद्वचनमिति । उच्यते । यतः प्राप्ताः पूतीकाः । कथं च ते प्राप्ताः । तच्चिकीर्षा हि । तत्र सादृश्यचिकीर्षेत्येतद् वक्ष्यामः । तच्चिकीर्षया च प्राप्ताः पूतीकाः । तस्मात्तन्नित्यं, वचनमेतन्नियमाय नित्यमिति गम्यते ॥ १७ ॥ ॥ ॥
आ० नि० ॥ नित्यकर्मणोऽनित्यप्रारब्धकर्मणश्च द्रव्याऽपचारे प्रतिनिधिना समापनाधिकरणम् ॥ ४ ॥

## न देवताग्निशब्दक्रियमन्यार्थसंयोगात् ॥ १८ ॥

देवताः, आग्नेयोऽष्टाकपाल इत्येवमाद्याः। अग्निः, यद् आहवनीये जुह्वति तेन सोऽस्याभीष्टः प्रीतो भवतीति। शब्दो मन्त्रः, बर्हिर्देवसदनं दामीत्येवमादिः । क्रियाः, समिधो यजति, तनूनपातं यजतीत्येवमाद्याः । तत्र सन्देहः । देवताग्निशब्दक्रियाणामपचारे प्रतिनिधिरुपादेयः, उत नेति । किं प्राप्तम् । पूर्वाधिकरणन्यायेन प्रतिनिधायाऽन्यत् प्रयोगः कर्त्तव्य इति॥एवं प्राप्ते ब्रूमः।न देवताग्निशब्दक्रियाणामपचारे प्रतिनिधिना भवितव्यमिति । कुतः । अन्यार्थसंयोगात् । प्रतिनिधीयमानमन्यदेतेभ्यः । अन्यच्च तेषामर्थं न शक्नुयात् कर्तुम् । कश्च तेषामर्थः। देवता तावदुद्देशेन अर्थं साधयति । अग्निमुद्दिश्याऽष्टाकपालः पौर्णमास्याममावास्यायां च त्यज्यते । यच्चान्येषु हविःषु विहितं, न ततो दर्शपूर्णमासौ भवतः । तत्रान्या उद्दिश्यमाना न श्रुताया उद्देश्याया अर्थं कुर्यात् । न हि अन्यस्यामुद्दिश्यमानायां दर्शपूर्णमासौ भवतः । तस्मान्न देवता प्रतिनिधीयते ॥

तथा, यद् आहवनीये जुह्वतीत्याहवनीयापचारे नान्योऽग्निः प्रतिनिधातव्योऽन्यद् वा द्रव्यमिति । कुतः । अन्यार्थसंयोगात् । प्रतिनिधीयमानमाहवनीयकार्ये न वर्त्तते । कथम् । अदृष्टमाहवनीयस्य कार्यम्। आहवनीयस्योपरि त्यज्यमाने यद् भवति, न तदन्यस्योपरि। न हि, यजतिशब्देन सामर्थ्यात् तद् गृह्यते, यस्योपरि त्यज्यते । न हि उपरि त्यज्यमानस्य देशः किञ्चिदुपकरोतीति । तस्मान्नाग्नेः प्रतिनिधिः ॥

तथा मन्त्रापचारे नान्यो मन्त्रः प्रतिनिधीयते । मन्त्रस्य हि एतत् प्रयोजनं, यत् स्मारयति क्रियां साधनं वा असति स्मरणे न क्रिया संवर्त्तेत । तद् अपचरिते मन्त्रे यदि तस्यार्थेऽन्यं शब्दमुच्चारयति

पूर्वं प्रतीतेऽर्थे शब्दमुच्चारयन्न शब्देनार्थं प्रतीयात् । अथ प्रतीतमपि पुनः प्रतिनिधिशब्दोच्चारणेन प्रतीयाच्छब्दात् प्रतीतिं कुर्यात् । एवञ्च प्रतिनिधिशब्दोच्चारणानुरोधोऽनर्थकः स्यात् । न हि शब्देन प्रत्यापयितव्यमिति किञ्चित् प्रमाणमस्ति । यदस्ति, तद् विशेषेणैवाऽनेन शब्देन बर्हिरादिनेत्येवम् । तदभावे शब्दान्तरानुरोधोऽनर्थकः स्यात् । तस्मान्न शब्दस्य प्रतिनिधिः ॥ क्रियापचारे न क्रियान्तरम् । अन्यार्थसंयोगात् । समिद्‌यजिमन्तौ दर्शपूर्णमासौ कर्त्तव्यौ । तौ अन्यस्यां क्रियमाणायां न तद्वन्तौ भवतः । तस्मात् क्रियायां न प्रतिनिधिरिति ॥ १८ ॥ सि० ॥

## देवतायां च तदर्थत्वात् ॥ १९ ॥

देवतायामपरो विशेषो येन न प्रतिनिधीयते । देवता नाम यदर्थं किञ्चिच्चोद्यते सा । अन्या तस्याः स्थाने प्रतिनिधीयमाना न देवता स्यात् । चोदिता हि देवता भवति, नाचोदिता । सम्बन्धिशब्दश्चैषः । या यदर्थं चोद्यते, सा तस्यैव देवता, नाऽन्यस्य । देवता इति सम्बन्धिशब्दो, न जातिशब्दः । तस्मादपि न देवतायाः प्रतिनिधिरिति ॥ १९ ॥ युक्तिः ॥ देवतामन्त्रक्रियाणामपचारे प्रतिनिध्यभावाऽधिकरणम् ॥ ५ ॥

## प्रतिषिद्धं चाविशेषेण हि तच्छ्रुतिः ॥ २० ॥

अथ यत् प्रतिषिद्धम्, अयज्ञिया वै वरकाः कोद्रवाः, अयज्ञिया वै माषा इति । किं तच्छ्रुतद्रव्यापचारे प्रतिनिधातव्यम्, उत नेति । किं प्राप्तम् । प्रतिनिधेयमिति । आगमो वा चोदनार्थाविशेषादिति । एवं प्राप्ते ब्रूमः । प्रतिषिद्धं च न प्रतिनिधातव्यमिति । अविशेषेण हि एतदुच्यते, न यज्ञार्हा माषा वरकाः कोद्रवाश्चेति । यज्ञसम्बन्ध एषां प्रतिषिद्ध्यते । नैते यज्ञाङ्गभावं नेतव्या इति । प्रतिनिधीयमानाश्चाऽङ्गभावं नीताः स्युः । तस्मान्नैते प्रतिनिधातव्या इति ॥२०॥ प्रतिषिद्धद्रव्यस्य प्रतिनिधित्वाभावाधिकरणम् ॥ ६ ॥

## तथा स्वामिनः फलसमवायात् फलस्य कर्मयोगित्वात् ॥ २१ ॥

अग्निहोत्रादीनि कर्माण्युदाहरणम् । तेषु स्वामिन्यपचरति सन्देहः । किमन्यः प्रतिनिधातव्यो, न ? इति । किं प्राप्तम् । प्रतिनिधात-

ऽर्थ इति । कुतः । आगमो वा चोदनार्थाविशेषादिति । एवं प्राप्ते ब्रूमः । तथा स्वामिनः स्यात् । कोऽर्थः । न प्रतिनिधिः । कुतः । फलसमवायात् । योऽर्थी स्वत्यागेन ऋत्विजः परिक्रीणीते, यश्च स्वं प्रदेयं त्यजति स स्वामी । यदि स प्रतिनिधीयते, स्वामिना यत् कर्त्तव्यं तत् सर्वं कुर्यात् । तत् सर्वं कुर्वन् स्वाम्येव स्याद्, न प्रतिनिधिः । स एव हि फलेन सम्बद्ध्यते । य उत्सर्गं करोति, स फलवान् भवति । तदुक्तं, शास्त्रफलं प्रयोक्तरीति । तस्मान्न स्वामिनः प्रतिनिधिरिति ॥ २१ ॥ स्वामिनः प्रतिनिध्यभावाधिकरणम् ॥ ७ ॥

## बहूनां तु प्रवृत्तेऽन्यमागमयेदवैगुण्यात् ॥ २२ ॥

सत्राण्युदाहरणम् । सप्तदशावराः सत्रमासीरन्निति । तेषु कस्मिँश्चित् स्वामिनि अपचरति सन्देहः । किं तत्रान्यः प्रतिनिधातव्यः, उत नेति । किं प्राप्तम् । न स्वामिनः प्रतिनिधिरिति । एवं प्राप्ते ब्रूमः । बहूनां यजमानानां प्रवृत्ते कर्मणि, अपचरिते कस्मिंश्चित् स्वामिनि अन्यमागमयेत् । कुतः । एवमवैगुण्यं भवतीति । स्वामिगता सप्तदशादिसङ्ख्या तत्राङ्गम् । तया विना कर्म विगुणम् । तत्सम्पादनायान्य आगमयितव्यः ॥ ननु स्वामिगता सङ्ख्या, न त्वागम्यमानः स्वामीति वक्ष्यामः । तेन अशक्यैव सा सङ्ख्या उपादातुमिति । उच्यते । स्वामिगता न हि भविष्यति । न हि सा शक्या कर्त्तुमिति । इदं तु शक्यं कर्त्तुम । ये स्वामिनां पदार्थाः, ते इह सप्तदशावरैः कर्त्तव्या इत्येतदुपपादितं भविष्यति । तस्मात् प्रतिनिधातव्यं तत्रेति ॥ २२ ॥ सत्रे कस्यचित् स्वामिनोऽपचारे प्रतिनिध्यादानाधिकरणम् ॥ ८ ॥ सत्रन्यायः ॥

## स स्वामी स्यात् तत्संयोगात् ॥ २३ ॥

तस्मिन् आगम्यमाने इदानीं सन्देहः । किमसौ स्वामी, उत कर्मकर इति । किं प्राप्तम् । स स्वामी स्यात् । कस्मात् । तत्संयोगात् । तेन स्वामित्वेन संयोगः । यो हि असौ आनीयते, स स्वामी क्रियते । स्वामिनि अपचरितेऽन्यो यदि स्वामी क्रियते, ततः स प्रतिनिधिः कृतो भवति । तस्मात् स्वामीति ॥ २३ ॥ पूर्व० ॥

## कर्मकरो वा भृतत्वात् ॥ २४ ॥

कर्मकरो वा स स्यात् । कुतः । भृतत्वात् । भृतो हि असौ तैः

शिष्टैः स्वामिभिः प्रयुक्तः । परिक्रीयमाणो न स्वामी भवति । यः फलं प्राप्नोति, स स्वामी । यः परस्योपकारे वर्त्तते, स कर्मकरः । नैवासौ फलं प्राप्नोति । कुतः । यो हि आरभ्य परिसमापयति, स फलवान् । एष हि आख्यातार्थः । स हि उपक्रमप्रभृति अपवर्गपर्य्यन्तमाह । ननु तेऽपि तत्र विगुणं कुर्वन्ति । सप्तदशानां स्वामिनामभावात् । तस्मात्तेऽपि न स्वामिनः । नो चेत् स्वामिनः, न फलं प्राप्नुवन्ति । उच्यते । न सप्तदशावराः फलसमवाये भवेयुरिति श्रूयते। न सङ्ख्या फलपरिग्रहे गुणभूता । किन्तर्हि । पदार्थेषु । सप्तदशावरैर्याजमानाः पदार्थाः कर्त्तव्या इति । ते च प्रतिनिहितेन क्रियन्ते। अफलत्वेऽपि च सत्यं सङ्कल्पं कर्त्तुमन्यमानयन्ति । आनीयमानस्य च न तेन प्रयोजनम् ॥ २४ ॥ सि० ॥

## तस्मिँश्च फलदर्शनात् ॥ २५ ॥

तस्मिंश्च दिष्टां गतिं गते फलं दर्शयति, यो दीक्षितानां प्रमीयेत अपि तस्य फलमिति । तस्मात् कर्मकर इति ॥ २५ ॥ युक्तिः ॥ सत्रे प्रतिनिहितस्यास्वामित्वाधिकरणम् ॥ ९ ॥

## स तद्धर्मा स्यात् कर्मसंयोगात् ॥ २६ ॥

बहूनां कस्मिँश्चिदपचरिते प्रतिनिधेयोऽन्य इत्येतत् समधिगतम् । इदमिदानीं तत्र सन्दिग्धम् । किमसौ स्वामिधर्मा स्यात्, उत ऋत्विग्धर्मा । किं प्राप्तम् । ऋत्विग्धर्मा । कुतः । परार्थं हि स यजति । यश्च परार्थं यजति, स ऋत्विगिति । एवं प्राप्ते ब्रूमः । स तद्धर्मा स्यात् । स्वामिधर्मा । तस्य हि कार्यं श्रूयते । यश्च यस्य कार्यमधितिष्ठति स तद्धर्मैः सम्बद्ध्यते। यथा स्रुग्धर्मैः स्वधितिरिति ॥ २६ ॥ सत्रे प्रतिनिहितस्य यजमानधर्मग्राहित्वाधिकरणम् ॥ १० ॥

## सामान्यं तच्चिकीर्षा हि ॥ २७ ॥

श्रुते द्रव्ये अपचरति प्रतिनिधिमुपादाय प्रयोक्तव्यमिति स्थितम् । तत्र सन्देहः । किं यत्किञ्चिद् द्रव्यमुपादाय प्रयोगः कर्त्तव्यः, उत सदृशमिति । किं प्राप्तम् । यत्किञ्चिदुपादायेति । एवं प्राप्ते ब्रूमः। सामान्यं यत्र गृह्यते, तदुपादातव्यं सदृशमिति । कुतः ? । सर्वे हि आकृतिवचनाः शब्दाः । आकृतिश्च यद्यप्यङ्गभावेन श्रूयते, तथापि न साक्षात् तस्याः क्रियां प्रत्यङ्गभावः । यत्तु क्रियासाधनं द्रव्यमर्थात्

दङ्गभूतं प्राप्तं तत् परिच्छिन्दती क्रियायामङ्गभावंयाति.व्यक्तेश्च आकृत्या विशेषाः परिच्छिद्यन्ते। ते विशेषा अङ्गभूताः। अथ तस्यामाकृतावपचरितायामर्थप्राप्तं द्रव्यं ग्रहीतव्यमेव। यस्मिँश्च सदृशे गृह्यमाणे तेषां विशेषाणां केचित् संगृहीता भवन्ति, स तत्र लाभो लक्ष्यते इति तत्सदृशं द्रव्यमुपादातव्यं भवति। तस्माद् व्रीहीणामपचारे नीवाराः प्रतिनिधेया इति॥२७॥ श्रुतद्रव्यापचारे तत्सदृशस्यैव प्रतिनिधित्वाधिकरणम्॥ ११॥

## निर्देशात्तु विकल्पे यत् प्रवृत्तम्॥ २८॥

अस्ति ज्योतिष्टोमे पशुरग्निषोमीयः, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति। तत्र श्रूयते। खादिरे पशुं बध्नाति पालाशे बध्नाति रौहितके बध्नातीति। तत्र कदाचित् खदिरगुणके प्रयोगे आरब्धे खदिरो विनष्टः। तत्र सन्देहः। किं वैकल्पिकस्योपादानमुत खदिरसदृशस्येति। किं प्राप्तम्। वैकल्पिकस्येति। कुतः। स हि श्रुतः। खदिरसदृशो न श्रूयते। तस्माद् वैकल्पिकस्योपादानमिति॥ एवं प्राप्ते ब्रूमः। विकल्पे यत् प्रवृत्त, तत्सदृशमुपादेयम्। यत् प्रवृत्तं यस्मिन् प्रयोगे, तन्निर्दिष्टम्। तदङ्गभूतं, वैकल्पिकमनङ्गम्। आश्रितखदिरे प्रयोगे पलाशरौहितकावनङ्गभूतौ। तौ न शक्येते यदा खदिरस्तदैव कर्त्तुम्। अशक्यं चाश्रुतम्। तस्मादाश्रितखदिरे प्रयोगे इतरौ नोपादेयौ। अनङ्गभूतत्वात्, खदिरस्य सदृशमन्वेषतव्यमिति॥२८॥ सि०

## अशब्दमिति चेत्॥ २९॥

इति चेत् पश्यसि, खदिरसदृशमुपादेयमिति। अशब्दमेव कृतं भवति। तस्माच्छब्दवत्त्वाद् वैकल्पिकमुपादेयम्॥ २९॥ आ०॥

## नानङ्गत्वात्॥ ३०॥

नैतदेवम्। अनङ्गं तस्मिन् प्रयोगे वैकल्पिकम्। आश्रितखदिरो हि स प्रयोगो, यो निर्दिष्टः। तस्य निर्देशादितरावश्रुतौ। ननु निर्देशाभावेऽङ्गभावविरोधः। तेन श्रुताविति। किमतः। यद्येवं, यदोपात्तस्याभावस्तदा श्रवणम्। नैतदेवम्। नैमित्तिकं हि तथा प्रतिज्ञायेत। सति वचने निमित्ते, असति खदिरे इतरौ श्रुताविति। तत्र को दोषः। स एवापेक्षितोऽनपेक्षितश्चेति विरोधो भवेत्। संस्काराश्च खदिरे कर्त्तव्याः। खदिरसदृशे तद्बुद्ध्या गृह्यमाणे श्रुतबुद्ध्या कृता

भवन्ति । वैकल्पिकेन तु श्रुतेन असम्बद्धाः । तस्मादुपात्तसदृशो ग्राह्य इति ॥३०॥ आ० नि० ॥ द्रव्यापचारे वैकल्पिकद्रव्यान्तरानुपादानाधिकरणम् ॥ १२ ॥

## वचनाच्चान्याय्यमभावे तत्सामान्येन प्रतिनिधिरभावादितरस्य ॥ ३१ ॥

इदमामनन्ति, यदि न सोमं विन्देत् पूतीकानभिषुणुयादिति। तत्र सन्देहः । किमयमभावे निमित्ते विधिरुत प्रतिनिधिनियम इति। किं प्राप्तम् । अभावे विधिरिति । कुतः । विधानात् । न हि प्रतिनिधिर्विधीयते । साध्यसिद्धये साधनं स्वयमेवोपादीयते । इदं तु विधीयते । तत् कल्पान्तरपक्षे अर्थवद् भवति । तस्मान्न प्रतिनिधिरित्येवं प्राप्ते ब्रूमः । प्रतिनिधिः स्यात् । कुतः । विनष्टे हि साधने साध्यसिद्ध्यर्थं साधनान्तरमुपादीयते । श्रुतस्याभावात् । नन्वन्याय्याः पूतीकाः । अन्यद्धि सदृशान्तरमस्तीति । तदुच्यते । वचनात् । सदृशे प्राप्ते, बहुषु वा असदृशेषु पूतीका अल्पसदृशा नियम्यन्ते । कथम् । तद्धि प्रक्रान्तं कर्म अवश्यं कर्त्तव्यम् । तस्यामवस्थायामन्तरेणैव वचनं प्रतिनिधेयं द्रव्यान्तरं प्राप्तमेव । प्राप्ते वचनं न विधिरिति गम्यते । प्राप्तस्यानुवादो भवितुमर्हति । किमर्थमनुवाद इति चेत् । उच्यते । अल्पसादृश्यमप्राप्तम् । तद्विधानार्थमनुवादः । प्रयोजनं पक्षोक्तम् । प्रतिनिधिपक्षे सोमसदृशस्योपादानं पूतीकविनाशे द्रव्यान्तरविधौ पूतीकसदृशमुपादेयम् ॥ ३१ ॥ पूतीकस्य सोमप्रतिनिधित्वाधिकरणम् ॥ १३ ॥

## न प्रतिनिधौ समत्वात् ॥ ३२ ॥

इदं विचार्य्यते । श्रुते द्रव्ये उपात्ते अपचरिते प्रतिनिधिमुपादाय प्रयोगः प्राप्तः । यदा सोऽपि विनष्टः प्रतिनिहितस्तदा किं प्रतिनिधिसदृशमुपादेयम्, उत उपात्तस्य विनष्टस्येति । किं प्राप्तम् । प्रतिनिहिते विनष्टे तत्सदृशमुपादेयं पूर्वेण न्यायेन । एवं प्राप्ते ब्रूमः । प्रतिनिधौ न स्यात् प्रतिनिधिरिति । कुतः । समत्वात्, यथैवासौ पूर्वः प्रतिनिहितः श्रुतचिकीर्षया, न प्रतिनिधिचिकीर्षया । एवमयमपि श्रुतचिकीर्षया, न प्रति निधिचिकीर्षया । तस्मान्न प्रतिनिधिसदृशमुपादेयम् । उपात्तनष्टस्यैव सदृशोऽन्वेषितव्य इति ॥३२॥ प्रतिनिध्यपचारे

उपात्तद्रव्यसदृशस्य पुनः प्रतिनिधित्वाधिकरणम् ॥ १४ ॥

## स्याच्छ्रुतिलक्षणे नियतत्वात् ॥ ३३ ॥

अथ श्रुतिलक्षणे कथम् । यथा, यदि सोमं न विन्देत् पूतीकानभिषुणुयादिति । पूतीकेषु विनष्टेषु पूतीकसदृशमुपादेयमुत सोमसदृशमिति । किं प्राप्तम् । स्याच्छ्रुतिलक्षणे प्रतिनिधौ प्रतिनिधिसदृशस्योपादानं कर्त्तव्यम् । सोमाभावे पूतीकव्यक्तयो विहिताः । स चायं श्रुतः सोमाभावः । तस्मात् पूतीकव्यक्तय उपादेया इति ॥ ॥ ३३ ॥ पूर्व० ॥

## न तदीप्सा हि ॥ ३४ ॥

नैतदेवम् । न हि पूतीकव्यक्तीनामीप्सा । पूतीकेषु यत् सोमसादृश्यं, तन्नियम्यते । तथा हि पूतीकविधानं दृष्टार्थम् । असदृशविधाने अदृष्टं कल्प्येत । अतो यस्मिँस्तदपूतीकसदृशेऽपि द्रव्ये भवति तद् ग्रहीतव्यं, न पूतीकसादृश्यमाद्रियेतेति ॥ ३४ ॥ सिद्धान्तः श्रुतस्यापि प्रतिनिधेरपचारे उपात्तसदृशस्य पुनः प्रतिनिधित्वाऽधिकरणम् ॥ १५ ॥

## मुख्याधिगमे मुख्यमागमो हि तदभावात् ॥ ३५ ॥

अथ यत्र विनष्टे श्रुते प्रतिनिधिमुपादातुं प्रस्थितो मुख्यमेवोपलभते, तत्र किं प्रतिनिधिमेवोपाददीत, उत तमेव मुख्यमिति । किं तावत् प्राप्तम् । प्रतिनिधिरुपादातव्य इति । एवं सङ्कल्पितवानसौ प्रतिनिधिमुपाददान एव सत्यसङ्कल्पो भवति । तस्मात् प्रतिनिधातव्यमिति । एवं प्राप्ते ब्रूमः । मुख्याधिगमे तमेवोपाददीत । अभावे हि श्रुतस्यानुकल्पः प्रतिनिधिः । श्रुते हि सकला व्यक्तयः । प्रतिनिधौ विकलाः । अथ यदुक्तं, सङ्कल्पभेददोष इति । श्रुतेष्वसौ शिष्टविगर्हणायां वा ॥३५॥ मुख्यापचारे तत्प्राप्तौ तस्यैवोपादानाधिकरणम् ॥ १६ ॥

## प्रवृत्तेऽपीति चेत् ॥ ३६ ॥

अथाग्निहोत्रादिषु कर्मसु श्रुतद्रव्यापचारे प्रतिनिधौ उपात्त कृतेषु केषुचित् संस्कारेषु यदि तदेव श्रुतमुपलभ्येत । किं श्रुतमुपादीयेत, उत तेनैव प्रतिनिहितेन समापयितव्यमिति । किं प्राप्तम् । श्रुतमुपादीयेत प्रवृत्तेऽपि । तदुक्तम्, आगमो हि तदभावादिति । तस्मान्न प्रतिनिधातव्यमिति ॥ ३६ ॥ पूर्व० ॥

## नानर्थकत्वात् ॥ ३७ ॥

नैतदेवम् । येन हि खदिराभावे कदरे पशुर्नियुक्तो भवति, अथ खदिरमुपलभते, प्रवृत्तेऽर्थे किं खदिरेण कुर्यात् । अर्थार्थं हि खदिरोपादानं, न खदिरोपादानार्थमेव । तस्मान्न श्रुतमुपाददीयेत ॥ ३७ ॥ सिद्धान्तः ॥ प्रतिनिधिना प्रारब्धे कर्मणि श्रुतद्रव्यलाभेऽपि प्रतिनिधिनैव समापनाधिकरणम् ॥ १७ ॥

## द्रव्यसंस्कारविरोधे द्रव्यं तदर्थत्वात् ॥ ३८ ॥

प्रवृत्ते पशुकर्मणि, यूपकाले अस्ति महत्कदरं द्रव्यं तक्षणादिसंस्कारक्षमम् । अस्ति खदिरद्रव्यमनेवञ्जातीयकम् । तत्र किमुपादेयमिति । संस्कारा न परिलोप्स्यन्ते इति कदर उपाददीयेतेति ॥ एवं प्राप्ते ब्रूमः । द्रव्यसंस्कारविरोधे द्रव्यमित्याद्रियेरन्, न संस्कारान् । कुतः । तदर्थत्वात् । संस्कारा हि द्रव्यं कर्मयोग्यं कुर्वन्ति । तत्र संस्कारपरिलोपे द्रव्यमपि तावद् गृह्यते । द्रव्याभावे न द्रव्यं, न संस्काराः । द्रव्यं तेषां द्वारम् । वचनप्रामाण्यात् । तदभावे नष्टद्वारं नापूर्वं गच्छेयुः । तस्मात् खदिरमुपाददीरन्निति ॥ ३८ ॥ सत्यपि संस्कारयोग्ये अमुख्ये मुख्यस्यैवोपादानाधिकरणम् ॥ १८ ॥

## अर्थद्रव्यविरोधेऽर्थो द्रव्याभावे तदुत्पत्तेर्द्रव्याणामर्थशेषत्वात् ॥ ३९ ॥

अस्ति यूपकाले खदिरलता पशोरप्रागल्भ्ये न समर्था । कदरद्रव्यं तु तत्समर्थम् । तत्र सन्देहः । किमुपादेयं खदिरद्रव्यम्, उत कदरद्रव्यमिति । खदिरद्रव्यमित्याह । तद्धि श्रुतम् । तदुपाददानः शास्त्रविहितं करोति । प्रतिनिधौ अश्रुतकारी स्यात् । तस्मान्न प्रतिनिधातव्यमिति । एवं प्राप्ते ब्रूमः । अर्थद्रव्यविरोधे अर्थं प्रति आदर्तव्यम् । तदर्थं हि द्रव्योपादानं नियोजनात् । अप्रागल्भ्यं पशोर्भविष्यतीति, न द्रव्यमेव उपाददीयेतेति । कदरमुपाददानो द्रव्यश्रुतिं बाधते । अर्थं त्वनुगृह्णाति । खदिरलतामुपाददान उभयं बाधते । तस्मात् कदरद्रव्यमुपादेयम् । द्रव्याभावे हि तदुत्पत्तिः प्रतिनिधेरुत्पत्तिरुक्ता । द्रव्याणि अर्थं प्रति शेषभूतानि ॥ ३९ ॥ प्रयोजनायोग्यस्य मुख्यस्य सर्वेऽपि प्रतिनिध्यादानाधिकरणम् ॥ १९ ॥

## विधिरप्येकदेशे स्यात् ॥ ४० ॥

सन्ति व्रीहयः, यावन्तो द्व्यवदानमात्रं निर्वर्त्तयन्ति । तथा सन्ति । नीवाराः शेषकार्याणामपि पर्याप्ताः । तत्र किमुपादेयमिति । किं प्राप्तम् । अपि एकदेशे द्व्यवदानमात्रेऽपि निर्वर्त्यमाने प्रतिनिधिरुपादेयः । किं कारणम् । शेषकार्याणां सम्पत्तिर्भविष्यतीति ४०॥ पूर्व०

## अपि वाऽर्थस्य शक्यत्वादेकदेशेन निर्वर्त्तितार्थानामविभक्तत्वाद्गुणमात्रमितरत्तदर्थत्वात् ॥ ४१ ॥

अपि वेति पक्षव्यावृत्तिः । एकदेशेन व्रीहीणां प्रधानमात्रं निर्वर्त्तयितव्यम् । कुतः । अर्थस्य शक्यत्वात् । योऽत्रार्थो, येन कार्य्यं तत्तावन्निर्वर्त्यते । शेषकार्याणि यदि न शक्यानि, नाङ्गानुरोधेन प्रधानस्य गुणो बाधितव्यः । तद्ध्यङ्गं, यत् प्रधानस्योपकरोति, न यदपकारे वर्त्तते । तत्र च शेषकार्याणि क्रियमाणानि प्रधाने व्रीहित्वं गुणं विहन्युः । व्रीहित्वं च प्रधाने साक्षादङ्गभूतं श्रूयते, व्रीहिभिर्यजेतेति । तस्मान्न तेष्वनुरोधः कार्य्यः । असति ह्यङ्गप्रधानविभागे एतदेवं स्यात् । अस्ति हि असौ । तस्मान्न प्रतिनिधिरिति । तथाचाऽन्यार्थदर्शनमपि भवति, तदेव यादृक् तादृग् होतव्यमिति ॥ ४१ ॥ सिद्धान्तः ॥ प्रधाननिर्वाहकत्वे अङ्गनिर्वाहापर्याप्तस्यापि मुख्यस्योपादानाधिकरणम् ॥ २० ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्य तृतीयः पादः ॥ ६ ॥ ३ ॥

### अथ षष्ठे अध्याये चतुर्थः पादः ॥ ६ ॥ ४ ॥

## शेषाद् द्व्यवदाननाशे स्यात्तदर्थत्वात् ॥ १ ॥

दर्शपूर्णमासयोः श्रूयते, यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां वाऽच्युतो भवतीति । तत्र यदि द्व्यवदानमात्रमुद्धृतं व्यापद्यते, किं शेषात् पुनरवदेयं, न ? इति भवति संशयः । किं प्राप्तम् । द्व्यवदाननाशे शेषात् पुनरवदेयम् । कुतः । तदर्थत्वात् । अग्न्यर्थं हि तद्धविः । अग्नये यागो निर्वर्त्तयितव्य इति । तदवदाने विनष्टे यागः कर्त्तव्य एवावतिष्ठते । प्रयोजनं च यागेन । स च आग्नेयेन क्रियमाणः श्रुत एवाभिनिर्वर्त्तितो भवतीति किमिति न क्रियेत । तस्माच्छेषाद् अवदातव्यमिति ॥ १ ॥ पूर्व० ॥

## निर्देशाद्वान्यदागमयेत् ॥ २ ॥

अथ वा अन्यद् हविरागमयेद्, न शेषाद् अवदातव्यम् । कुतः । निर्देशात् । निर्देशो हि भवति । मध्यात् पूर्वार्द्धाद् अवदेयमिति । द्यवदानं न होमसम्बद्धम् । द्यवदानं जुहोतीति । तत्राऽन्यच्छिष्टं मध्यस्य पूर्वार्द्धस्य विशेषणार्थम् । यच्च तद्धोमसंयुक्तं तद्विनष्टम् । तच्छेषेण क्रियमाणममध्येनापूर्वार्द्धेन च कृतं स्यात् । नन्ववत्ते यच्छिष्टं ततो मध्यात् पूर्वार्द्धाच्च ग्रहीष्यते । उच्यते । कृत्स्नस्य यन्मध्यं पूर्वार्द्धं च तच्चोदितं, नेतरस्य ॥

अथ वा निर्देशादिति । विनष्टे हि अन्यद् द्रव्यं निर्दिश्यते । यस्य सर्व्वाणि हवींषि नश्येयुर्दुष्येयुर्वा अपहरेयुर्वा आज्येन ता देवताः परिसङ्ख्याय यजेरन्निति हविषो नाशे आज्यं प्राप्तम् । तेन न शेषाद् अवदातव्यमिति ॥

अपर आह । शेषनिर्देशादिति । निर्दिश्यते हि तच्छिष्टमपरेभ्यः शेषकार्य्येभ्य इति । तन्नोपपद्यते । न हि तानि शेषकार्य्याणि हवींषि प्रयोजयन्ति । न च अनिवृत्तप्रयोजनं हविरन्यत्र प्रतिपाद्यम् । तस्मान्नायमर्थः ॥ २ ॥ सिद्धान्तः ॥ अवत्तनाशे पुनरवदानार्थं प्रतिनिध्यादानाधिकरणम् ॥ १ ॥

## अपि वा शेषभाजां स्याद्विशिष्टकारणत्वात् ॥ ३ ॥

अथ स्विष्टकृदर्थमवत्तं यदि विनश्यति, तत्र किं शेषाद् अवदेयम्, उत नेति । किं प्राप्तम् । पुनः शेषाद् अवदेयमिति । कुतः ? । नाऽत्र कृत्स्नस्योत्तरार्द्धादवदीयते । कस्य तर्हि । सन्निहितस्य । सति हि प्रयोजने सन्निहितस्य अवदेयमिति । तस्माद् अवदीयमाने श्रुतं कृतं भवति । तस्माच्छेषाद् अवदेयमिति ॥ एवं प्राप्ते ब्रूमः । शेषभाजां स्याल्लोपः । कुतः । विशिष्टकारणत्वात् । विशिष्टं हि कारणं तस्यावदाने, कथं प्रतिपाद्येतेति । प्रतिपत्तिश्च विविक्तकरणेन उपकरोति । तस्य विविक्तकरणाय प्रतिपाद्यमानस्य नियमोऽयं स्विष्टकृद्धोमेन प्रतिपादयितव्यः । तथा हि स प्रतिपादितो भवति । स यदि होमायोद्धृतो विपद्येत, कृते विवेके न पुनर्ग्रहणं प्रयोजयेत् । प्रतिपाद्यमानश्च स्विष्टकृद्धोमेन प्रतिपादयितव्य इति । प्रतिपाद्यमानाऽभावाल्लोप एव स्विष्टकृतः स्यात् । प्रधाने कृते शिष्टं सर्वशेषकार्यसाधारणम् । तत्रैकस्योद्धृतौ शिष्टमन्यत्र प्रतिपादनीयम् ॥ ३ ॥ स्विष्टकृदर्थस्यावत्तस्य नाशे अपुनरवदानाधिकरणम् ॥ २ ॥

## निर्देशाच्छेषभक्षोऽन्यैः प्रधानवत् ॥ ४ ॥

स्तौ दर्शपूर्णमासौ । तत्र भक्षाः प्राशित्र-चतुर्द्धाकरण-शंयुवाककालाः । तेषु सन्देहः । किमन्ये एव तेषां भक्षयितारः, उत प्रकरणगता इति । किं प्राप्तम् । शेषभक्षोऽन्यैरप्रकरणस्थैः कर्त्तव्यः । कुतः । निर्देशात् । निर्दिश्यन्ते ह्यध्वर्य्वादय इडाभक्षे । यजमानपञ्चमा इडां भक्षयन्तीति सर्वेषु भक्षयितृषु प्राप्तेषु परिसङ्ख्यानार्थो निर्देशः क्रियते । इडामेवैते भक्षयेयुरिति । यथा आग्नेयोऽष्टाकपाल इति सर्वस्मिन्नवयविनि यागानियमे प्राप्ते द्व्यवदानमात्रं श्रूयते । विधिर्वा न, प्राप्तत्वात् । नानुवादोऽनर्थकत्वात् । परिसङ्ख्या त्वर्थवत्त्वाय । एवमेषां परिसङ्ख्येति । अपि च यदि प्रकृता एव भक्षयेयुः, अश्वमेधे दोषः स्यात् । बहुत्वाद् भक्षाणां, भक्षयन्तो म्रियेरन् ॥ ४ ॥ पूर्व० ॥

## सर्वैर्वा समवायात् स्यात् ॥ ५ ॥

सर्वैर्वा प्रकृतैरेव भक्ष्येत । तद्धि भक्षणं पुरुषसंस्कारार्थम् । पुरुषाः संस्कृताः प्रचरिष्यन्तीति । तेषु विनिगमनाया अभावाद् यावन्तः प्रकरणे समवेतास्ते सर्वे भक्षयेयुरिति ॥ ५ ॥ सि० ॥

## निर्देशस्य गुणार्थत्वम् ॥ ६ ॥

अथ यदुक्तं, निर्देशादिति । गुणार्थः सः । । अन्ये कर्मकरत्वादेव प्राप्ताः । तत्र यजमानस्तेषां पञ्चमो वचनान्निर्दिश्यते । तत्प्राप्त्यर्थं चेदं वचनम् । ततो न परिसङ्ख्या ॥ ६ ॥

## प्रधाने श्रुतिलक्षणम् ॥ ७ ॥

यत्तु द्व्यवदानमात्रं प्रधाने निर्दिश्यते, तद् वचनप्रामाण्यात् परिसङ्ख्यानार्थम् । न हि तत्र कस्यचिदपूर्वस्य विधिः । इह यजमानो विधीयते । विधिपरिसङ्ख्यासंशये विधिर्ज्यायान् । तत्र स्वार्थे शब्दः । परिसङ्ख्यायां त्रयो दोषाः— स्वार्थहानमस्वार्थपरिग्रहः, प्राप्तबाधश्चेति । तस्मात् प्राकृता एव भक्षयेयुरिति ॥ ७ ॥ ॥ आ० नि० ॥

## अर्थवदिति चेत् ॥ ८ ॥

अथ यदुक्तम्— अश्वमेधे विरोधः स्याद्, बहुत्वाद्भक्षाणामिति । तत् परिहर्त्तव्यम् ॥ ८ ॥ आ० ॥

## न चोदनाविरोधात् ॥ ९ ॥

अश्वमेधे न सर्वं भक्षयिष्यन्ति । अर्थात् सर्वं भक्षयन्तोऽश्वमेधं न समापयेयुः । तत्राऽश्वमेधश्रुतिः प्रत्यक्षा । सा विरुध्यमाना चोदकप्राप्तं सर्वभक्षणं बाधते । प्रकृतौ तु न विरोधः । तस्मात् सर्वं प्रकृता भक्षयेयुरिति ॥९॥ आ० नि० ॥ ऋत्विजामेव शेषभक्षणाधिकरणम् ३ ॥

## अर्थसमवायात् प्रायश्चित्तमेकदेशेऽपि ॥ १० ॥

स्तो दर्शपूर्णमासौ । तत्राऽऽमनन्ति । भिन्ने जुहोति, स्कन्ने जुहोतीति । तत्र सन्देहः । किं कृत्स्ने भिन्ने स्कन्ने च प्रायश्चित्तम्, उतैकदेशेऽपि भिन्ने स्कन्ने चेति । किं पुनः सर्वभिन्नं, किमेकदेशभिन्नमिति । चूर्णीकृतमयोग्यं प्रयोजनाय, कृत्स्नभिन्नम् । यच्छकले विगतेऽपि प्रयोजनसमर्थम्, तदेकदेशभिन्नमिति । किं प्राप्तम् । एकदेशभिन्नेऽपि प्रायश्चित्तम् । कस्मात् । अर्थसमवायात् । समवेतं तत्र भेदनम् । एकदेशभिन्नमपि भिन्नमिति । एवं प्राप्ते निमित्ते नैमित्तिकं कर्त्तव्यं भवति ॥ १० ॥ सि० ॥

## न त्वशेषे वैगुण्यात्तदर्थं हि ॥ ११ ॥

तुशब्दः पक्षं व्यावर्त्तयति । न अशेषे भिन्ने प्रायश्चित्तं स्यात् । विनष्टसंस्कारार्थं हि प्रायश्चित्तम् । कुतः । एतच्छेदनवता प्रयोजनमस्ति, न होमेन । तेन संस्कृतेन प्रयोगः करिष्यते इति प्रायश्चित्तं क्रियते । न च तेन चूर्णीकृतेन प्रयोगः शक्यते कर्त्तुम् । तस्मात् प्रायश्चित्तमनर्थकम् । एकदेशभिन्नेन तु संस्कृतेन शक्यते प्रयोगः । तस्माद् एकदेशभिन्ने प्रायश्चित्तं स्यादिति ॥ ११ ॥ पूर्व० ॥

## स्याद्वा प्राप्तनिमित्तत्वादतद्धर्मो नित्यसंयोगान्न हि तस्य गुणार्थेनानित्यत्वात् ॥ १२ ॥

स्याद् वा प्रायश्चित्तं, कृत्स्नभिन्नेऽपि । कुतः । प्राप्तनिमित्तत्वात् । प्राप्तं हि निमित्तं भेदनम् । प्राप्ते च निमित्ते नैमित्तिकं कर्त्तव्यम् । यच्चोक्तम् । व्यापन्नसंस्कारार्थं प्रायश्चित्तमिति । नायं तस्य धर्मः । कुतः । नित्यसंयोगात् । नित्यवद् होमः । अनित्यं हि भेदनम् । न हि नित्यमनित्यस्योपकर्त्तुं चोद्यते । यदि नित्यं दर्शपूर्णमासयोरङ्गं नाऽनित्यस्योपकाराय । कुतः । कदाचिदनित्यं नैव स्यात् । तत्र कथं तस्योपकारकं भवेत् । तत्र को दोषः । न शक्यं नित्येन उपकर्त्तुम् । तेन नित्यमुपकुर्यादिति वचनं प्रलाप एव । अथ नैमित्तिकं, न दोषो

भवति । तस्माद् अस्मत्पक्ष एव । अस्मिन् पक्षे यदा भिन्नं, तदा होमः । यदा न भिन्नं, तदा नैव होमो विधीयते । भवदीये पक्षे भवति दोषः । नित्यानित्ययोर्नास्ति सम्बन्ध इति । तस्माद् भिन्नमात्रे प्रायश्चित्तमिति ॥ १२ ॥ उत्तरम् ॥

## गुणानाश्च परार्थत्वाद्वचनाद् व्यपाश्रयः स्यात् ॥१३॥

असति वचने न गुणो गुणार्थो भवितुमर्हति । प्रकरणतः सर्वं प्रधानार्थम् । भिन्नमपि होमोऽपि । न च भिन्नमाधारभावेनोपदिश्यते । भिन्नस्याधारभावे हि न होमान्तरं विधीयेत । प्रधानस्यैव हि तदा भिन्नो गुण इति गम्यते । तत्र आहवनीयसंयोगो बाध्येत । वचनाद्विकल्प इति चेन्न । निमित्तत्वेन सम्भवात् । होमस्य च श्रुत्या विहितत्वात् । यदा होमो विधीयते, तदा श्रुत्या । यदा भिन्नो गुणस्तदा वाक्येन । तस्मान्नाधारो भिन्नः । यद्युच्येत, निमित्तपक्षेऽपि न होमान्तरं, प्रकृतस्यैव होमस्य निमित्तं विधीयेतेति । तन्न । अनुपादीयमानं हि निमित्तमित्युच्यते । यदि हि विधीयेत, निमित्तमेव तन्न स्यात् । यदि च यस्यापि निमित्तं सोऽप्युद्दिश्येत, तत्र द्वयोरुद्दिश्यमानयोः सम्बन्ध एव न स्यात् । न चात्र भेदनं कुर्यादिति विधीयते । भेदने निर्वृत्ते यदन्यच्छ्रूयते, तद् विधीयते ॥१३॥ युक्तिः ॥

## भेदार्थमिति चेत् ॥ १४ ॥

अथोच्येत, एवमुपायं तत्कपालं सन्धीयते । गायत्र्या त्वा शताक्षरया सन्दधीतेति तत्कपालं संदध्यामिति । तत्र वक्ष्यामः ॥१४॥ आ० ॥

## शेषभूतत्वात् ॥ १५ ॥

न भेदनस्य शेषभूतं युज्यते, न तत् सन्धातुं शक्यते होमेन मन्त्रेण वा । मृदापि सन्धीयमानस्य भिन्नबुद्धिर्नैवापेयात् ॥१५॥ आ० नि० ॥

## अनर्थकश्च सर्वनाशे स्यात् ॥ १६ ॥

सर्वनाशे च श्रूयते, भिन्नं कपालमप्सु प्रवहन्तीति । तत्रानर्थकः संस्कारः । ननु तदुद्धृत्योपधायिष्यते । नेति ब्रूमः । अन्यदुपदधातीति हि आमनन्ति । तस्माद् नैमित्तिकं कर्माङ्गं भिन्ने जुहोतीति ॥१६॥ युक्तिः ॥ कृत्स्नैकदेशभेदे प्रायश्चित्तानुष्ठानाधिकरणम् ॥ ४ ॥

## क्षामे तु सर्वदाहे स्यादेकदेशस्यावर्जनीयत्वात् ॥१७॥

दर्शपूर्णमासयोः श्रूयते— अथ यस्य पुरोडाशौ क्षायतस्तं यज्ञं वरुणो गृह्णाति । यदा तद्धविः सन्तिष्ठेत अथ तदेव हविर्निर्वपेत्। यज्ञो हि यज्ञस्य प्रायश्चित्तिरिति । तत्र सन्देहः । किं सर्वक्षामे प्रायश्चित्तम्, उतैकदेशे क्षामे इति । किं प्राप्तम् । प्राप्तनिमित्तत्वात् कृत्स्ने वा एकदेशे वा। एवं प्राप्ते ब्रूमः । क्षामे तु सर्वदाहे स्यादिति। तुशब्दः पक्षं व्यावर्त्तयति, क्षामे सर्वदाहे प्रायश्चित्तं स्यात् । कुतः। एकदेशस्यावर्जनीयत्वात् । न शक्यते एकदेशक्षमता वर्जयितुम्। नियतमग्निसंयोगे दाह्यस्य सूक्ष्मा अवयवाः क्षीयन्ते । तप्तेषु च कपालेष्वधः पाकार्थं पुरोडाशोऽधिश्रीयते, उपरि चाङ्गारा अभ्युह्यन्ते। तदवर्जनीयं, निमित्तत्वेनापि श्रूयमाणं नित्यमेव स्यात् । तत्र यस्येति निमित्तश्रवणं विवक्षितं स्यात्। तस्मात् सर्वक्षामे प्रायश्चित्तमिति ॥ १७ ॥ आ० ॥

## दर्शनादेकदेशे स्यात् ॥ १८ ॥

न चैतदस्ति । सर्वदाहे प्रायश्चित्तमिति, एकदेशे क्षायति भवितुमर्हति । निमित्तं हि उपसम्प्राप्तं क्षाणं नाम । एकदेशक्षाणमपि क्षाणमेव । यदि तत्र न क्रियते, श्रुतं न क्रियेत । न चैतद् युक्तम्। अपि च दर्शयति । यदा तद्धविः सन्तिष्ठेत, अथैतदेव हविर्निर्वपेदिति, तेनैव हविषा संस्थानं दर्शयति । तत् सर्वक्षाणे नावकल्पते। तस्मादेकदेशे एव क्षायति प्रायश्चित्तमिति ॥ १८ ॥ आ० ॥

## अन्येन वैतच्छास्त्राद्धि कारणप्राप्तिः ॥ १९ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, यदुक्तम्, एकदेशेऽपि क्षायति प्रायश्चित्तमिति । किं तर्हि । कृत्स्नक्षामे एव प्रायश्चित्तम्। उपसम्प्राप्तं हि निमित्तं, यच्छास्त्रोक्तपुरोडाशौ क्षायत इति । कृत्स्नस्य क्षातिर्नावयवस्य । न चैकदेशक्षामे । तस्यावर्जनीयत्वात् । अथ यदुक्तं, क्षामेण हविषा समाप्तिर्दृश्यते, यदा तद्धविः सन्तिष्ठेतेति। उच्यते । संस्थाने निमित्ते प्रायश्चित्तम् । यदाप्यन्येनापि हविषा तत् संस्थाप्यते, तदापि प्रायश्चित्तमिति न दोषः ॥ १९ ॥ आ० नि० ॥

## तद्धविःशब्दान्नेति चेत् ॥ २० ॥

एवं चेदुच्यते, अन्येन हविषा यदा संस्थाप्यते इति । नैवम्। तद्धविःशब्दात् । तद्धविःशब्दोऽत्र भवति । यदा तद् हविः सन्तिष्ठे-

तेति । अत्रान्येन हविषा संस्थाप्यमाने तद्धविःशब्दो नावकल्प्येतेति ॥ २० ॥ आ० ॥

## स्यादन्यायत्वादिज्यागामी हविःशब्दस्तल्लिङ्ग-संयोगात् ॥ २१ ॥

स्यादिज्यागामी हविःशब्दः । तद्धविः सन्तिष्ठेत तद्धविष्कं कर्म सन्तिष्ठेतेति । ननु मुख्याभावे गौणो गृह्यते, नान्यथेति । उच्यते । मुख्याभाव एवायम् । कथम् । यदा सन्तिष्ठेत, तत् कर्म्म तेन हविषेति वाक्यमभिधीयेत । अवाचकं च स्यात् । कर्मैव हि सन्तिष्ठते, न हविः । तेन निमित्तम् । तद् हविरित्यनुवादः । अनुवादश्चेदन्यहविष्केऽपि कर्म्मणि संस्थिते प्रायश्चित्तमिति गम्यते । कथं पुनर्हविःशब्दः कर्म्मणि वर्त्तते इति । तल्लिङ्गसंयोगात् । हविःसम्बद्धं कर्म्म हविःशब्देन हविःसम्बन्धाद् अवगम्यते । यथा प्रसह्यकारितया देवदत्तसम्बद्धया लक्ष्यते सिंहः । एवं हविषापि कर्म लक्ष्यते । तस्मात् कृत्स्नक्षामे प्रायश्चित्तमिति ॥ २१ ॥ आ० नि० ॥ क्षामे सर्वदाहे प्रायश्चित्तानुष्ठानाधिकरणम् ॥ ५ ॥ क्षामेष्टिन्यायः ॥

## यथाश्रुतीतिचेत् ॥ २२ ॥

दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति श्रूयते । तत्रेदमस्ति वचनं, यस्योभयं हविरार्त्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेदिति । तत्र सन्देहः । किमुभयस्मिन्नार्त्ते पञ्चशरावो निर्वप्तव्यः, उत अन्यतरस्मिन्निति । किं प्राप्तम् । इति चेत् पश्यसि, एवञ्जातीयके एकस्मिन्निति ॥ तत्र ब्रूमः । उभयोरिति । कुतः । यथाश्रुति भवितुमर्हति । यद् यच्छ्रूयते, तद् अवगम्यते । उभयोश्चार्त्तौ श्रूयते । श्रूयमाणं च विवक्षितुं न्याय्यम् । इतरथा यावदेव हविरिति तावदेवोभयं हविरिति स्यात् । तस्मादुभयोरार्त्यां पञ्चशराव इति ॥ २२ ॥ पूर्व० ॥

## न तल्लक्षणत्वादुपपातो हि कारणम् ॥ २३

नैतदेवम् । उपपातो हि आर्त्तिसम्बद्धं द्रव्यं, तत् कारणम् । तस्य लक्षणं हविरार्त्तिः । तद् व्यस्तं समस्तं च निमित्तम् । न हि उभयशब्देन शक्यं विशेष्टुम् । विशिष्यमाणे हि वाक्यम्भिद्येत । हविष आर्त्तौ पञ्चशरावः । स चोभयस्य हविष इति ॥ आह । यदि

विशेषणं न मृष्यते, हविषाऽपि ते विशेषणं न प्राप्नोति । तदभिधीयते । मृष्यामहे हविषा विशेषणम् । अविशेष्यमाणेऽनर्थकं स्यात् । यस्यार्त्तिमार्च्छेदित्यविशेषे यत्किञ्चिदिति गम्यते । तत्र सर्वस्यैव किञ्चिदार्त्तिमृच्छति । अन्ततश्चरितं निमिषितं चिन्तितमिति । तत्र यस्येति निमित्तवचनं नित्यमनुपपन्नं गम्यते । तस्मादवश्यमार्त्तिर्विशेष्टव्या । सा च हविषा विशिष्यते । तथा हविरार्त्तिसम्बन्धनिर्वृत्तिर्निमित्तं पञ्चशरावस्य । शक्नोति हि श्रुत्या तं सम्बन्धं वक्तुम् । हविरुभयसम्बन्धं तु वाक्येन ब्रूयात् । दुर्बलं च वाक्यं श्रुतेः ॥

ननु हविरार्त्तिसम्बन्धोऽपि वाक्येनैव । उच्यते । आर्त्तिनिर्वृत्तिरपि तत्र गम्यते । सा च श्रुत्या । हविरुभयसम्बन्धेऽत्यन्तं श्रुतिरवहीयते । तस्मान्न तत्सम्बन्धो निर्वर्त्यमानो निर्दिश्यते इति । कथं तर्हि उभयशब्दः । उभयमिति नित्यानुवादः । एकस्मिन्नप्यार्त्तेऽपरस्मिन्नपि । तस्मादुक्तं, यस्योभयं हविरार्त्तिमार्च्छेदिति ॥

अथ कस्मान्न पदद्वयविशिष्टा आर्त्तिर्निमित्तं प्रतीयते इति, यस्योभयगुणविशिष्टं हविरार्त्तिमार्च्छेदिति । अत्रोच्यते । कथं तावद् भवान् मन्यते- विशिष्टेन अर्थेन विशिष्टा आर्त्तिर्निमित्तम् ? इति । आह । विशिष्टार्थस्य सन्निधानाद् विशिष्टोऽर्थ आर्त्तिसन्निहितः । किं पुनः स्याद्, यद्येवं भवेत् ? तत उभयविशिष्टा आर्त्तिर्निमित्तमिति गम्यते । अत्रोच्यते । इदं तावद्देवानाम्प्रियः प्रष्टव्यः । यस्यापि हि विशिष्टार्थ आर्त्तिसन्निहितो भवति, किं तस्याविशिष्टो दण्डैः पराणुद्यते । किमतो यन्न पराणुद्यते । एतदतो भवति । अविशिष्टगताप्यार्त्तिर्निमित्तं पञ्चशरावस्य भवति । ननूभयशब्दो हविर्विशेक्ष्यति । न । हविःशब्देनासम्बद्ध्यमानस्तन्न शक्नोति विशेष्टुम् । आनन्तर्यात् सम्भन्त्स्यते तर्हि । तथापि न समर्थः । न हि असौ निवृत्तिं प्रयोजयति ॥ आह । विशेषवचनत्वात् तन्निवर्त्तको भविष्यति । यथा शुक्ला गौरानीयतामिति । न एवमभिहिते कृष्णामानयन्ति । शुक्लशब्दः एनां गां कृष्णादिभ्यो निवर्त्तयति । उच्यते । विषम उपन्यासः । न तत्र गवाकृत्या द्रव्यं लक्षयित्वा तस्यानयनमुच्यते । तत्रापि चेदेवमभविष्यद्, नैवैनां शुक्लशब्दो व्यशेक्ष्यत । उभयविशेषणविशिष्टं तु तत्रानयनं प्रधानमुच्यते । इह पुनरार्त्तिहविष्ट्वलक्षिते द्रव्ये पञ्चशरावः । किं पुनः कारणं, प्रधानभूते आख्यातार्थे संहत्य विशेषणं भव-

ति, परार्थे पुनर्वियुज्येति । उच्यते । प्रधानभूते आकृतिर्गुणो वा तत्सम्बन्धार्थमुच्यते, तत्रोभयविशेषणविशिष्टः एकस्माद् वाक्याद् अवगम्यते। तद्विशिष्टं च कृत्वा कृती भवति। अन्यतरविशिष्टं कुर्वन्नश्रुतं कुर्य्यात्। यत्र पुनराकृतिलक्षिते द्रव्ये आख्यातार्थः कीर्त्यते, तत्र सर्वेष्वेव तज्जातीयेषु उक्तो भवति । न तत्रैकस्मिन् निर्वृत्ते कृतं मन्येत। अपरस्मिन्नपि हि आकृतिलक्षिते तदुक्तमेव । तत्रोक्तम्, अप्रतिषिद्धं च किमिति न क्रियेत ? । आख्यातार्थे पुनः प्रधाने न तस्य आकृतिलक्षितेन सम्बन्धः। तत्र तदाकृतिकान्तरेऽनुपसंह्रियमाणेऽपि कृतमेव प्रधानम्। सगुणं च प्रधानं भवति। न च किञ्चिच्छ्रुतं हीयेतेति। तस्मात् तत्र विशेषणं युक्तं, न त्विह तथा। इह हि हविराकृतिकस्य द्रव्यस्यार्त्तौ पञ्चशराव इत्युक्तम्। तन्न शक्यं विशेषवचनेन प्रतिषेधावाचकेन निवर्त्तयितुम्॥

अपिचोभयशब्दे हविषा सम्बद्ध्यमानेऽपि नैवोभयविशिष्टा आर्तिः प्रतीयते। किं कारणम्। हविषोभयशब्दः सम्बद्ध्यते, न, आर्त्तिमार्च्छेदित्यनेन पदेन । तत्र सन्निहितेऽप्युभयशब्दे हविःशब्दस्य यावान् अर्थः, तावतैवार्त्तिः सम्बद्ध्यते । अविशिष्टश्च तत्रार्थः । तस्मान्नोभयविशिष्टा आर्त्तिर्निमित्तमिति॥

अथार्त्याश्रयविभक्तियोगादुभयशब्दस्य, उभयविशिष्टा आर्त्तिरित्युच्यते। तन्न। विभक्तिसंयोगो हि हविर्विशेषणमुभयशब्दं शक्नुयात् कर्त्तुम्। समभिव्याहारान्नार्त्तिविशेषणम् । न हि अस्यार्त्या हविर्विशिष्टस्य समभिव्याहारोऽस्ति । अथोच्यते । असत्यपि समभिव्याहारे आर्त्तिशब्दसन्निधानात् तद्विशिष्टैवार्त्तिः प्रत्येष्यते इति। तन्न । असत्यां हि आकाङ्क्षायां सन्निधानमकारणं भवति। यथा, भार्य्या राज्ञः पुरुषो देवदत्तस्येति। एकवाक्यगतत्वात् तद्विशिष्टं गम्यते इतिचेत्। नैतदेवम्। एकस्मिन्नपि वाक्ये तदवयवभूतस्यानपेक्षितस्य नैव भवति सम्बन्धः। यथा, अश्वेन व्रजति श्वेतेन पटेन आवृत इति, नानपेक्षितस्याश्वस्य श्वैत्यं विशेषणं भवति॥ अथोच्यते, आर्तिविशिष्टेन हविषा उभयस्य सम्बन्ध इति । तदपि नोपपद्यते। न हि, आर्त्तिमार्च्छेदिति हविर्विशेषणत्वेनोपादीयते। किन्तर्हि? पञ्चशरावस्य निमित्तत्वेन। हविरार्त्तेरुभयपञ्चशरावसम्बन्धे यौगपद्येन अभ्युपगम्यमाने वाक्यम्भिद्येत॥ अथ हविराकृतिलक्षितेन सम्बद्ध-

मार्च्छेदिति पुनर्हविर्विशिष्टेनोभयशब्देन सम्बद्ध्येत । तथापि वाक्यं भिद्येत । तस्मान्नोभयविशिष्टा आर्त्तिर्निमित्तम् ॥ आह । यथैव आख्यातार्थप्राधान्ये उभयविशिष्टा उच्यते इति नान्यतरविशिष्टा निमित्तं गम्यते, एवम् इतरस्मिन्नपि पक्षे उभयविशेषणविशिष्टा सोच्यते इति । यद्यपि स्वेन आत्मनाऽविशिष्टा, तथाप्यन्यतरविशिष्टा भवन्ती न निमित्तं भवितुमर्हतीति, को विशेष ? इति । तदभिधीयते । मत्पक्षे उपादेयत्वेन विशेषणद्वयं, त्वत्पक्षे पुनर्लक्षणत्वेन । आह । किमतो यल्लक्षणत्वेन ? । उच्यते । एतद्तो भवति । हविराकृत्या लक्ष्यते द्रव्यम् । तस्य किञ्चिद् वक्तव्यमिति तदलक्षितमुच्यमानं न विज्ञायेत कस्य स्यादिति । अथ वा सर्वस्यैव द्रव्यस्येति गम्येत । तस्मिन्नुभयस्मिन्नप्यविशिष्टे सति तस्याश्रयं लक्षयितुं हविराकृतिरुच्यते । तत्र द्वयमापतति । यद् हविराकृतिकं तदार्त्तमिति । यद्वा यद् हविराकृतिकं, तदुभयमिति । यदि तावद् यद् हविराकृतिकं तदार्त्तमित्यपेक्ष्यते, ततो हविराकृतिकमुभयमनुभयं वा आर्त्तं निमित्तं गम्यते । अथ यद् हविराकृतिकं तद् उभयमिति ततो न आर्त्तिर्हविषा विशेष्यते । हविषा अविशिष्यमाणायामार्त्तौ उभयशब्दो हविर्विशेक्ष्यतीति नैतदवकल्पते । कथमिति । एवं किल विशेष्येत, यद् हविराकृतिकमुभयमिति । तत्र पुनर्वक्तव्यं, यद् हविराकृतिकम् । उभयं, तच्चेदार्त्तमिति । कथं तेन विशिष्टेन आर्त्तिः सम्बद्ध्येतेति । न पुनरुभयहविःशब्दौ च आर्त्तिविशेषणार्थमुच्चार्य्येयाताम् । अथ पुनरुच्चारणं न क्रियते, तथा यद्यपि हविःशब्दस्तन्त्रेण आर्त्त्युभयाश्रयलक्षणार्थं नोच्चार्य्येत । अविशिष्टमार्त्तेर्लक्षणं स्याद्, अविशिष्टमुभयस्य । विशिष्टे इष्टे पुनरुच्चारणं कर्त्तव्यम् । तत्र वाक्यभेदः ॥ एवमुभयशब्दो यदि आर्च्छतिना सम्बद्ध्येत न हविर्विशिष्टं स्यात् । तत्राऽविशिष्टस्य हविष आर्त्तिर्निमित्तं स्यात् । अथ हविःशब्देन सम्बद्ध्येत, पुनरार्त्तिसम्बन्धार्थं हविःशब्दसहितमुच्चार्य्येत । तच्चैतदिति ॥

उपादेयत्वे पुनर्नान्योन्यविशेषणत्वेन प्रयोजनम् । द्वयमपि आर्त्तिं विशेष्टुमुच्चार्य्येत । तत्र नान्यतरविशिष्टा आर्त्तिः निमित्तं भविष्यति । लक्षणत्वे त्वन्यतरविशिष्टा भवतीत्येष विशेषः ।

अपि च, सर्वस्यैव पदस्य पदान्तरसम्बन्धे सति च, शब्दादृते तृतीयेन पदेन सत्यां गतौ सन्निहितेनापि सम्बन्धो न युक्तः । न हि भवति,

भार्य्या राज्ञः पुरुषो देवदत्तस्येत्यत्र राजा पुरुषविशेषणम् । अस-त्यान्तु गतावुपादेयस्यानेकस्यापि प्रधानेन सम्बन्धोऽवकल्पते व्य-वहितेनापि। व्यवधानादर्थो बलीयानिति। लक्षणत्वे तु लक्षणद्वयसंनि-पातेऽवश्यं हेयेऽन्यतमस्मिन् व्यवाहितो गुणो वा ज्ञातव्यो भवति ॥२३॥ सिद्धान्तः ॥ एकहविरार्तावपि पञ्चशरावनिर्वापाधिकरणम् ॥ ६ ॥

## होमाभिषवभक्षणं च तद्वत् ॥ २४ ॥

ज्योतिष्टोमे श्रूयते, हविर्धाने ग्रावभिरभिषुत्याहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्तीति । तत्रान्येन वचनेनाभिषव उक्तो यजतिना होमः । तौ तावन्न विधीयेते । न च तयोः क्रमः । अर्थादेव हि स प्राप्तः । तस्माद् एककर्तृकं होमाभिषवाभ्यां भक्षणं विधीयते । अभिषवे कृते होमे च तत्कर्तृभिर्भक्षणं कर्त्तव्यमिति । तत्र एष सन्देहः । किमुभयं यः कुर्य्यात् स एव भक्षयेत् ? उतान्य-तरेणापि भक्षणमिति । किं प्राप्तम् । होमाभिषवभक्षणं च तद्वत् । तद्वदेव स्याद्, यद्वद्धविष आर्त्तिः । कथम् । नैतदेवं सम्बद्ध्यते । अभिषुत्य ततो हुत्वा ततो भक्षयेदिति । नानेन अभिषवस्य होमस्य च क्रमः कीर्त्यते । अभिषुत्य ये जुह्वति, ते भक्षयन्तीति । वाक्यं हि एवमभिद्येत । अभिषुत्य भक्षयन्ति, हुत्वा भक्षयन्तीति । तस्माद्धोमा-ऽभिषवयोः परस्परेण सम्बन्धो नास्तीत्येकेनापि भक्षणं सम्बद्ध्येत। अपरेणापि, अभिषुत्य भक्षयन्तीति। तस्मादन्यतरेण निमित्तेन भक्षणं भवतीति ॥ २४ ॥ पूर्व० ॥

## उभाभ्यां वा न हि तयोर्धर्मशास्त्रम् ॥ २५ ॥

उभाभ्यां वा निमित्ताभ्यां भक्षयेत् । न भक्षणं होमाभिषवयो-र्धर्मो विधीयते।किं हि स्याद् यदि तयोर्धर्मो विधीयेत ? होमाभिषवौ प्रधानमिति भक्षणं गुणः प्रतिप्रधानं भिद्येत । अथ पुनरुभाभ्यां नि-मित्ताभ्यां भक्षणं विधीयते । तस्मिन् विहिते एकोऽर्थो विहितो भव-ति । तेनैकं वाक्यम् । तदेतावति पर्य्यवसितं भवति । अभिषुत्य हुत्वा भक्षयन्तीति । तत्रैतदवान्तरं वाक्यं, हुत्वा भक्षयन्तीति । न च महावाक्ये सति अवान्तरवाक्यं प्रमाणं भवति । पदाऽन्तरस्य बाधनात् । यथा, नोद्यन्तमादित्यमीक्षेतेति प्रतिषेधो गम्यते महावा-क्याद्, अवान्तरवाक्यादीक्षणविधानम् । तस्मादन्यतरनिमित्तं भक्ष-

णमश्रुतम् । महावाक्यादिदमवगम्यते । द्वे निमित्ते भक्षणस्येति । भक्षणञ्चान्यथा कुर्वञ्छ्रुतं परित्यजेत् । तस्मादुभाभ्यां भक्षणमिति ॥ २५ ॥ सिद्धान्तः ॥ होमाभिषवोभयकर्तुरेव भक्षणाधिकरणम् ॥७॥

## पुनराधेयमोदनवत् ॥ २६ ॥

अग्निहोत्रे श्रूयते, यस्योभावनुगतावग्नी अभिनिम्लोचेत्, यस्य वाऽभ्युदियात् पुनराधेयमेव तस्य प्रायश्चित्तिरिति । तत्र सन्देहः । किमन्यतरानुगमने पुनराधेयम्, उतोभयानुगमने ? इति । किं प्राप्तम् । पुनराधेयमोदनवत् स्यात् । यथा पञ्चशरावोऽन्यतरस्य आर्त्तौ भवति । एवं पुनराधेयमन्यतरानुगमने भवितुमर्हति, वाक्यभेदप्रसङ्गादिति । यथा, इह यक्ष्ये, इह सुकृतं करिष्यामीत्येवमेवाभिसम्बन्ध इति ॥ २६ ॥ पूर्व० ॥

## द्रव्योत्पत्तेर्वोभयोः स्यात् ॥ २७ ॥

द्रव्ये विनष्टे तस्यैव द्रव्यस्योत्पत्तिरत्र प्रायश्चित्तम् । तस्य दृष्टं प्रयोजनं, कथं द्रव्यं भवेदिति पुनराधानं क्रियते । तत्रैष धर्मो, द्वावग्नी सह उत्पद्येते, न पृथक्त्वेन । तत्रान्यतरानुगमने न शक्यते एक आधातुं विगुणं स्यात् । अथ द्वितीयमप्यादधीत । स यदि तावदाहवनीयः । तत्राहवनीयोऽन्यो होमार्थो विद्यते एवेति न स होमाय स्यात् । यश्च होमार्थमुत्पाद्यते स आहवनीयः । यत एष संस्कारशब्दः । संस्कारशब्दश्चैकेनापि संस्कारेण विना न भवति । एषोऽपि च संस्कारः । यद् होमार्थता । यदाहवनीये जुहोतीति श्रूयते । तदेकस्मिन्ननुगते, एकस्मिन्नाधीयमाने वैगुण्यम् । द्वयोरपि हि वैगुण्यमेव । तस्मान्नैकस्मिन्ननुगते पुनराधेयमशक्यत्वादिति ॥ २७ ॥ सि० ॥ पुनराधानं प्रति वह्न्यनुगमद्वयस्य निमित्तताधिकरणम् ॥ ८ ॥

## पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात् ॥ २८ ॥

दर्शपूर्णमासयोः श्रूयते, यस्योभयं हविरार्त्तिमार्च्छेदैन्द्रं पञ्चशरावमोदनं निर्वपेदिति । तत्र सन्देहः । किं हविषि आर्त्ते पञ्चशरावः प्रतिनिधिः, उत निमित्ते कर्मान्तरमिति । कथं प्रतिनिधिः, कथं कर्मान्तरमिति ? । यद्येवमभिसम्बन्धो भवति, पञ्चशरावं निर्वपेत् कुर्य्यादिति, ततः सान्नाय्यस्य कार्य्ये पञ्चशरावः प्रतिनिधिरिति । अथ न पञ्चशरावो निर्वपतिना, किन्तु देवतया सम्बद्ध्यते पञ्चशराव-

मैन्द्रं कुर्य्यादिति, ततो निमित्ते यजतिर्विधीयते ॥ किं तावत् प्राप्तम् । पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिः स्यात् । पञ्चशरावः सान्नाय्यस्य प्रतिनिधिः । कुतः । द्रव्यश्रुतेः । द्रव्यस्य निर्वापे श्रवणं, नेन्द्रसम्बन्धः । कुतः । एवं निर्वापविधिर्भविष्यति तत्र श्रुतिर्विधायिका । इतरथा द्रव्यदेवतासम्बन्धे वाक्यं स्यात् । तत्र दुर्बलं श्रुतेः । तस्मात् प्रतिनिधिरिति ॥ २८ ॥ पूर्व० ॥

## चोदना वा द्रव्यदेवताविधिरवाच्ये हि ॥ २९ ॥

निमित्ते वा यजतिः कर्मान्तरं, द्रव्यदेवताविधिः । द्रव्यदेवतमिह श्रूयते, पञ्चशरावमैन्द्रं कुर्य्यादिति । इतरथा हि ऐन्द्रमिति प्रमादपाठोऽवगम्येत । ऐन्द्रमाहेन्द्रयोर्वा अयथार्थानुवादः । ऐन्द्रमिति स्यात् । अवाच्ये हि ते देवते । ऐन्द्रशब्देन इन्द्रो महेन्द्रश्च न शक्योऽनुवादितुम् । विशेषणत्वे वाक्यभेदः । ननु श्रुतिर्बलीयसीत्युक्तम् । सत्यमेवम् । किन्त्वितरस्मिन् पक्षे बाध्यततरां श्रुतिः । ऐन्द्रशब्दस्यातन्त्रत्वात् ॥ २९ ॥ सिद्धान्तः ॥ पञ्चशरावनिर्वापस्य कर्मान्तरताधिकरणम् ॥ ९ ॥

## स प्रत्यामनेत् स्थानात् ॥ ३० ॥

स एष नैमित्तिको यागः, किममावास्यां प्रति आमनेत्, न ? इति । किं प्राप्तम् । स प्रत्यामनेत्, स्थानात् । स एष यागोऽमावास्यां प्रति आम्नातुमर्हति । कुतः ? । स्थानात्, यागे विनष्टे याग एष श्रूयमाणो यदि न नष्टस्याङ्गं, ततोऽर्थवान् भवति । अथाङ्गं, निष्प्रयोजनस्याथ क्रियमाणं निष्प्रयोजनमेव भवितुमर्हति । विगुणं च निष्प्रयोजनमेव । विनष्टमामावास्यमिति प्रत्यक्षम् । इदमपि कर्त्तव्यमिति शाब्दम् । यद् विनष्टं, तन्निष्फलमिति न कर्त्तव्यम् । इदं च कर्त्तव्यमिति प्रत्याम्नायोऽवगम्यते ॥ ३० ॥

## अङ्गविधिर्वा निमित्तसंयोगात् ॥ ३१ ॥

अङ्गं वा एतद् विधीयते, हविष आर्त्तौ निमित्ते यागः श्रूयते । तत्र त्रयमापतति । यद्वा निमित्ते स्वतन्त्रं कल्प्यं फलम् । यद्वा अमावास्याया यत् कार्य्यं तदस्य । यद्वा तस्याङ्गमिति । स्वप्रधानं तावन्न । कल्प्यत्वात् फलस्य । नामावास्यायाः कार्य्यं । किं कारणम् । अश्रवणात् । नैवं श्रूयते । तस्याः कार्य्ये वर्त्तते इति कर्त्त-

व्योपदेशेनापि नान्यतमाध्यवसानं त्रिष्वेषु पक्षेषु। तेषु च पक्षेषु विवक्षितेषु कर्त्तव्योपदेशोऽवकल्प्यते ॥ नन्वेवमभिसम्बन्धो भविष्यति- यस्योभयं हविरार्त्तिमार्च्छेत् स एतेन यागेन साधयेद्, यत् साधयितुकामः। किञ्चासौ साधयितुकामो, यदमावास्यायाः फलमिति। अत्रोच्यते । फलपदेन सम्बन्धाभावात् सम्बन्धस्य विधायकं वाक्यम् । श्रुत्या च यागकर्त्तव्यता विधीयते । सा च वाक्याद् बलीयसी। तस्मान्न तत्कार्य्ये वर्त्तते इति । किं तर्हि प्रयोजनम् । तस्या अमावास्याया अङ्गम् । नन्वेतदपि नास्ति तस्या अङ्गमिति । तत्रोच्यते । तत्सम्बन्धेन समाम्नानात् तत्प्रयोगवचनेन गृह्यते । दर्शपूर्णमासाभ्यां फलं साधयेत् सर्वैरङ्गैः सह । अस्यां च आर्त्तौ एष याग इतिकर्त्तव्यता इति । तस्मादेवमवगम्यते- विनष्टे हविषि आमावस्यं यन्न शक्नोति स्वकार्य्यं कर्त्तु, तदनया इतिकर्त्तव्यतया सहितं शक्नोतीति। तस्मान्निमित्ते कर्म्माङ्गमिति ॥ ३१ ॥ सिद्धान्तः ॥ पञ्चशरावयागस्य नैमित्तिकदर्शयागाङ्गताधिकरणम् ॥ १० ॥

## विश्वजित्त्वप्रवृत्ते भावः कर्माणि स्यात् ॥ ३२ ॥

एतदाम्नायते, सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आम्नानमागुरते, यः सत्राय आगुरते, विश्वजिता अतिरात्रेण सर्वपृष्ठेन सर्ववेदसक्षिणेन यजेत, सर्वाभ्य एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्य आत्मानं निष्क्रीणीते इति । सत्राय आगोरणे निमित्ते विश्वजित् श्रूयते । तत्र सन्देहः । किं सत्राय आगूर्य्य यः सत्रं प्रयुङ्क्ते, तस्य विश्वजित्, उत यो न प्रयुङ्क्ते तस्येति । किं तावत् प्राप्तम् । यश्च प्रयुङ्क्ते, यश्च नेत्यविशेषात् । अथवा प्रयुञ्जानस्य । कुतः । निमित्ते कर्माङ्गमेवञ्जातीयकमित्युक्तम् । तदप्रयुज्यमानस्य कथमङ्गं स्यादिति ॥ एवं प्राप्ते ब्रूमः । विश्वजित्तु अप्रवृत्ते भवेत् । सत्रस्य क्रियाया अभावे विश्वजित् । किं कारणम् । एवं हि श्रूयते, यः सत्राय आगुरते स विश्वजिता अतिरात्रेण यजेतेति । यः सत्रं करिष्यामीत्येवमागुरते स विश्वजिता यागेन साधयेदिति । यदर्थमसौ सत्रं कर्त्तुमिच्छति, तदर्थमिति गम्यते । कथम् । य आगुरते, स तेन यजेत । यागेन निर्वर्त्तयेदिति वाक्यार्थो गम्यते, न यागं निर्वर्त्तयेदिति। कुतः । यागस्य गुणत्वेन श्रवणात् । कथं तस्य गुणत्वम् । तृतीया-

निर्देशात् । प्राधान्ये हि फलं कल्प्येत । इतरस्मिँस्तु पक्षे प्रत्यक्षाद् वाक्यात् फलावगमः ॥ ३२ ॥ सि० ॥

## निष्क्रयवादाच्च ॥ ३३ ॥

एवं तत्र श्रूयते, सर्वाभ्यो वा एष देवताभ्यः सर्वेभ्यः पृष्ठेभ्यो यदात्मानं निष्क्रीणीते इति । निष्क्रयद्वारेण च संस्तवः प्रवृत्ते न युज्यते । तस्मादप्रवृत्ते विश्वजिदिति । अथ कस्मान्नैवमभिसम्बन्धः क्रियते– आगूर्य्य सत्राय विश्वजिता यजेतेति । विश्वजितः सत्रस्य च सम्बन्धो विज्ञायेत । आगोरणवेलायामिति । नैवम् । आगोरणविशेषणं हि सत्रं सत्रविश्वजित्सम्बन्धे व्यवहितकल्पना स्यात् । श्रुतिश्च पुरुषेण विश्वजितं सम्बन्धयति, विश्वजिता यजेत पुरुष इति, न सत्रेण । सत्रस्य विश्वजिद् याग इति, आगूर्य्य इति च । एवं श्रवणमर्थवद् भवति । सत्राङ्गत्वे त्वर्थप्राप्तं न वक्तव्यम् । न च आगूर्य्य यजेतेत्यागोरणानन्तर्य्यं शक्यं विधातुम् । अशब्दार्थो हि तदा आश्रीयेत । समानकर्तृकता हि शब्दवती । पूर्वकालभावस्य चार्थप्राप्तत्वान्न वक्तव्यता । तस्माद् आगूर्य्य इत्यत्रैव विश्वजितः सम्बन्धः । स चेद्, आगूर्य्य, न सत्रेण यजेत यस्य विश्वजिदिति ॥ ३३ ॥ युक्तिः ॥ सत्रायागूर्याप्रवृत्तस्य विश्वजिदावश्यकताधिकरणम् ॥ ११ ॥

## वत्ससंयोगे व्रतचोदना स्यात् ॥ ३४ ॥

दर्शपूर्णमासयोः श्रूयते, बर्हिषा वै पौर्णमासे व्रतमुपयन्ति, वत्सेन अमावास्यायामिति । तत्र सन्देहः । किं वत्ससाधनकं व्रतं विधीयते, उत व्रतस्य काल इति । अथ वत्सो व्रताङ्गमिति । किं प्राप्तम् । वत्ससाधनकं व्रतं विधीयते ? इति । अमावास्यायां वत्सैर्व्रतं कुर्य्यादिति ? । वत्सव्रतसंयोगोऽपूर्वः, स विधीयते । तस्मिँश्च विधीयमाने उभयमपि विहितं भवति वत्सो व्रतश्च ॥ ३४ ॥ पूर्व० ॥

## कालो वोत्पन्नसंयोगाद् यथोक्तस्य ॥ ३५ ॥

यथोक्तस्य वचनान्तरेण प्राप्तस्य कालोऽयं विधीयते । कुतः । उत्पन्नसंयोगात् । उत्पन्नसंयोगोऽयं व्रतस्य, नोत्पत्तिसंयोगः । कथम् । अमाषममांसं बहुसर्पिष्कं व्रतं व्रतयन्तीति विहितं पूर्वं व्रतम् । अप्रज्ञातश्च कालः । तस्मात् कालविधिरिति ॥ ३५ ॥ सि० ॥

## अर्थापरिमाणाच्च ॥ ३६ ॥

न च शक्योऽत्रार्थः परिमातुम् । वत्सेन व्रतमुपयन्तीति किं वत्सोऽत्र व्रतयितव्यः ? एवं वत्सेन व्रतमुपगतं भवति । किं वत्सेन हस्तस्थानीयेन व्रतयितव्यमिति । एवं तदुपेतं भवति । उत वत्सं सन्निधाय तदुपेयादिति ? । नैव व्यवतिष्ठते शास्त्रार्थः । करणं हि एतन्निर्द्दिष्टम् । नेतिकर्त्तव्यता । एतावदुक्तम् । वत्ससाधनं व्रतं कुर्यात् । कथमित्येतदविशेषाकाङ्क्षमेवावतिष्ठेत । नैव अर्थः परिच्छिद्यते। व्रते किं वत्सेन क्रियते इति । अथवा यद्वा तदेति । तथा वत्सो व्रतेन सम्बद्ध्यमान इष्टः स्यात् । अपरार्थतामापद्येत । परार्थतां चास्य द्योतयति विभक्तिस्तृतीया । साधकतमे हि सा भवति । तस्मादपि कालार्थः संयोगः ॥ ३६ ॥ युक्तिः ॥

## वत्सस्तु श्रुतिसंयोगात्तदङ्गं स्यात् ॥ ३७ ॥

यदुक्तं, निहितत्वाद् व्रतस्यानुवाद इति । सत्यमेतत् । यत्तूक्तं, कालविधानार्थ इति । तन्न । वत्सस्तदङ्गत्वेन विधीयते । कुतः । श्रुतिसंयोगात् । वत्सेऽङ्गे विधीयमाने श्रुतिर्निमित्तं, काले लक्षणशब्दः स्यात् । श्रुतिलक्षणाविशये च श्रुतिर्न्याय्या । तस्मादङ्गं वत्स इति ॥ ॥ ३७ ॥ पूर्व० ॥

## कालस्तु स्यादचोदना ॥ ३८ ॥

कालस्त्वेष निर्द्दिश्यते, न वत्सोऽङ्गं विधीयते । नैषा चोदना। बर्हिषा वै पौर्णमासे व्रतमुपयन्ति । वत्सेनामावास्यायामिति । कथमवगम्यते । विधिनैकवाक्यत्वात् । परस्ताच्च विधिः समाम्नायते। पुरा वत्सानामुपाकर्त्तोर्दम्पती अश्नीयतामिति । यदि एषोऽपि विधिः स्याद्, वाक्यम्भिद्येत । अनुवादश्च तथाभूतस्यार्थस्य भवति । न च वत्साङ्गता अप्राप्ता । अप्राप्तस्तु कालः ॥ ३८ ॥ उत्तरम् ॥

## अनर्थकश्च कर्म्मसंयोगे ॥ ३९ ॥

न च शक्यो वत्सोऽत्र व्रतयितुम् । कर्मसंयोगे वत्सेन न अर्थः शक्यते कश्चित् कर्त्तुम् । तस्मादपि न वत्सोऽङ्गम् ॥ ३९ ॥

## अवचनाच्च स्वशब्दस्य ॥ ४० ॥

न च एतदुच्यते, विश्वस्य अर्पितं वत्सं व्रतयिष्यते इति । न चास्यार्थस्य स्वशब्दः श्रूयते । वत्स इत्याकृतिशब्दो मांसे न वर्त्तते। तस्माद् एष काल इति ॥ ४० ॥ युक्तिः ॥ बर्हिषेत्यादिश्रुतर्व्रतकाल-

विधानार्थताऽधिकरणम् ॥ १२ ॥

**कालश्चेत् सन्नयत्पक्षे तल्लिङ्गसंयोगात् ॥ ४१ ॥**

कालार्थः संयोग इत्येतत् समधिगतम् । इदानीं सन्देहः । किं सन्नयत्पक्षे एव कालः, उत असन्नयतोऽपीति । किं प्राप्तम् । सन्नयत्पक्षे । कुतः ? । एवं श्रूयते । पुरा वत्सानामपाकर्त्तोरिति । न चासन्नयतो वत्सापाकरणमस्ति । तस्मात् सयन्नत्पक्षे एव कालः । अपाकरणं लिङ्गमिति ॥ ४१ ॥ पूर्व० ॥

**कालार्थत्वाद्वोभयोः प्रतीयेत ॥ ४२ ॥**

वाशब्दः पक्षं व्यावर्त्तयति । न सन्नयत्पक्ष एव । असन्नयतोऽप्येष कालः स्यात् । कुतः । कालार्थत्वात् । न वत्सापाकरणेन व्रते किञ्चित् प्रयोजनमस्ति । कालेन तु प्रयोजनम् । येन च तत्र प्रयोजनं, स लक्ष्यते । कथं पुनर्वत्सापाकरणं कालार्थमिति । परार्थत्वात् । पयसे हि ते अपाक्रियन्ते । तथाहि दृष्टार्थता भवति । इतरथा अदृष्टार्थता स्यात् । तस्मान्नोपादेयत्वेन वत्सापाकरणं श्रूयते इति । यत्तूक्तं, तल्लिङ्गसंयोगात् सन्नयत्पक्षे एवेति । तन्न । असन्नयतोऽपि कालाहानात् । यस्यापि न सान्नाय्यं, तस्यापि वत्सापाकरणमेव न स्यात्, न तु वत्सापाकरणकालोऽपि । कालेन च नः प्रयोजनं, न वत्सापाकरणेन । यथा शङ्खवेलायामागन्तव्यमिति । यस्मिन्नपि ग्रामे शङ्खो न आधमायते तस्मिन्नपि स तथा कालोऽस्तीति, न आगमनं परिहास्यते । एवमिहाप्यसत्यपि वत्सापाकरणे तत्काले भिद्यमाने व्रतं तस्मिन् काले न परिहास्यते इति ॥ ४२ ॥ सिद्धान्तः ॥ बर्हिषेत्याद्युक्तकालस्य सन्नयदसन्नयदुभयसाधारणताधिकरणम् ॥ १३ ॥

**प्रस्तरे शाखा श्रयणवत् ॥ ४३ ॥**

दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति । तत्र श्रूयते । सह शाखया प्रस्तरं प्रहरतीति । तत्र सन्देहः । किं शाखा प्रस्तरस्याङ्गभूता, अङ्गप्रयोजनसम्बन्धस्तयोः । अथ कालार्थः संयोगः, प्रस्तरप्रहरणकाले शाखा प्रहर्त्तव्या ? इति । किं प्राप्तम् । प्रस्तरे शाखा श्रयणवत् । प्रस्तरस्याङ्गभूता शाखा । कुतः । सह शाखया प्रस्तरं प्रहरतीति । सहयुक्तेऽप्रधाने तृतीया विभक्तिर्भवति । सा च शाखायां तृतीया । तस्मात् प्रस्तरस्य शाखा गुणभूता । प्रस्तरे च द्वितीया । सहयोगे च

तृतीया । तृतीया गुणतो, द्वितीया प्रधानतः । ननु न शाखया प्रस्तरस्य कश्चिदुपकारः क्रियते । सत्यं न दृष्टं क्रियते. किन्तु अदृष्टं क्रियते। श्रयणवत् । यथा पयसा मैत्रावरुणं श्रीणातीति द्वितीया।तृतीया-संयोगाददृष्टश्चोपकारो गम्यते । एवमिहापीति ॥ ४३ ॥ पूर्व०

## कालविधिर्वोभयोर्विद्यमानत्वात् ॥ ४४ ॥

कालविधिर्वा स्यात् । कुतः । उभयोर्विद्यमानत्वात् । प्रस्तरस्तावत् स्रुग्धारणार्थः प्राप्तो विद्यते । तस्य प्रहरणमपि विशिष्टे काले वाक्यान्तरेण विहितम् । ततः शाखायाः प्रतिपादनार्थं, तस्यैतत् पुनर्वचनम् । उच्यते । भवतु प्रस्तरस्य पुनर्वचनम् । शाखा त्वत्र विधीयते इति । उच्यते । उभयोरपि विद्यमानत्वात् । शाखा पूर्वं विहिता वत्सापाकरणार्था । इदानीं पुनः किं गुणभूता चोद्यते, उत प्रतिपाद्यते इति । प्रतिपाद्यमानायां दृष्टं प्रयोजनम् । देशवियोगात् प्रचरितुमवकाशः स्यात् । या यावती च मात्रा, देशान्तरसंयोगस्य न दृष्टं किञ्चिदस्ति । तस्मात् प्रहरणं प्रतिपत्तिस्तस्याः । तस्मात् परतः प्रयोजनाभावात् कालनियमः क्रियते । ननु तृतीया अप्रधाने भवति, सा च शाखायाम् । अत्रोच्यते । या असौ शाखायां तृतीया, सा द्वितीयार्थे । या च प्रस्तरे द्वितीया, सा तृतीयार्थे । कथमवगम्यते । सहयोगे एकस्मिन् काले उभयमपि प्रहर्त्तव्यमिति । अत्र यस्य निर्ज्ञातः कालस्तस्यानुवादः । यस्य त्वनिर्ज्ञातस्तस्य विधिः । शाखायाश्च अनिर्ज्ञातः, प्रस्तरस्य निर्ज्ञातः । तस्य पुनरुच्चारणमनिर्ज्ञातार्थम् । तदप्रधानम् । इतरस्योच्चारणं प्रधानम् । प्राधान्यं च द्वितीयार्थः। तत्र तृतीया । पारार्थ्यमपि तृतीयार्थः। तत्र द्वितीया । तस्मादयथार्थं विभक्तिवचनम् ॥ ४४ ॥ सि० ॥

## अतत्संस्कारार्थत्वाच्च ॥ ४५ ॥

न च शाखया प्रस्तरस्योपकारो दृष्टः क्रियते । काष्ठं दह्यमानस्य तृणस्य नोपकारे वर्त्तते । तृणं तु काष्ठस्योपकुर्य्यात् । तस्मान्न शाखा प्रस्तरार्था ॥ ४५ ॥

## तस्माच्च विप्रयोगे स्यात् ॥ ४६ ॥

किं भवति प्रयोजनम् । यदि प्रस्तरस्य गुणभूता, तथापि प्रस्तरप्रहारकाले शाखा प्रतिपाद्यते इति । उच्यते । यदि प्रस्तरस्य प्रद्वि-

यमाणस्याङ्गभूता शाखा, ततो विना प्रस्तरेण, न प्रहर्त्तव्या भवति । अथाङ्गभूता, विनापि प्रस्तरेण प्रहर्त्तव्या । अस्माभिरुक्तं प्रस्तरकाले प्रहर्त्तव्या इति । तस्माच्च विप्रयोगे स्यात् तस्मादेव कारणात् प्रस्तर-विप्रयोगेऽपि शाखायाः प्रहरणं स्यादिति ॥ ४६ ॥ युक्तिः ॥

## उपवेषश्च पक्षे स्यात् ॥ ४७ ॥

यथा पूर्वः पक्षः । तथा सति, सान्नाय्ये सति असति च शाखा विद्यते इति उपवेषः सति च असति च स्यात् । यथा तु सिद्धान्तः, तथा सान्नाय्यपक्षे शाखा सती हि प्रतिपाद्यत इति । तत्रैवोपवेषो नान्यत्रेति ॥ ४७ ॥ ॥ पूर्व० ॥ सहशाखयेत्यस्य कालविधानार्थताऽधिकरणम् ॥ १४ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्य चतुर्थः पादः ॥ ६ ॥ ४ ॥

### अथ षष्ठे अध्याये पञ्चमः पादः ॥ ६ ॥ ५ ॥

## अभ्युदये कालापराधादिज्याचोदना स्याद् यथा पञ्चशरावे ॥ १ ॥

इदमामनन्ति, वि वा एवं प्रजया पशुभिर्द्धयति, वर्द्धयत्यस्य भ्रातृव्यं, यस्य हविर्निरुप्तं पुरस्ताच्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेद्, ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत्, ये स्थविष्ठास्तान् इन्द्राय प्रदात्रे दध्नश्चरुं, ये क्षोदिष्ठास्तान् विष्णवे शिपिविष्टाय शृते चरुमिति । तत्र सन्देहः । किं कालापराधे यागान्तरमिदं चोद्यते, उत तेष्वेव प्रकृतेषु कर्मसु निमित्ते देवतापनय इति ॥ किं प्राप्तम् । अभ्युदये यः कालापराधस्तत्रेज्याचोदना स्यात् । कथम् । पुरोडाशमग्नये दात्रे मध्यमान् कुर्व्वते, ये स्थविष्ठाः तान् इन्द्राय प्रदात्रे दधनि चरुं कुर्य्यात्, क्षोदिष्ठान् विष्णवे शिपिविष्टायेति । यजतिस्तु फलभोक्तृसंयोगादिति विधानं गम्यते । यथा पञ्चशरावे द्रव्यदेवतासम्बन्धेन कर्मान्तरं गम्यते । यथा पशुकामेष्ट्यां, यः पशुकामः स्यात् सोऽमावास्यायामिष्ट्वा वत्सानपाकुर्य्यात्, ये स्थविष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेत्, ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुम्, येऽणिष्ठास्तानिन्द्राय प्रदात्रे दध्नश्चरुमिति । एवमिहापीति । अपि च न प्रकृते द्रव्ये देवता श्रूयते । शृते चरुमिति हि तत्र भवति वचनम् । न च अभ्युदयकाले श्रपणं कृतमस्ति ।

तस्मात् कर्मान्तरम् ॥ १ ॥ पूर्व० ॥

## अपनयो वा विद्यमानत्वात् ॥ २ ॥

देवतापनयो वा । कुतः । विद्यमानत्वात् । विद्यन्ते हि कर्माणि प्रकृतानि । तेषु विद्यमानेषु पुनर्देवतासम्बन्धो हविषो नोपपद्यते । यस्यानुपपत्त्या यागः कल्प्येत । तस्मान्न यागान्तरम् । तेष्वेव हविःषु देवतान्तराणि विधीयन्ते ॥ २ ॥ सि० ॥

## तद्रूपत्वाच्च शब्दानाम् ॥ ३ ॥

देवतापनयसरूपाश्चामी शब्दा भवन्ति । ये मध्यमास्तेषां देवतान्तरं विधीयते । तत्र द्रव्यं प्राप्तम् । अप्राप्ता देवता विधीयते । कथं पुनर्देवताविधानार्थे नानेकगुणविधानदोषो जायेत ? इति । उच्यते । नैवात्रानेको गुणो विधीयते कस्मिँश्चिद् वाक्ये । तण्डुलान् विभजेदित्यत्र तावद् विभागमात्रं विधीयते । अन्यत् सर्वमनूद्यते । तस्माद् अदोषः । ये मध्यमास्तेषामग्निर्देवता विधीयते, अन्यत् पुरोडाशादि अनूद्यते । ये स्थविष्ठास्तेषां दधिसहितानामिन्द्रो देवताऽस्मिन् वाक्ये विधीयते । तत्रार्थप्राप्ते श्रपणे सति चरुता, सह सप्तम्यर्थेन अर्थप्राप्तेनैवास्मिन् वाक्येऽनूद्यते । ये क्षोदिष्ठास्तेषां शृतसहितानां विष्णुः शिपिविष्टो देवता विधीयते, अन्यत् सर्वमनूद्यते । तस्माद् अदोषः ॥ ३ ॥

## आतञ्चनाभ्यासस्य दर्शनात् ॥ ४ ॥

आतञ्चनाभ्यासश्च दर्शयति । कथम् । एवं श्रूयते–यदि बिभीयादभिमोदेष्यतीति महारात्रे हर्वींषि निर्वपेत् । फलीकृतैस्तण्डुलैरुपासीत । अर्द्धं दधि हविरातञ्चनार्थं निदध्यात् । अर्द्धं न । यद्यभ्युदियात् अनेनातच्य प्रचरेत् । यद्यु न । ब्राह्मणं भोजयेदिति । यदि कर्म्मान्तरमुपादेयत्वेन तदा तण्डुला दधि शृतं च । तस्माल्लौकिकानि उपादेयानि । न ह्येष तदा प्रकृतानां व्यापारः । तत्राविनष्टे दधनि अपरेद्युरामावास्ये क्रियमाणे विद्यते दधीति न आतञ्चनमावर्त्तेत । तस्यामेवाभ्युदितेष्टौ दधि विद्यते इति नातञ्चनं स्यात् । अथ निमित्ते देवतापनयस्ततस्तस्मिन् दधनि चरुः कृत इति । पुनरामावास्ये दोहे आतञ्चनेन कार्य्यम् । एवमातञ्चनाभ्यासस्य दर्शनं देवताविधाने युज्यते इति ॥ ४ ॥ युक्तिः ॥

## अपूर्वत्वाद्विधानं स्यात् ॥ ५ ॥

अथ यदुक्तं, यथा पशुकामेष्ट्यां कर्म्मान्तरं, यः पशुकामः स्यात्, सोऽमावास्यामिष्ट्वा वत्सानपाकुर्य्यादिति । तत् परिहर्त्तव्यम् । तत्रोच्यते । युक्तं, यत् तत्र कर्म्मान्तरविधानम् । कुतः । अपूर्वत्वान्न तत्र कश्चित् पूर्वप्राप्तो यागो विद्यते । सोऽमावास्यामिष्ट्वेति हि परिसमाप्ते तस्मिन्निदमारभ्यते तत्र द्रव्यदेवतासंयुक्तो निर्वपतिशब्दो नान्तरेणोत्सर्गं, द्रव्यदेवतयोः सम्बन्धो विद्यते इति यजातिं गमयति । नत्विह एवम् । इह हि यागः प्रकृतो गम्यते । तस्मिन्नेव विद्यमानस्य द्रव्यस्य देवतासम्बन्धमात्रं विधीयते इति न दोषो भवति ॥ ५ ॥

## पयोदोषात् पञ्चशरावेऽदुष्टं हीतरत् ॥ ६ ॥

अथ यदुपवर्णितं, यथा पञ्चशरावे कर्म्मान्तरं विधीयते, एवमिहापीति । तत् परिहर्त्तव्यमिति । अत्रोच्यते । युक्तं पञ्चशरावे कर्म्मान्तरम् । दुष्टं हि तत्र द्रव्यम् । यस्य देवता विधीयते तत्रावश्यं द्रव्यमुपादेयत्वेन चोदयितव्यम् । तस्मिन्नुपादीयमाने देवतान्तरे चापूर्वः सम्बन्धो विधीयते, तद् यागान्तरं भवतीति । इतरदिह द्रव्यमदुष्टम् । तदनूद्य प्रकृते यागे देवता विधीयत इत्युक्तम् । तस्माद् अदोष इति ॥ ६ ॥ आ० नि० ॥

## सान्नाय्येऽपि तथेति चेत् ॥ ७ ॥

एवं चेत् पश्यसि, सान्नाय्येऽपि दोषः । तदपि हि अभ्युदये तत्कालापभ्रंशाद् दुष्टमिति ॥ ७ ॥ आ० ॥

## न तस्यादुष्टत्वादविशिष्टं हि कारणम् ॥ ८ ॥

नैतदेवम् । पञ्चशरावे हि दुष्टं द्रव्यम् । इह तादृशमेवावतिष्ठते । ननु कालापभ्रंशेन दुष्टम् । न दुष्यति । अविशिष्टं हि कारणम् । अभ्युदये प्रायश्चित्तविधानं दुष्टेऽप्युपपद्यते । कालापराधे अदुष्टेऽपि तत्।अकाले हि अभिप्रवृत्तस्य शक्यते देवताविधानं, न तु विनष्टस्य ॥ ८

## लक्षणार्था शृतश्रुतिः ॥ ९ ॥

अथ यदुक्तं, न प्रकृते द्रव्ये देवता श्रूयते, शृते चरुमिति । तत्र भवति वचनम् । न चाभ्युदयकाले श्रपणं कृतमस्तीति । तत् परिहर्त्तव्यम् । अत्रोच्यते । लक्षणार्था इयं शृतश्रुतिः । धर्मलक्षणार्था शृते ।

श्रृतसहचरितधर्मक इति ॥ ९ ॥ आ० नि० ॥ दर्शेऽभ्युदयेष्टौ नैमि-त्तिकदेवताऽपनयाधिकरणम् ॥ १ ॥

### उपांशुयाजेऽवचनात् यथाप्रकृति ॥ १० ॥

तस्मिन्नेवाभ्युदये संशयः । किमुपांशुयागेऽपि देवतापनयो भवे-त्, न ? इति । किं प्राप्तम् । उपांशुयाजी यथाप्रकृति स्यात् । कस्मात् । अवचनात् । यथा अमीषु वचनं, मध्यमानामग्नये दात्रे पुरोडाशाः, स्थविष्ठानाम् इन्द्राय प्रदात्रे दधनि चरुः, क्षोदिष्ठानां विष्णवे शिपि-विष्टाय श्रृते चरुरिति । नैतदुपांशुयाजेऽस्ति । तस्मात् स यथादेवतं स्यात् ॥ १० ॥ पूर्व० ॥

### अपनयो वा प्रवृत्त्या यथेतरेषाम् ॥ ११ ॥

वाशब्दः पक्षं व्यावर्त्तयति । उपांशुयाजस्यापनयः । केन कारणेन। प्रवृत्त्या। अकाले तन्त्रप्रवृत्तिर्देवतापनयस्य कारणम् । कुतः । न हि अत्र अभ्युदये सति तण्डुला विभागार्थमुपादीयन्ते । किं तर्हि। अभ्युदितस्य हविषो विभाग उच्यते । अभ्युदयेनापराह्णस्येति । कथ-मवगम्यते । यस्य अभ्युदियादितिविशेषश्रवणात् । सर्वस्यैव हि अप-राधेन अभ्युदेति, अपराधश्च अकाले तन्त्रप्रवृत्तिः । एवञ्च सति न तद्धविस्तण्डुलैः शक्यं विशेष्टुम् । तस्मादुपांशुयागस्यापि विभागः। त्रेधा तण्डुलान् विभजेदिति हि अनेन वाक्येन देवतापनयः क्रियते। विधिर्हि अत्र, विभजेदिति । विभागं कुर्यादित्यर्थः । कथमिति । वि-भागे विशेषपराण्युत्तराणि वाक्यानि । इदमिदं च द्रव्यमस्यै देवता-यै, इदमिदं चास्यै इति । यस्य द्रव्यस्य विशेषविभागो नास्ति, त-स्यापि विभजेदिति सामान्यविभागः । तस्माद् यथैवेतरेषां विभागः, एवमुपांशुयाजस्यापीति । अथवा उपांशुयाजद्रव्यात् पूर्वेण वाक्येन अपनीता, न देवता । तदपरेण वाक्येन देवतान्तरे संयोजितम् । तस्मात् प्रहीणमेव तत् ॥ ११ ॥ सिद्धान्तः ॥ उपांशुयागेऽपि देवता-पनयाधिकरणम् ॥ २ ॥

### निरुप्ते स्यात् तत्संयोगात् ॥ १२ ॥

अस्मिन्नेवोदाहरणे संशयः । किं यदि निरुप्तेऽभ्युदयोऽवगम्यते, तदाऽभ्युदितेष्टिः ? उत अनिरुप्तेऽपीति । किं प्राप्तम् । निरुप्तेऽवगते अभ्युदितेष्टिः स्यात् । कुतः । तत्संयोगात् । निर्वापसंयोगो हि भवति।

यस्य हविर्निरुप्तमिति । तस्मादनिरुप्ते नैतद्विधानमिति ॥१२॥ पूर्व० ॥

## प्रवृत्ते वा प्रापणान्निमित्तस्य ॥ १३ ॥

वा-शब्दः पक्षं व्यावर्त्तयति । अकाले तन्त्रप्रवृत्तिमात्रे स्यादेतद्विधानम् । प्राप्तं हि तावत्येव निमित्तं, यस्य हविरभ्युदेतीति हविर्ग्रहणं लक्षणत्वेन । यस्य हविरभ्युदेतीति हविर्लक्षित उदयो निमित्तं प्रवृत्तं हविर्लक्षयति, नोदासीनम् । तस्माद् हविरभ्युदेतीत्युच्यमाने प्रवृत्तं हविरभ्युदेतीति गम्यते । न हि तद् निरुप्तमित्येतेन शक्यं विशेषयितुम् । भिद्येत हि तदा वाक्यम् । यस्य हविर्निरुप्तं, न अनिरुप्तमित्येवमपेक्ष्यमाणे हविरभ्युदेतीति न शक्यते विधातुम् । तस्मादनिरुप्तेऽपीष्टिरिति ॥ १३ ॥ सि० ॥

## लक्षणमात्रमितरत् ॥ १४ ॥

अथ यदुक्तं, निरुप्तसंयोगो भवति । यस्य हविर्निरुप्तमिति । लक्षणमात्रमेतद् निरुप्तमिति । कस्मिँश्चित् पदार्थे तस्य प्रवृत्ते इत्यर्थः ॥ ॥ १४ ॥ आ० नि० ॥

## तथा चान्यार्थदर्शनम् ॥ १५ ॥

अन्यार्थोऽपि चैतमर्थं दर्शयति, स यद्यगृहीतं हविरभ्युदियात्, प्रज्ञातमेव । तदेषा व्रतचर्य्या । यत् पूर्वेद्युर्दुग्धं दधि हविरातञ्चनं तत् कुर्वन्ति, प्रतिमुञ्चन्ति वत्सान्, तानेव तत् पुनरपाकुर्वन्ति, तानऽपराह्णे पर्णशाखया अपाकरोति । तद् यथैवादः प्रज्ञातमामावास्यं हविरेवमेव तद् यद्यु व्रतचर्य्यां वा नोदाशंसेत, गृहीतं वा हविरभ्युदियादितरथा तर्हि कुर्य्यात्, एतानेव तण्डुलान् सक्तूफलीकृतानिति, अगृहीते हविषि अन्यं विधिं ब्रुवन् गृहीतेऽप्यनिरुप्ते वाऽभ्युदये प्रायश्चित्तं दर्शयति ॥१५॥ युक्तिः॥अनिरुप्तेऽप्यभ्युदयेष्टयधिकरणम्॥३॥

## अनिरुप्तेऽभ्युदिते प्राकृतीभ्यो निर्वपेदित्याश्मरथ्यस्तण्डुलभूतेष्वपनयात् ॥ १६ ॥

प्रवृत्तमात्रं निमित्तमिति स्थितम् । नैमित्तिकस्तु देवतापनयो देवतान्तरसंयोगश्च । किं निर्वापोत्तरकालं तण्डुलावस्थे हविषि कर्त्तव्यो निर्वापस्तु प्राकृतीभ्य एव स्यात्, ज्ञातेऽभ्युदये ? उत वैकृतीभ्य एवेति संशयः । किं तावत् प्राप्तम् । अनिरुप्तेऽभ्युदिते प्राकृतीभ्यो निर्वपेदित्याश्मरथ्य आचार्य्यो मन्यते स्म । कुतः । तण्डुलभूतेषु

अपनयात् । तण्डुलभूतेषु अपनयः श्रूयते । यस्य हविर्निरुप्तं पुरस्ता-च्चन्द्रमा अभ्युदेति त्रेधा तण्डुलान् विभजेदित्यभ्युदयावगमादनन्तरं तण्डुलविभागमाह । सोऽतण्डुलभूतेषु नावकल्पते । तस्मादऽनिरुप्ते तण्डुलाभावादनपनीता देवताः प्राकृत्य इति प्राकृतीभ्य एव निर्वपेदिति ॥ १६ ॥

व्यूर्ध्वभाग्भ्यस्त्वालेखनस्तत्कारित्वाद्देवतापनयस्य॥१७॥

तुशब्दः पक्षं व्यावर्त्तयति । व्यूर्ध्वं या भजन्ते कर्म्म, ताभ्यो निर्वपेदिति आलेखनः–आचार्य्यो मन्यते स्म । कुतः । तत्कारित्वाद् देवतापनयस्य । यस्मादकाले तन्त्रप्रवृत्तिकारितो देवतापनयस्तस्मादपनीता देवतेति व्यूर्ध्वभाग्भ्यो निर्वप्तव्याः ॥ १७ ॥ सिद्धान्तः ॥ अनिरुप्तेऽभ्युदये वैकृतीभ्यो निर्वापाधिकरणम् ॥ ४ ॥

विनिरुप्ते न मुष्टीनामपनयस्तद्गुणत्वात् ॥ १८ ॥

अथ प्रारब्धे चतुर्मुष्टिनिर्वापे अपरिसमाप्ते भवति संशयः–यन्निरुप्तं तन्निरुप्तमेव, अवशिष्टं किं प्राकृतीभ्यो निर्वप्तव्यं, किं वैकृतीभ्यः, उत तूष्णीमेवेति । किं प्राप्तम् । विनिरुप्ते सामिनिरुप्ते इत्यर्थः । न तत्र देवतापनयः स्यात् । कुतः । तद्गुणत्वात् । निर्वापस्य गुणो देवता, न मुष्टीनाम् । स च निर्वापस्तद्देवताकः । कुतः । चतुःसङ्ख्यापूरणार्थत्वाद् अभ्यासमात्रं कर्त्तव्यम् । तच्चाभ्यासमात्रं पुनः क्रियते, पूर्वमेव कृते तस्मिन्निर्वापे न देवता अपनीता । स एवायं पुनः क्रियते । पुनरपि क्रियमाणस्य अनपनीतैव देवता भवितुमर्हतीति प्राकृतीभ्य एव निर्वप्तव्यम् । न चोत्तरो मुष्टिः पृथक् पदार्थो, येन देवताऽपनयो भवेत् । कृतस्य निर्वापस्य सङ्ख्यापूरणमेतत् क्रियते । तस्मादनपनय इति ॥ १८ ॥

अप्राकृतेन हि संयोगस्तत्स्थानीयत्वात् ॥ १९ ॥

न प्राकृतीभ्यो निर्वप्तव्यम् । काभ्यस्तर्हि । वैकृतीभ्यः । कुतः । अप्राकृतेन देवताविशेषेण संयोगः श्रूयते, नाऽधिकृतेन । त्रेधा तण्डुलान् विभजेदिति प्राकृतीभ्य आच्छिद्य वैकृतीभ्यो निर्वप्तव्यो विधीयते । ता इदानीं तत्स्थानीयाः । तस्माद् विनिरुप्ते निवृत्ता देवता अन्याः, अन्याश्चोपजाताः । तस्माद् वैकृतीनां संयोगेन निर्वापशेषः कर्त्तव्य इति ॥ १९ ॥ पूर्व० ॥

## अभावाच्चेतरस्य स्यात् ॥ २० ॥

अभावादितरस्यार्द्धस्य देवतासंयुक्तस्य, न निर्वापो भवति देवतासंयुक्तः । यदि निर्वापोऽर्द्धम् अन्यदेवत्योऽर्द्धोऽप्यन्यस्यै देवतायै, नैव निर्वाप इतरदेवताको वा इतरदेवताको वा । तस्मात् तूष्णीमेव निर्वप्तव्यम् । अवश्यमन्यतरत्र सङ्कल्पभेदो भवति ॥ २० ॥ सिद्धान्तः ॥ किञ्चिन्निरुप्तेऽभ्युदयेऽवशिष्टस्य तूष्णीं निर्वापाधिकरणम् ॥ ५॥

## सान्नाय्यसंयोगान्नासन्नयतः स्यात् ॥ २१ ॥

अभ्युदितेष्टिरेवोदाहरणम् । तत्र श्रूयते, दधनि चरुम्, शृते चरुमिति । तत्र सन्देहः । किं सन्नयतो भवति अभ्युदये प्रायश्चित्तम्, उत अविशेषेणेति । किं प्राप्तम् । सन्नयतः अभ्युदये प्रायश्चित्तम् । कुतः । सान्नाय्यसंयोगात् । सान्नाय्यसंयोगो हि भवति । शृते चरुम्, दधनि चरुमिति । शृताद्यभावान्नासन्नयतो भवितुमर्हति । वैगुण्यं हि तथा स्यात् ॥ २१ ॥ पूर्व० ॥

## औषधसंयोगाद्वोभयोः ॥ २२ ॥

वाशब्दः पक्षं व्यावर्त्तयति । उभयोरपि स्यात् । न केवलस्य सन्नयतः । औषधसंयोगात् । ये मध्यमा ये स्थविष्ठा ये क्षोदिष्ठा इति भवति औषधसंयोगः । स च शक्योऽसन्नयताऽपीति । तस्मान्नासति कारणेऽसन्नयतो निवर्त्तेत । उभयोरपि पक्षयोः प्रायश्चितमिति ॥२२॥

## वैगुण्यान्नेति चेत् ॥ २३ ॥

इति यदुक्तम्, असन्नयतो दध्नः शृतस्य चाभावात्तदधिकरणता नास्ति।तस्माद्वैगुण्यं तस्मिन् पक्षे इति।तत् परिहर्त्तव्यमिति ॥ २३ ॥ आ०

## नातत्संस्कारत्वात् ॥ २४ ॥

नैतदेवम् । न हि दधि अधिकरणञ्चरोः श्रपणे श्रूयते । किन्तु यथा स्थविष्ठा इन्द्राय प्रदात्रे, एवं दध्यपि देवतासम्बन्धार्थं विधीयते, न चरुसम्बन्धार्थमिति । भिद्येत हि तथा वाक्यं, स्थविष्ठा देवतायै, दधनि च ते कर्त्तव्या इति । सप्तमीसंयोगस्तु प्राप्तेऽर्थेऽनुवादः । तस्मादविवक्षितं तेषां साहित्यम् । लक्षणत्वेन हि ते श्रूयन्ते इति । न हि पयो दधि च नास्तीति स्थविष्ठानां न देवतापनयो भवति । असन्नयतोऽप्यर्थाद् आप्सु श्रपयिष्यते इति ॥ २४ ॥ आ० नि० ॥ सन्न-

यदसन्नयदुभयस्यैवाभ्युदये प्रायश्चित्ताधिकरणम् ॥ ६ ॥

## साभ्युत्थाने विश्वजित् क्रीते विभागसंयोगात् ॥ २५ ॥

इदमामनन्ति, यदि सत्राय दीक्षिता अथ साभ्युत्तिष्ठेरन्, सोममपभज्य विश्वजिता अतिरात्रेण सर्वस्तोमेन सर्वपृष्ठेन सर्ववेदसदक्षिणेन यजेरन्निति। तत्र सन्देहः। किं क्रीतराजकस्योत्थाने विश्वजिद्, उत प्रवृत्तमात्रस्येति। किं प्राप्तम्। साभ्युत्थाने विश्वजित् क्रीते स्यात्। कुतः। विभागसंयोगात्। सोममपभज्य विश्वजिता यजेरन्निति। ये हि अक्रीते राजनि उत्तिष्ठन्ति, तेषां सोमविभागाभावाद् वैगुण्यं स्यात्। तस्मात् क्रीतराजका उत्तिष्ठन्तो विश्वजितं कुर्य्युः ॥ २५ ॥ पूर्व० ॥

## प्रवृत्ते वा प्रापणान्निमित्तस्य ॥ २६ ॥

वाशब्दः पक्षं व्यावर्त्तयति। प्रवृत्तमात्रस्योत्थाने स्यात्। कुतः। प्रापणान्निमित्तस्य। साभ्युत्थानं निमित्तं विश्वजितः। तच्च प्राप्तम्। न च तच्छक्यं विशेषयितुम्। क्रीते सोमे साभ्युत्थानमिति ॥२६॥ सि०

## आदेशार्थेतरा श्रुतिः ॥ २७ ॥

अथ यदुक्तम्, अक्रीते राजन्युत्तिष्ठन्तो विभागाभावाद् विगुणं कुर्य्युरिति। तत् परिहर्त्तव्यम्। अत्रोच्यते। न विभागो विधीयते। भिद्येत हि तथा वाक्यम्। साभ्युत्थाने विश्वजिता यजेरन्, सोमस्य तु अपभागं कृत्वेति। तेन अपभज्य इति अनुवादः। कथं प्राप्तिरिति चेत्। अर्थादुत्तिष्ठतां विभागो भवति धनस्य। सोऽयं सर्वद्रव्याणां विभागः सोमविभागेन लक्ष्यते। सोमं विभज्यान्यानि च द्रव्याणीति आदेशार्था इतरा श्रुतिर्भवति। तस्मात् क्रीते च अक्रीते च राजनि उत्तिष्ठतां विश्वजिदिति ॥ २७ ॥ आ०नि० ॥ सत्राय प्रवृत्तमात्रस्य विश्वजिदधिकरणम् ॥ ७ ॥

## दीक्षापरिमाणे यथाकाम्यविशेषात् ॥ २८ ॥

ज्योतिष्टोमं प्रकृत्य श्रूयते, एका दीक्षा तिस्र उपसदः पञ्चमीं प्रसुत इति। तिस्रो दीक्षाः, द्वादश दीक्षा इति बहूनि दीक्षापरिमाणानि आम्नातानि। तेषु सन्देहः। किमनियमो, यद्वा तद्वा परिमाणमुपादेयम्? उत द्वादशदीक्षा इति। किं प्राप्तम्। दीक्षापरिमाणे यथाकामी स्यात्। नास्ति नियमः। कुतः। अविशेषात्। न कश्चन

विशेष उपादीयते । तस्माद् यत्किञ्चित् परिमाणमुपादेयमिति ॥ ॥ २८ ॥ पूर्व० ॥

## द्वादशाहस्तु लिङ्गात् स्यात् ॥ २९ ॥

द्वादशाह एव परिमाणमुपादीयेत । कुतः । लिङ्गात् सामर्थ्यादित्यर्थः । किं सामर्थ्यम् । द्वादशरात्रीर्दीक्षितो भृतिं वन्वीतेति नित्यवदाम्नायते, न पाक्षिकम् । तदेव नित्यं कुर्वन्न शक्नोत्यन्यत्परिमाणमुपादातुम् । तस्माद् द्वादशाह एव परिमाणं नियम्येत । अन्यानि परिमाणानि विकृतौ भविष्यन्तीति नैषामानर्थक्यमिति ॥ २९ ॥ ॥ सिद्धान्तः ॥ दीक्षापरिमाणस्य द्वादशाहत्वनियमाधिकरणम् ॥ ८ ॥

## पौर्णमास्यामनियमोऽविशेषात् ॥ ३० ॥

गवामयने श्रूयते, पुरस्तात् पौर्णमास्याश्चतुरहे दीक्षेरन्निति । तत्र सन्देहः । कस्याः पौर्णमास्या इति । किं प्राप्तम् । पौर्णमास्यामनियम इति । कुतः । अविशेषात् । नात्र कश्चिद् विशेषवचनः शब्द उपादीयते ॥ ३० ॥

## आनन्तर्यात्तु चैत्री स्यात् ॥ ३१ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैतद्, अनियम इति । चैत्री, पौर्णमासी तु भवेत् । कुतः । आनन्तर्यात् । पौर्णमासीमुक्त्वाऽनन्तरं वाक्यशेषे चैत्री सङ्कीर्त्यते । पुरस्तात् पौर्णमास्याश्चतुरहे दीक्षेरन् । ऋतुमुखं वा एषा पौर्णमासी संवत्सरस्य, या चैत्री पौर्णमासीति । अत्र, सन्दिग्धेषु वाक्यशेषाद् इति चैत्री नियम्येत ॥ ३१ ॥

## माघी वैकाष्टकाश्रुतेः ॥ ३२ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति चैत्री इति । किं तर्हि माघी इति । कुतः । एकाष्टकाश्रुतेः । क्रये हि एकाष्टकाश्रुतिर्भवति । तेषामेकाष्टकायां क्रयः सम्पद्यते इति । तस्मान्माघ्याः पुरस्ताच्चतुरहे दीक्षितस्यैकाष्टकायां क्रयः शक्यते कर्त्तुं, न चैत्र्याः । तदेतत् सामर्थ्यं नाम लिङ्गम् । तद् वाक्यस्य बाधकं भवति । तस्मान्माघी पौर्णमासीति ॥ ३२ ॥ सि० ॥

## अन्या अपीति चेत् ॥ ३३ ॥

इतिचेत् पश्यसि, माघी पौर्णमासी, एवमेकाष्टकायां क्रयः सम्पत्स्यते इति । तद् न । असर्वा अष्टस्य एकाष्टकाः, द्वादश एकाष्टका

इति । तेन न दोषः ॥ ३३ ॥ आ० ॥

## न भक्तित्वादेषा हि लोके ॥ ३४ ॥

नैतदेवं, भाक्तो हि अन्यासु अष्टमीषु एकाष्टकाशब्दः ? एषा हि मुख्या । या माघ्यां वृत्तायाम् ? मुख्यगौणयोश्च मुख्ये सम्प्रत्ययः ? तस्मान्माघ्येव पौर्णमासीति ॥ ३४ ॥ आ० नि० ॥

## दीक्षापराधे चानुग्रहात् ॥ ३५ ॥

एकाष्टकायां दीक्षेरन् । एषा वै संवत्सरस्य पत्नी, यदेकाष्टका इत्युक्त्वा पुनः, चतुरहे पुरस्तात् पौर्णमास्या दीक्षां विधाय तेषामेकाऽष्टकायां क्रयः सम्पद्यते । तेनैकाष्टकां नच्छंवट् कुर्वन्तीति, दीक्षातः प्रच्युतामेकाष्टकां क्रयेण तु गृह्णन् माघ्याः पौर्णमास्या अधिकारं दर्शयति । अस्याश्च माघ्यामष्टम्यामभीज्यमानायां भवति मन्त्रः । यां जनाः प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम् * संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली इति । अष्टकायै सुराधसे स्वाहा इति । याऽसौ माघ्यष्टमी, तामेकाष्टकां दर्शयति ॥ ३५ ॥ पूर्व० ॥

## उत्थाने चानुप्ररोहात् ॥ ३६ ॥

उत्थाने चानुप्ररोहं दर्शयति । तानुत्तिष्ठत औषधयो वनस्पतयोऽनूत्तिष्ठन्तीति वसन्ते उत्थानं दर्शयति । तस्मिन् औषधयो वनस्पतयश्चोत्तिष्ठन्ति । तस्मादपि सा नियम्यते ॥ ३६ ॥

## अस्यां च सर्वलिङ्गानि ॥ ३७ ॥

आर्त्तं वा एते संवत्सरस्याभिदीक्षन्ते, य एकाष्टकायां दीक्षन्ते इति । आर्त्ता यस्मिन् काले भवन्ति, स आर्त्तः कालः । शीतेन च आर्त्ता भवन्ति । तस्मान्माघ्यष्टमी एकाष्टका इति । तथा, व्यस्तं वा एते संवत्सरस्याभिदीक्षन्ते, य एकाष्टकायां दीक्षन्ते इति । अयनपरिवृत्तिर्व्यस्तशब्देनोच्यते । तथा अपो नाभिनन्दन्तोऽवभृथमभ्यवयन्ति इति चैत्र्यां दीक्षिता अभिनन्दन्तोऽभ्यवेयुः । तस्मादपि माघी पौर्णमासीति ॥ ३७ ॥ युक्तिः ॥ गवामयने माघपौर्णमास्या पुरस्ताद्दीक्षाऽधिकरणम् ॥ ९ ॥

## दीक्षाकालस्य शिष्टत्वादतिक्रमे नियतानामऽनुत्कर्षः प्राप्तकालत्वात् ॥ ३८ ॥

इदं श्रूयते, तस्माद्दीक्षितो न ददाति न पचति न जुहोतीति ज्योतिष्टोमे समामनन्ति । यदि तु दैवान्मानुषाद् वा प्रतिबलाद्दीक्षाकाल उत्कृष्यते, तत्र सन्देहः । किं दानहोमपाकानामुत्कर्षः ? उत नेति । किं प्राप्तम् । अनुत्कर्षः । नियता हि दान-होम-पाकाः । यावज्जीवमग्निहोत्रं जुहोतीत्येवमादिभिः श्रुतिभिस्तेषाम् अपवादो, येषु अहःसु साङ्गो ज्योतिष्टोमो विहितस्तावन्ति अहानि मुक्त्वा अन्येषु अहस्सु कर्त्तव्याः, ज्योतिष्टोमविधानकालात् परतोऽप्रतिषिद्धाः । तस्मात् कर्त्तव्याः । प्राप्तो हि तेषां काल इति ॥ ३८ ॥

## उत्कर्षो वा दीक्षितत्वादविशिष्टं हि कारणम् ॥ ३९ ॥

वा शब्दात् पक्षो विपरिवर्त्तते । यदुक्तम्, नैषामुत्कर्ष इति । नैतदेवम् । उत्कृष्टव्याः । कुतः । दीक्षितत्वात् । दीक्षितस्य ते प्रतिषिद्धाः, न दीक्षितो यस्मिन् काले । लक्षणा हि एवं स्यात् । यथा तु वयं ब्रूमस्तथा श्रुतिः कारणम् । प्राक् चावभृथाद् अयं दीक्षित एव । अविशिष्टं हि कारणम् । यदेव ज्योतिष्टोमविधानकाले, तदेव अतिक्रान्तेऽपि । उभयत्र हि दीक्षितत्वं हि कारणम् । तस्मात् तेषामुत्कर्ष इति ॥३९॥ सिद्धान्तः ॥ दीक्षोत्कर्षे तन्नियमानामप्युत्कर्षाधिकरणम् ॥१०॥

## तत्र प्रतिहोमो न विद्यते यथा पूर्वेषाम् ॥ ४० ॥

तत्रोत्कृष्यमाणे ज्योतिष्टोमे, अकृतेषु होमेषु किं परिसङ्ख्याय होमाः कर्त्तव्याः, उत नेति । किं प्राप्तम् । परिसङ्ख्याय होमाः क्रियेरन् । किं कारणम् । अवश्यकर्त्तव्यतया हि ते विहिता होमाः । अतिपन्ना अपि कर्त्तव्या एव । तथाहि एषामवश्यकर्त्तव्यताऽनुगृहीता भविष्यति । प्रधानमात्रं तु नियतं, नात्र कालानुरोधः कर्त्तव्यः । नदीवेगस्थानीयत्वात् । यद्यपि अतिक्रान्ताः कालाः । अतिक्रान्तानां परिसङ्ख्याय प्रधानमात्राणि कर्त्तव्यानि । यथा अवश्यकर्त्तव्यं भुक्तिभूतकदानादि, यदतिक्रान्तं भवति, तत् परिसङ्ख्याय क्रियते, एवमिदमपीति ॥ एवं प्राप्ते ब्रूमः । तत्र प्रतिहोमो न विद्यते । यथा पूर्वेषाम् । कर्त्तव्यमकृत्वा कुर्य्याद्, नाऽकर्त्तव्यम् । अकर्त्तव्याश्चैते । प्रतिषिद्धत्वात् । यथा पूर्वेषामसति कालातिक्रमे अकृतानां न प्रतिहोमः । एवमेषामपीति ॥ ४० ॥

## कालप्राधान्याच्च ॥ ४१ ॥

कालप्राधान्यं च भवति । निमित्तत्वेन तस्य श्रुतत्वात् । तदभावे विहितमेव न भवति । प्रधानमात्रं यद्यपि नियम्येत, तथापि निमित्ते काले । स च नदीवेगस्थानीयः कालोऽतिक्रान्तः । अतो न प्रतिहोमः कर्त्तव्य इति ॥ ४१ ॥ युक्तिः ॥ ज्योतिष्टोमोत्कर्षे प्रतिहोमाननुष्ठानाऽधिकरणम् ॥ ११ ॥

## प्रतिषेधाच्चोर्ध्वमवभृथादिष्टेः ॥ ४२ ॥

ऊर्ध्वमवभृथाद् आ उदवसानीयाया इष्टेर्ये होमास्तेष्वतिपन्नेषु दैवेन मानुषेण वा प्रतिबलेन भवति संशयः । किं प्रतिहोमः कर्त्तव्यः ? उत नेति । किं प्राप्तम् । कर्त्तव्य इति । उन्मुक्तदीक्षो हि स तदा भवति । दीक्षाणामुन्मोचनार्थो हि अवभृथः । तस्मात् कर्त्तव्यास्ते न कृता इति ॥ एवं प्राप्ते ब्रूमः । ऊर्ध्वमवभृथात्, आ उदवसानीयाया इष्टेः, अतिपन्नानां न प्रतिहोमः स्यात् । कुतः । प्रतिषेधात् । प्रतिषेधो हि भवति । एतया पुनराधेयसम्मितया इष्ट्या अग्निहोत्रं होतव्यमिति । प्रागुदवसानीयायाः, होमस्य प्रतिषेधः । यावदुदवसानीयोत्कृष्यते, तावत् प्रतिषेधः । एवं श्रुतिः । इतरथा लक्षणा स्यात् । तस्मादकर्त्तव्याः । ते न कृता इति, न स्यात् प्रतिहोम इति ॥ ४२ ॥ ॥ उदवसानीयोत्कर्षेऽपि प्रतिहोमाननुष्ठानाधिकरणम् ॥ १२ ॥

## प्रतिहोमश्चेत् सायमग्निहोत्रप्रभृतीनि हूयेरन् ॥ ४३ ॥

एतेषु एवोदाहरणेषु भवति संशयः । किं प्रतिहोमे सायमग्निहोत्रप्रभृतीनि आरभ्येरन्, उत प्रातरग्निहोत्रप्रभृतीनीति । ननु नास्त्येव प्रतिहोम इति स्थितम् । उच्यते । अस्तीति कृत्वा चिन्तयामः । कृत्वा चिन्तेयम् । अन्येषु सदृशन्यायेषूदाहरणेषु अस्याः प्रयोजनमस्तीति चिन्त्यते । किं प्राप्तम् । अनियमः । अर्थकृतत्वात् । एवं प्राप्ते ब्रूमः । यदि प्रतिहोमः क्रियते, सायमग्निहोत्रादारभ्य अतिपन्नानि, तेनैवानुपूर्व्येण प्रतिहोतव्यानीति ॥४३॥ प्रतिहोमे सायमग्निहोत्रप्रभृत्यारभ्याऽधिकरणम् ॥ १३ ॥

## प्रातस्तु षोडशिनि ॥ ४४ ॥

षोडशिसंस्थे सोमेऽतिपन्नेषु होमेषु सन्देहः । किं सायमग्निहोत्रेणेति, उत प्रातरिति । किं प्राप्तम् । सायमग्निहोत्रेणेति पूर्वस्मिन्

अधिकरणे उक्तम् । उत्सर्गेण सर्वत्रैवमिति प्राप्तम् । तथा प्राप्ते उच्यते । प्रातस्तु षोड़शिनि, षोड़शिसंस्थे प्रातरग्निहोत्रादीनि अतिपन्नानीति प्रातरग्निहोत्रादेव समारभ्याणीति ॥ ४४ ॥ षोडशिसंस्थे प्रातरग्निहोत्रप्रभृत्यनुष्ठानाऽधिकरणम् ॥ १४ ॥

## प्रायश्चित्तमधिकारे सर्वत्र दोषसामान्यात् ॥ ४५ ॥

दर्शपूर्णमासयोः श्रूयते, भिन्ने जुहोति स्कन्ने जुहोतीति । तत्र किं दर्शपूर्णमासयोरेवैतद् भिन्ने स्कन्ने च प्रायश्चित्तम्, उत यत्र भिद्यते स्कन्दति चेति । किं प्राप्तम् । प्रकरणे यत् प्रायश्चित्तमेवञ्जातीयकं किञ्चिदुत्पन्नं, तत् सर्वत्र यत्र यत्र भिद्यते स्कन्दति वा, तत्र तत्र स्यात् । कस्मात् । दोषसामान्यात् । समानं निमित्तं स्कन्दनं भेदनं वा । स एवात्र दोष इत्यभिप्रेतम् । प्रकरणाद्दर्शपूर्णमासयोः प्रायश्चित्तम् । वाक्यादन्यत्रापि । प्रकरणाच्च वाक्यं बलीयः । तस्मात् सर्वत्र स्कन्ने भिन्ने च प्रायश्चित्तमिति ॥ ४५ ॥ पूर्व० ॥

## प्रकरणे वा शब्दहेतुत्वात् ॥ ४६ ॥

प्रकरणे एव भिन्ने स्कन्ने वा प्रायश्चित्तम् । कुतः । शब्दहेतुत्वात् । तेन प्राकृतेन अर्थेन सहैकवाक्यता एषा होमानाम् । ततो होमवतो यागस्य प्रत्यायने प्रकृतो यजेतेति शब्दो हेतुः । एवञ्चेत् तदुपकारेण अर्थवान् भविष्यतीति । इतरथा विना वाक्येन, फलं कल्पयितव्यं स्यात् । तस्माद् वाक्यं फलाभावेनैव बाधितमिति कृत्वा प्रकरणमनुग्रहीतव्यमिति ॥ ४६ ॥

## अतद्विकारश्च ॥ ४७ ॥

न च तद्विकारोऽग्निहोत्रं, ज्योतिष्टोमो वा । न दर्शपूर्णमासविकारः । यदि तद्विकारो भवेत्, तत्रापि स्कन्ने भिन्ने वा प्रायश्चित्तं स्यादिति ॥ ४७ ॥ ॥ सिद्धान्तः ॥ भेदनादिनिमित्तकहोमस्य दर्शपूर्णमासाङ्गताधिकरणम् ॥ १५ ॥

## व्यापन्नस्याप्सु गतौ यदभोज्यमार्याणां तत् प्रतीयेत ॥ ४८ ॥

व्यापन्नमप्सु प्रहरतीति श्रूयते । किं व्यापन्नमित्युच्यते ? इति । तदभिधीयते । व्यापन्नं, दूषितं येन कार्येण क्रियते । किं तत् ।

यदभोज्यमार्य्याणां केशकीटावपन्नमन्येन वोपघातेनोपहतं, तद् व्यापन्नमिति ॥ ४८ ॥ व्यापन्नशब्दार्थनिर्णयाधिकरणम् ॥ १६ ॥

**विभागश्रुतेः प्रायश्चित्तं यौगपद्ये न विद्यते ॥ ४९ ॥**

प्रस्तोतुरुद्गातुरुद्गातृप्रतिहर्त्रोर्वा यत्रापच्छेदः, किं तत्र प्रायश्चित्तं स्याद्, न ? इति भवति संशयः । किं तावत् प्राप्तम् । प्रायश्चित्तं यौगपद्ये न विद्यते । कुतः । विभागश्रुतेः । विभक्तेऽपच्छेदे प्रायश्चित्तमामनन्ति । अपच्छेदश्चायं विभागः । स उभाभ्यां साध्यते । इह चैकेन साध्यमाने श्रूयते प्रायश्चित्तमुद्गात्रा प्रतिहर्त्रा वा । न च यदऽपरेण सह क्रियते, तत् केवलेन कृतं भवति । यदि हि केवलेन कृतं स्यात् तेन कृतं स्यात्, तेन कृतम् । अपरः किं कुर्य्यात् । तस्मान्न युगपदपच्छिन्नयोः प्रायश्चित्तमिति ॥ ४९ ॥ पूर्व० ॥

**स्याद्वा प्राप्तनिमित्तत्वात् कालमात्रमेकम् ॥ ५० ॥**

स्याद् वा प्रायश्चित्तं यौगपद्येऽपि । प्राप्तं हि निमित्तमपच्छेद उद्गातुः प्रतिहर्त्तुश्च । यत्र हि द्वयोरपच्छेदः । तत्र द्वावप्यपच्छिन्नौ, एकोऽप्यपरोऽपि । संयुक्तस्य हि पृथग्भावोऽपच्छेदः । स चोभयस्योऽपि । एकेनापि तत्रापच्छेदः क्रियतेऽनपेक्ष्य अपरम्, अपरेणापि । कालमात्रन्तु तत्रैकम् । न च कालैक्यादपच्छेदयोरैक्यं भवति । तस्मात् प्रायश्चित्तं युगपदपच्छेदेऽपि ॥ ५० ॥ सिद्धान्तः ॥ अपच्छेदयौगपद्येऽपि प्रायश्चित्ताधिकरणम् ॥ १७ ॥

**तत्र विप्रतिषेधाद्विकल्पः स्यात् ॥ ५१ ॥**

यद्युद्गातृप्रतिहर्त्रोर्युगपदपच्छेदो भवति, तत्र सन्देहः । किम् अदाक्षिण्यं, सर्वस्वं वा विकल्पः ? उत समुच्चय इति । किं प्राप्तम् । तत्र विप्रतिषेधाद्विकल्पः स्यात् । विरुद्धौ हि एतौ कल्पौ । सर्वस्वमदाक्षिण्यं च । तस्माद् विकल्पो भवितुमर्हति ॥ ५१ ॥ सि० ॥

**प्रयोगान्तरे वोभयानुग्रहः स्यात् ॥ ५२ ॥**

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, विकल्प इति । उभयोर्विधानात् । सर्वाङ्गोपसंहारी प्रयोगवचन एवमुपपद्यते । विकल्पे हि पक्षे बाधः । तस्मात् समुच्चयः । अथ यदुक्तं, विरोधाद् विकल्प इति । उच्यते । प्रयोगान्तरे वा उभयानुग्रहः स्यात् । तेन पुनः, यजेतेत्युच्यते । द्विस्तस्य प्रयोगः । तत्रैकस्मिन् प्रयोगे एकः कल्पः । अ॰

न्यस्मिन्नपरो भविष्यति । एवमविरोधः । तस्मादुभयं प्रायश्चित्तमिति ॥ ५२ ॥ पूर्व० ॥

## न चैकसंयोगात् ॥ ५३ ॥

न चैतदेवम् । कुतः । एकसंयोगात् । स एव यागः पुनः क्रियेत, यदि अन्यतरेण विना वैगुण्यमित्यऽवधार्य्येत । सर्वस्वे क्रियमाणे अदाक्षिण्याभावाद् विगुणः स्यात् । नान्यस्मिन् प्रयोगे क्रियमाणेऽन्यः प्रयोगोऽनुगृह्यते । न चादाक्षिण्यस्य सर्वस्वदानस्य च प्राधान्यं गुणवता प्रयोगेण कर्म सम्बन्धयितव्यम् । तस्माद् विकल्पः ॥ ५३ ॥ उत्तरम् ॥ यौगपद्येऽदाक्षिण्ये सर्वस्वदाक्षिण्यविकल्पाधिकरणम्॥१८॥

## पौर्वापर्य्ये पूर्वदौर्बल्यं प्रकृतिवत् ॥ ५४ ॥

यत्र आनुपूर्वेण भवत्यपच्छेदस्तत्र किं पूर्वनिमित्तं प्रायश्चित्तम् उत उत्तरनिमित्तमिति भवति संशयः । किं प्राप्तम्, पूर्वस्य बलीयस्त्वम् । पूर्वापच्छेदे यन्नैमित्तिकं प्राप्तम्, तस्मिन् सति तद्विरुद्धं न शक्यं कर्त्तुम् । न चाशक्यमुपदेशार्हं भवति । पूर्वविज्ञानं प्राप्तमिति न संशयः । तस्मात् तदविरोधेनान्यत् कार्य्यं न विरुद्धम् । क्व तर्हि तत् स्यात् । यत्र केवलं निमित्तम् । तस्मात् पूर्वविज्ञानं बलवत् ॥ एवं प्राप्ते ब्रूमः । पौर्वापर्य्ये पूर्वदौर्बल्यं स्यात् । कुतः ? । आख्यातेन हि योऽर्थः कर्त्तव्य इत्युच्यते, तत्रैतदनुबद्धं, यथा शक्येत तथेति । तत् पूर्वविज्ञानबाधेन शक्यते, नान्यथा । तेन पूर्वविज्ञानं बाधित्वा इदं कर्त्तव्यमिति भवति शब्दार्थः । ननु पूर्वविज्ञाने इदमुपपद्यते । यदन्यद् विरोधकं विज्ञानं भविष्यति, तन्मिथ्येति । अभूतं हि तन्न शक्यमाश्रयितुम् । इदं नाम तदिति । न चाप्रतिषिद्धे तस्मिन् न पूर्वविज्ञानं सम्भवति । तस्मादप्रतिषिद्धं भविष्यद्, यदा तु तद् भवति, तदा पूर्वविज्ञानं बाधमानमेवोत्पद्यते । तदिदानीं बाधितं न शक्नोत्युत्तरं बाधितुमिति । प्रकृतिवत् । यद् हि प्राकृतं वैकृतेन बाध्यते, तत्राऽप्येतदेव कारणम् । न अबाधित्वा पूर्वविज्ञानं वैकृतं सम्भवतीति । प्राकृतं च पूर्वम् । यतो विकृतौ तदपेक्षा ॥

प्रत्यक्षत्वाद् वैकृतमानुमानिकं प्राकृतं बाधते इति चेत् । प्रत्यक्षत्वेऽपि सति नैव बाधेत । यदि यथावर्णितोऽयमाख्यातार्थो न भवेत् । सति पूर्वविज्ञाने अशक्यत्वात् प्राकृतं बाधेतैव । तस्मात् परबलीय-

स्त्वं न्याय्यमेवेति ॥ ५४ ॥ आनुपूर्व्येणापच्छेदे उत्तरापच्छेदनिमित्त-प्रायश्चित्तानुष्ठानाधिकरणम् ॥ १९ ॥

**यद्युद्गाता जघन्यः स्यात् पुनर्यज्ञे सर्ववेदसं दद्याद् यथेतरस्मिन् ॥ ५५ ॥**

यदा प्रतिहर्त्तुः पूर्वमपच्छेदस्तत उद्गातुस्तत्र अदक्षिणेन इष्ट्वा पुनर्यष्टव्यम् । तत्र सन्देहः । पुनर्यागे किं द्वादशशतं दातव्यमुत सर्वस्वमिति । किं प्राप्तम् । द्वादशशतम् । कुतः । एवं हि आम्नायते । तत्र तद् दद्यात्, यत् पूर्वस्मिन् दास्यन् स्यात् । पूर्वस्मिँश्च प्रयोगे ज्योतिष्टोमदक्षिणैव प्राप्ता । तस्माद् द्वादशशतमिति ॥ एवं प्राप्ते ब्रूमः । तत्र पुनर्यज्ञे सर्वं दद्यात् । यथा इतरस्मिन् पूर्वस्मिन्नहनि सर्वस्वम् । कथं तत्र सर्वस्वमिति चेत् । प्रतिहर्त्तुरपच्छेदात्, प्रतिहर्त्तरि अपच्छिन्ने द्वादशशतं बाधित्वा सर्वस्वं दास्यन् भवति । ननु पूर्वस्मिन् अहनि द्वादशशतमप्यसौ दास्यन्नासीत् । सत्यं, सर्वस्वदानेन तु उभयं प्रदत्तं भवति । तस्मात्तद्देयम् । ननु अर्वागपि द्वादशशतात् सर्वस्वम् । नैतदेवम् । अधिकृते द्वादशशते सर्वस्वमप्यऽधिकं भवति । अपि च पूर्वस्मिन्नहनि नैव द्वादशशतं दास्यन् भवतीति । एतावद् दास्यन्निति । उच्यते । यस्योत्तरकाले तावद्दानं भवति । न च पूर्वस्मिन्नहनि द्वादशशतं दीयते । तस्मान्न तद्दास्यन्नित्यवगम्यते । मिथ्याबुद्धिः सा, तत्त्वेन व्यवहारः ॥

ननु च सर्वस्वमपि प्रतिषिद्धं भवति । तदप्यसौ न दास्यन्निति । साऽप्यस्य मिथ्याबुद्धिः । नेत्याह । साभ्यासस्य ज्योतिष्टोमस्य प्रयोगः । तत्र प्रथमप्रयोगे अदाक्षिण्यविरोधात् सर्वस्वं बाध्यते । द्वितीयप्रयोगे तद्दानं चोद्यते । तत्र विरोधो नास्ति । तस्यैव यज्ञस्य स एव प्रयोगः, प्रतिहर्त्ता च तस्मिन्नपच्छिन्न इति द्वादशशतं बाधित्वा सर्वस्वमेव दास्यन् भवति । तस्मात् सर्वस्वं तत्र देयमिति ॥ ५५ ॥ उद्गातुरुत्तरापच्छेदेऽपि सर्वस्वदक्षिणादानाधिकरणम् ॥ २० ॥

**अहर्गणे यस्मिन्नपच्छेदस्तदावर्त्तेत कर्मपृथक्त्वात् ॥ ५६ ॥**

अहर्गणे यदा भवति कस्मिँश्चिदहनि उद्गातुरपच्छेदस्तदा सन्देहः । किं कृत्स्नोऽहर्गण आवर्त्तते, उत तदेवाऽहरिति । किं प्राप्तम् । कृत्स्नोऽहर्गणः । कुतः । अपरैरहोभिर्विना, तदा विगुणं भवति ।

तस्माद् गण एवावर्त्तेतेति । एवं प्राप्ते ब्रूमः । यस्मिन्नपच्छेदस्तदेव आवर्त्तेत । कुतः । कर्म्मपृथक्त्वात् । पृथगेतानि कर्माणि, नान्यदहः अन्यस्य गुणभूतम् । इष्ट्वा इति च यागं परिसमाप्येति गम्यते, न साऽङ्गमिति । यान्यहरन्तराणि साहाय्येनोपकरिष्यन्ति, विद्यन्त एव तानि । अतः साहाय्यं करिष्यन्तीति । तस्मात् तदेवावर्त्तेत ॥ ५६ ॥ अहर्गणेऽपच्छेदे न सर्वेषामावर्तनाधिकरणम् ॥ २१ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्य पञ्चमः पादः ॥६॥५॥

अथ षष्ठे अध्याये षष्ठः पादः ॥ ६ ॥ ६ ॥

## सन्निपातेऽवैगुण्यात् प्रकृतिवत्तुल्यकल्पा यजेरन् ॥ १ ॥

सत्त्राण्युदाहरणम् । सप्तदशावराः सत्रमासीरन् य एवं विद्वांसः सत्रमासते य एवं विद्वांसः सत्रमुपयन्तीति । तत्र सन्देहः । किं समानकल्पानां भिन्नकल्पानां च सहाधिकारः, उत समानकल्पानामेवेति । के पुनः समानकल्पाः । राजन्यात्रिवध्न्यश्ववसिष्ठवन्यशुनकानां कण्वकश्यपसङ्कृतीनां नाराशंसो द्वितीयः प्रयाजः । तनूनपादितरेषाम् । एवं केचिन्नाराशंसकल्पाः, केचित् तनूनपात्कल्पाः । तत्र किं तावत् प्राप्तम् । सन्निपाते बहूनां यजमानानां ये एव तुल्यास्त एव सह सत्रमासीरन् । कुतः । अवैगुण्यात् । इतरथा यस्य कल्पो नोपसंह्रियेत, तस्य वैगुण्यं स्यात् । यथा प्रकृतावेव विना साद्गुण्येन फलाभावः, एवमिहापीति ॥ १ ॥ सि० ॥

## वचनाद्वा शिरोवत् स्यात् ॥ २ ॥

वाशब्दात् पक्षो विपरिवर्त्तते । न चैतदस्ति, भिन्नकल्पानामऽधिकार इति तेऽप्यधिक्रियेरन् । कुतः । अविशेषेण सर्वेषां यजमानानां प्राप्तिः । न च भिन्नकल्पानां प्रतिषेधः । ननु वैगुण्यं भिन्नकल्पानाम् । अत्रोच्यते । वचनात् । सामान्यवचनेन भिन्नकल्पा अपि गृहीताः । तत्र शिरोवद् बाधः स्यात् । यथा, पुरुषशीर्षमुपदधातीतिवचनसामर्थ्याच्छवशिरसां स्पर्शनं स्मृतिविप्रतिषिद्धमपि क्रियते, एवमिहापि । अथ वा आशिरवत् । यथा ऋतपेये घृतव्रतो भवतीतिवचनाद् व्रतदुहि निवृत्तायामन्यामाशिरे गां कल्पयन्ति । एवमेतदपि वचनाद् भविष्यति ॥ २ ॥ पूर्व० ॥

## न वाऽनारभ्यवादत्वात् ॥ ३ ॥

नैतदस्ति, यदुक्तं– भिन्नकल्पानामप्यधिकार इति । समानकल्पा एव अधिक्रियेरन् । कुतः । अवैगुण्यात् । अथ यदुक्तं, वचनाद् वैगुण्येनापि सेत्स्यतीति । तन्न । अनारभ्यवादत्वात् । तद्धि वचनात् प्रकल्प्यते । यस्मिन् अकल्प्यमाने वचनमनर्थकं भवति । यदि हि आरभ्य भिन्नकल्पान् एतदुच्येत, ततो वचनमनर्थकं भवतीति भिन्नकल्पानामपि सत्रमभ्युपगम्येत, न त्वारभ्य भिन्नकल्पान् एतदुच्यते । समानकल्पेष्वर्थवत्ताऽस्य वचनस्य भविष्यति । तस्मान्नभिन्नकल्पानामधिकार इति ॥ ३ ॥ उत्तरम् ॥

## स्याद्वा यज्ञार्थत्वादौदुम्बरीवत् ॥ ४ ॥

स्याद् वा भिन्नकल्पानामधिकारः । कुतः । यज्ञार्थत्वात् कल्पस्य । वसिष्ठादीनां नाराशंसकल्पो यज्ञस्य साधकः । स च यज्ञः सर्वेषां साधारणः । परकल्पेनापि सिद्धः सिद्धो भवति । यथा, यजमानेन सम्मायौदुम्बरीं परिवासयन्तीति यस्य कस्यचित् परिमाणेन सिद्धो यज्ञोऽन्येषामपि सिद्धो भवति । उच्यते । ननु प्रयाजस्य वाक्येन पुरुषसम्बन्धः । स च प्रकरणप्राप्तां यागार्थतां बाधिष्यते इति । नेति ब्रूमः । फलं हि तदा कल्पयितव्यम् । नन्वितरथाप्यदृष्टमवश्यं कल्पनीयम् । तत्रोच्यते । सत्यं कल्पनीयम् । प्रमाणेन तु प्रयोगवचनैकवाक्येन । द्वितीये तु पक्षे कल्पयित्वा शब्दं, तेनैकवाक्यता स्यात् । अथोच्यते । क्वचित् समाम्नातेन सहैकवाक्यता भविष्यति । तथाप्यप्रकृतेन व्यवहितेन च कल्प्यमाना प्रकृतकल्पनाया गुरुतरा स्यात् ॥ ४ ॥ आ० ॥

## न तत्प्रधानत्वात् ॥ ५ ॥

नैतदेवम् । तत्प्रधानत्वात् । पुरुषार्थो हि एव कल्पः । कथम् । वसिष्ठादीनां नाराशंसो यज्ञाङ्गमिति । यच्च यस्य यज्ञाङ्गं, तेन सह फलदःकर्म तस्य भवति । तनैवमभिसम्बन्धः क्रियते । वसिष्ठानां नाराशंसेन सहितं कर्म्म फलदं भवतीति ॥ ५ ॥

## औदुम्बर्य्याः परार्थत्वात् कपालवत् ॥ ६ ॥

अथ यदुपवर्णितं, तथा औदुम्बरी तथेह इति । पारार्थ्यमौदुम्बर्य्याः । यजमानो गुणत्वेन श्रूयते । ननु तत्रापि प्रयोगवचनः पुरुषप्राधान्यं कुर्य्यात् । नैष दोषः । एकेनापि यजमानेन सम्मिता चेयं

सर्वेषां यजमानसम्मिता भवति । न त्विह एकस्य संगृहीते सर्वेषां संगृहीतः। तस्मादौदुम्बर्य्याः पारार्थ्यं, कपालवत्। यथा, पुरोडाशकपालेन तुषा उपवपन्तीति परार्थकपालेन तुषा उपवप्तव्या इत्युपादीयते । एवमेतदपीति ॥ ६ ॥ आ० नि० ॥

अन्येनापीति चेत् ॥ ७ ॥

एवं चेद् भवान् पश्यति, यजमानेन सम्मानं, तत् प्रयोजनं स्वेन अन्येन वा यजमानेनेति । तथा प्रयोगान्तरे यो यजमानस्तेनापि संमानं प्राप्नोति ॥ ७ ॥ आ० ॥

नैकत्वात्तस्य चानधिकाराच्छब्दस्य चाविभक्तत्वात् ॥ ८ ॥

अत्रोच्यते । न प्रयोगान्तरस्य यजमानः प्रसज्ज्यते । न तु यजमानशब्दे कश्चिद्विशेषो, यतो यजमानशब्दाद् व्यवस्था स्यात् । किं तर्हि, एकत्वस्य विवक्षितत्वान्न द्वाभ्यां याजमानानि कर्त्तव्यानीति, नान्य आनीयते। आह । अन्य एव तर्हि सर्वयाजमानेषु भवतु । नैवम् । कामिनं हि अधिकृत्य साङ्गस्य यागस्य वचनम् । यजमानशब्दश्चाऽविभक्त इह औदुम्बर्य्याःसम्माने। तस्मान्नान्यो भविष्यति॥८॥आ०नि०

सन्निपातात्तु निमित्तविघातः स्याद् बृहद्रथन्तरवद्विभक्तशिष्टत्वाद् वसिष्ठनिर्वर्त्ये ॥ ९ ॥

तुशब्दः पक्षं व्यावर्त्तयति । बहुषु यजमानेषु सन्निपातान्निमित्तविघातः स्यात् । कुतः । विभक्तशिष्टत्वात् । वसिष्ठनिर्वर्त्ये प्रयोगे नाराशंसो नैमित्तिकः । अन्यस्मिँस्तनूनपान्नैमित्तिकः। यत्रेदानीमुभये कर्त्तारः ससहायेन, तत्र निर्वृत्तिर्न केवलेन । तस्मान्न केवलः कर्त्ता । न चेद् वासिष्ठः केवलः कर्त्ता, तस्मात् तन्निमित्तं तत्र न कर्त्तव्यम् । न चेतरनिमित्तमुभयोरप्यन्योन्येन विघातः। बृहद्रथन्तरवत् । तद् यथा, बृहद्रथन्तरं पृष्ठं भवतीति न बृहत्साधनकं न रथन्तरसाधनकमिति । नैव तत्र बृहन्निमित्तं भवति, न रथन्तरं वा। एवमिहापीति ॥९॥ आ०

अपि वा कृत्स्नसंयोगादविघातः प्रतीयते स्वामित्वेनाभिसम्बन्धात् ॥ १० ॥

अपि वेति पक्षं व्यावर्त्तयति । कृत्स्नं प्रति केवलस्य कर्त्तृत्वेन

२५

संयोगो भवति। तस्माद् अविघातो नैमित्तिकानाम् । कथं पुनः कार्त्स्न्येन कर्त्तव्यत्वम् । स्वामित्वेनाभिसम्बन्धात् । कर्म्म प्रति स्वामित्वेन केवलानां वसिष्ठादीनामभिसम्बन्धो भवति । कर्म्म पुरुषाणामुपकारकम् । तद्धि एकैकस्य शक्नोति फलं निर्वर्त्तयितुम् । तस्मादेकैकः कृत्स्नस्य कर्त्तेति तन्नैमित्तिकं सर्वं प्राप्नोति । यथा, तुण्डमात्रे दीयतामिति । यद्यपि सा तुण्ड-डपित्थयोर्माता, तथापि तस्यै दीयते। कार्त्स्न्येन हि तस्य सा माता भवति। न हि व्यासज्ज्यते मातृत्वम् । तद्वदिहापि द्रष्टव्यम् । तस्मादसमानकल्पानामनधिकारः ॥ १० ॥

**साम्नोः कर्म्मवृद्ध्यैकदेशेन संयोगे गुणत्वेनाभिसम्बन्धस्तस्मात्तत्र विघातः स्यात् ॥ ११ ॥**

अथ यदुक्तं, बृहद्रथन्तरवदिति तत् परिहरणीयम्। बृहद्रथन्तरयोः साम्नोर्नैमित्तिककर्म्मवृद्ध्यैकदेशेन संयोगो भवति । तत्र हि उभयोः साधकत्वं, नैकस्य । स्तोत्रैकदेशेन तु तत्र साम्नोः सम्बन्धो, न कृत्स्नेन स्तोत्रेण । गुणत्वेन हि तत्र साम श्रूयते । स्तोत्रं प्राधान्येन । तस्मात् तत्र विघातः स्यात् ॥ ११ ॥ आ०नि० ॥ सत्रे समानकल्पानां सहाधिकाराधिकरणम् ॥ १ ॥

**वचनात्तु द्विसंयोगस्तस्मादेकस्य पाणित्वम् ॥ १२ ॥**

इदं समामनन्ति, एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति । तत्र सन्देहः । किं राज्ञो द्वौ पुरोहितौ यजेयाताम्, उत राजा च पुरोहितश्चेति । किं प्राप्तम् । राज्ञो द्वौ पुरोहिताविति । कुतः । पुरोहितशब्दात् परं द्विवचनं श्रूयते, तच्छब्दवाच्यस्य द्वित्वं शक्नोति वदितुम् । पुरोहितश्च तच्छब्दवाच्यः श्रुत्या, न राजा । पुरोहितवचनः पुरोहितशब्दः । लक्षणया युगपदधिकरणवचनतायां हि तद् भवति । नन्वेकस्य द्वौ पुरोहितौ न स्तः । पुरोहितं वृणीत इति हि उपादीयमानस्य विवक्षितमेकत्वमिति । उच्यते । वचनादेतद् भविष्यति । किं हि वचनं न कल्पयेत् । एतेनैव कारणेन द्वौ भविष्यतः । यथा वचनेन अञ्जलिना जुहोतीत्येकस्यैव द्वौ पाणी भवतो, यद्यपि सव्योऽप्राप्तस्तथापीति ॥ १२ ॥ पूर्व० ॥

**अर्थाभावात्तु नैवं स्यात् ॥ १३ ॥**

तुशब्दात् पक्षो विपरिवर्त्तते । नैवं स्यात् । द्वौ पुरोहिताविति। कुतः । अर्थाभावात् । नैवायम् अर्थोऽस्ति । द्वौ पुरोहितौ इति । एकस्य राज्ञ एक एव पुरोहित उपादेयत्वेन हि श्रूयते । पुरोहितं करोतीति, एकत्वं विवक्षितम् । ननु वचनादित्युक्तम् । उच्यते । न तु वचनादेतच्छक्यम् । संस्कारनिमित्तत्वात् पुरोहितशब्दस्य । क्रियमाणोऽपि न पुरोहितः स्यात् ॥ १३ ॥ उत्तरम् ॥

**अर्थानाञ्च विभक्तत्वान्न तच्छ्रुतेन सम्बन्धः ॥ १४ ॥**

अर्थानाञ्च विभक्तत्वं श्रूयते । तेजःसंस्तवो ब्राह्मणस्य, वीर्य्यसंस्तवो राजन्यस्य । ताभ्यां वर्णाभ्यां तेन तेन फलेन सम्बन्धोऽनूद्यते। तस्मादपि न द्वौ पुरोहिताविति ॥ १४ ॥ युक्तिः ॥

**पाणेः प्रत्यङ्गभावादसम्बन्धः प्रतीयेत ॥ १५ ॥**

अथ यदुक्तम्, एतस्मादेव कारणादेकस्यैव पुरुषस्य द्वौ पाणी भवत इति। युक्तं तत्र। पाणेः प्रत्यङ्गभूतत्वात् । अञ्जलिं प्रत्यङ्गभूतो दक्षिणस्य पाणेः सव्यः पाणिः । तेन विना अञ्जलिरेव न भवति । न हि द्वाभ्यां दक्षिणाभ्यामञ्जलिरित्युच्यते । तस्माद् राजा च पुरोहितश्च स्यात् । ननु तत्र राजपुरोहितश्च राजपुरोहितश्च राजपुरोहितौ यजेयातामिति। उच्यते। न तौ सायुज्यकामौ भवतः। स राजा पुरोहितेन सहैककार्यो भवति, न तु पुरोहितः पुरोहितेन । उभावपि तौ हि राजानमभिचरन्तौ पुरोहिताावित्युच्यते । न हि ताविच्छन्तौ । संस्कारशब्दो हि पुरोहित इति । ननु लक्षणा भवति भवत्पक्षे । उच्यते । श्रुत्यभावे लक्षणयापि व्यवहारो भवति । यथा, अग्नौ तिष्ठत्यवटे तिष्ठतीति । तस्माद् राजा च पुरोहितश्च राजपुरोहिताविति ॥ १५ ॥ आ०नि० ॥ भिन्नकल्पयोरपि राजपुरोहितयोः कुलाययज्ञेऽधिकाराधिकरणम् ॥२॥

**सत्राणि सर्ववर्णानामविशेषात् ॥ १६ ॥**

इह सत्राण्युदाहरणम् । य एवं विद्वांसः सत्रमासते, य एवं विद्वांसः समुपयन्तीति । तत्र सन्देहः । किं सत्राणि त्रयाणामपि वर्णानाम्, उत ब्राह्मणानामेवेति । किं प्राप्तम् । सत्राणि सर्ववर्णानां भवेयुरिति । कस्मात् । अविशेषात् । न हि कश्चिद्विशेष आश्रीयते । अमीषां वर्णानां सत्राणि भवन्ति, अमीषां नेति। तस्मात् त्रयाणामपि वर्णानामधिकार इति ॥ १६ ॥ पूर्व० ॥

## लिङ्गदर्शनाच्च ॥ १७ ॥

इतश्च पश्यामः, त्रयाणां सत्राणीति । कुतः । लिङ्गदर्शनात् । किं लिङ्गं भवति । एवमाह । बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्य्यात्, पार्थुरश्मं राजन्यस्य, रायोवाजीयं वैश्यस्येति द्वादशाहे भवति वचनं ब्रह्मसमविधानपरम् । तस्मिन् राजन्यवैश्यानां दर्शनं भवति । तस्मादपि सर्ववर्णानामधिकार इति ॥ १७ ॥ युक्तिः ॥

## ब्राह्मणानां वेतरयोरार्त्विज्याभावात् ॥ १८ ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति, त्रयाणामपि वर्णानामिति । किं तर्हि ब्राह्मणानामेव स्यात् । कुतः । इतरयोरार्त्विज्याभावात् । इतरयोर्हि वर्णयो राजन्यवैश्ययोरार्त्विज्यं प्रतिषिद्धम् । स्वयमेव आर्त्विज्येन विना विगुणत्वम् । तस्माद् ब्राह्मणानामेव स्यात् ॥ १८॥सि०

## वचनादिति चेत् ॥ १९ ॥

इति चेत् पश्यसि, राजन्यवैश्ययोर्वैगुण्यमापद्यते इति । वचनाद् यजमानाः सन्त ऋत्विजो भविष्यन्ति । ये यजमानास्ते ऋत्विज इति । के पुनर्यजमानाः । ये तत्र फलं कामयमानाः सत्रकर्मणि प्रवृत्तास्ते राजन्या अपि वैश्या अपि । तेषाम् ऋत्विक्कर्म्म विधीयते । तत्रैतत् स्याद्, येषामार्त्विज्यं शक्यं कर्त्तुं तेषामेव तद् ब्राह्मणानाम् । प्रतिषिद्धं हि राजन्यवैश्यानां, न तेषामिदमार्त्विज्यविधानमिति । नैतदेवम् । यथैव ब्राह्मणानां यजमानानामप्राप्तं वचनविधानाद् भवति, एवमब्राह्मणानामपि यजमानानां वचनप्रामाण्यादेव भवितुमर्हतीति । तस्मादार्त्विज्यसंस्कृता राजन्यवैश्या अपि सत्रमासीरन्निति ॥ १९ ॥ आ० ॥

## न स्वामित्वं हि विधीयते ॥ २० ॥

नैतदेवम् । स्वामित्वमनेन वचनेन विधीयते । एवङ्कामाः सत्रमासीरन्निति विधीयते, न आर्त्विज्यम् । अथ ये यजमानास्ते ऋत्विज इत्यनेन वचनेन विहितमार्त्विज्यमिति । उच्यते । तदपि न । कथम् । नात्रैषा वचनव्यक्तिः । ये यजमाना इत्युद्देशपदम्, ऋत्विजः इति विधेयपदम् । तथा हि सति आर्त्विज्यमङ्गं यजमानसंस्कारकं विधीयेत, न यजमाना आर्त्विज्यस्याङ्गम् । तत्र प्राकृतार्थता नैषामार्त्विज्यानां स्यात् । संस्कारश्चादृष्टः कल्प्येत । स च यजमान-

विषय इति पुनरदृष्टम् । तस्मान्न यजमानानां सतामार्त्विज्याः पदार्था विधीयन्ते । किन्तर्हि । आर्त्विजानां पदार्थानामनन्यकर्तृकता । एषा च वचनव्यक्तिः । ऋत्विज इत्युद्देशपदम् । ते इति विधीयते । ये यजमानास्त एव ऋत्विजो भवन्ति, नान्ये इत्यार्त्विजेषु पदार्थेषु यजमानाः कर्त्तारो विधीयन्ते । प्रत्याम्नानात् । अन्ये निवर्त्तन्ते । एवं सति प्राकृतप्रयोजना एव आर्त्विजाः पदार्थाः । न यजमानसंस्कारः अदृष्टो विधीयते इति । यजमानकर्तृकल्पनायामप्येषामदृष्टमिति यदि कल्प्येत तत्र ब्रूमः । इतरस्मिन्नपि पक्षे यजमानविषयः सोऽदृष्टः संस्कार इति अवश्यं कल्पनीयम् । यश्चोभयोः पक्षयोर्दोषो, न तमेकश्चोद्यो भवति ॥ २० ॥ आ० नि० ॥

## गार्हपते वा स्यातामविप्रतिषेधात् ॥ २१ ॥

गार्हपते पदार्थे राजन्यवैश्यौ भविष्यतः । न च तत्रार्त्विजप्रयोजनम् । तस्मादविप्रतिषेधस्तेषामिति ॥ २१ ॥ आ० ॥

## न वा कल्पविरोधात् ॥ २२ ॥

न चैतदस्ति, गार्हपते वा पदार्थे राजन्यवैश्यौ इति । कल्पविरोधो हि स्यात् । यजमानचमसः सोममय एकेषां, फलमयचमस एकेषाम् । तथा, ब्रह्मसाम बार्हद्गिरं ब्राह्मणानां, पार्थुरश्मं राजन्यानां रायोवाजीयं वैश्यानाम् । तस्माद् गार्हपते निवेश इत्येतदपि नास्ति॥२२॥

## सामित्वादितरेषामहीने लिङ्गदर्शनम् ॥ २३ ॥

अथ यदुक्तं, लिङ्गदर्शनादिति । तत् परिहर्त्तव्यम् । अत्रोच्यते । अहीनमेव सत्रशब्देन वक्ष्यति । यतः स्वामित्वम् ऋत्विजां विधीयते । अत ऋत्विजां स्वामित्वाद् राजन्यवैश्यानां सत्रं नावकल्पते इति । तस्माद् अहीने लिङ्गदर्शनम् ॥ २३ ॥ आ० नि० ॥ सत्रे ब्राह्मणमात्रस्याधिकाराधिकरणम् ॥ ३ ॥

## वासिष्ठानां वा ब्रह्मत्वनियमात् ॥ २४ ॥

एतत् समधिगतं– ब्राह्मणानामेव सत्रं, न राजन्यवैश्यानामिति । अथेदानीमिदं सन्दिग्धं, किं सर्वेषां ब्राह्मणानामुत वासिष्ठानां सः, उत भृगुशुनकवासिष्ठान् वर्जयित्वा अन्येषामिति । किं प्राप्तम् । सर्वेषामविशेषात् । न हि कश्चिद्विशेष आश्रीयते, अमीषां ब्राह्मणानां सत्रममीषां नेति । तस्मात् सर्वेषामिति ॥ एवं प्राप्ते ब्रूमः । वासिष्ठानां

ब्रह्मत्वस्य नियमाद् । वासिष्ठानां सत्रं स्यान्नान्येषाम् । कुतः । ब्रह्मत्वस्य नियमो भवति । वासिष्ठो ब्रह्मा भवतीत्यतो वासिष्ठानां, तत्समानकल्पानाञ्च सत्रं स्यादिति ॥ २४ ॥

## सर्वेषां वा प्रतिप्रसवात् ॥ २५ ॥

सर्वेषां वा सत्रं स्यात् । अविशेषात् । ननु वासिष्ठो ब्रह्मेत्युच्यते। नेत्याह । पुनः प्रतिसूयते । य एव कश्चन स्तोमभागमधीयीत स एव ब्रह्मा भवेदिति । वासिष्ठोपदेश इदानीं किमर्थ इति चेत् । स्तोमभागप्रशंसार्थः । स्तोमभागानधीयानोऽवासिष्ठोऽपि वासिष्ठकार्यं क्षमर्थः कर्त्तुमिति ॥ २५ ॥ पूर्व० ॥

## विश्वामित्रस्य हौत्रनियमाद् भृगुशुनकवसिष्ठानामनधिकारः ॥ २६ ॥

भृग्वादीनामनधिकारः स्यात् । कुतः । वैश्वामित्रस्य हौत्रं नियम्यते । विश्वामित्रो होता भवतीति । तस्माद् वैश्वामित्राणां, तैश्च समानकल्पानामधिकार इति ॥ २६ ॥ सिद्धान्तः ॥ सत्रे विश्वामित्रतत्समानकल्पानामेवाधिकाराधिकरणम् ॥ ४ ॥

## विहारस्य प्रभुत्वादनग्नीनामपि स्यात् ॥ २७ ॥

सत्राण्येवोदाहरणम् । य एवं विद्वांसः सत्रमासते, य एवं विद्वांसः सत्रमुपयन्तीति । तेषु सन्देहः । किं साग्नीनामनग्नीनाञ्च तानि भवन्ति, उत साग्नीनामेवेति । किं प्राप्तम् । साग्नीनामनग्नीनाञ्च । कुतः । विहारस्य प्रभुत्वात् । प्रभवति हि परकीयोऽपि विहारः सर्वेषामुपकर्त्तुम् । कर्त्तव्यो हि तेन सिद्ध्यतीति स यदीयेन तदीयेन वा सिद्धिमुपैति । तस्मादनग्नीनामपि भवितुमर्हतीति॥२७॥ पूर्व०॥

## सारस्वते च दर्शनात् ॥ २८ ॥

सारस्वते च सत्रे भवति दर्शनम् । परस्थैर्वा एते स्वर्गं लोकं यन्ति, येऽनाहिताग्नयः सत्रमासते इति । अनाहिताग्नीनां सत्रं दर्शयति । तस्मादपि सर्वेषाम् ॥ २८ ॥

## प्रायश्चित्तविधानाच्च ॥ २९ ॥

प्रायश्चित्तं विधीयते, अस्य ये विविचयेऽष्टाकपालं पुरोडाशं निर्वपेद् यस्याहिताग्नेरन्यैरग्निभिरग्नयः संसृज्येरन्निति । संसर्गेऽग्नीनां

प्रायश्चित्तं दर्शयति । स एवं स्यादनाहितैः, नान्यथा । तस्मादप्यनग्नीनां सत्राणीति ॥ २९ ॥ युक्तिः ॥

## साग्नीनां वेष्टिपूर्वत्वात् ॥ ३० ॥

साग्नीनां वा सत्राणि, नानग्नीनाम् । कस्मात् । इष्टिपूर्वत्वात् । इष्टिपूर्वत्वं सोमानामाम्नातम् । दर्शपूर्णमासौ इष्ट्वा सोमेन यजेतेति ज्योतिष्टोमस्येष्टिपूर्वत्वम् । तच्चोदकपरम्परया सत्राणि प्रति प्राप्तम् । तस्मादनग्नीनां तानि भवेयुरिति ॥ ३० ॥ सि० ॥

## स्वार्थेन च प्रयुक्तत्वात् ॥ ३१ ॥

स्वार्थेन चाग्नयः प्रयुक्ताः । कथम् । उपग्रहविशेषात् । उपग्रहविशेषो हि भवति, अग्नीनादधीतेति । तस्मादन्यस्याग्निभिरन्यस्य न सिद्धिः । यद्यपि क्रत्वर्था अग्नय इति ॥ ३१ ॥

## सन्निवापं च दर्शयति ॥ ३२ ॥

सावित्राणि होष्यन्तः सन्निवपेरन्निति । तेनापि साग्नयः सत्राण्युपासते इति गम्यते । एवं लिङ्गपरिहारौ अशिष्टेऽधिकरणेऽन्यच्चिन्त्यते ॥ ३२ ॥ युक्तिः ॥ सत्रे आहिताग्नेरेवाधिकाराधिकरणम् ॥ ५ ॥

## जुह्वादीनामप्रयुक्तत्वात् सन्देहे यथाकामी प्रतीयेत ॥ ३३ ॥

किं जुह्वादीनि पात्राणि कस्यचिदेव यजमानस्य, उपादाय प्रयोगः कर्त्तव्यः, उत अन्यानि साधारणानि कर्त्तव्यानि ? । किं प्राप्तम् । यस्य कस्यचिदेव यजमानस्य उपादाय प्रयोगः कर्त्तव्यः । कुतः । न हि स्वं पात्रं यजमानः प्रयुङ्क्ते । स्वेन पात्रेण प्रयोगः कर्त्तव्य इति । तस्मात् परकीयपात्रैरन्यैं यजेरन्निति ॥ ३३ ॥ पूर्व० ॥

## अपि वान्यानि पात्राणि साधारणानि कुर्वीरन् विप्रतिषेधाच्छास्त्रकृतत्वात् ॥ ३४ ॥

अपि वेति पक्षव्यावृत्तिः । नैतदेवम् । अन्यानि हि पात्राणि साधारणानि कर्त्तव्यानि । कस्मात् । विप्रतिषेधात् । विप्रतिषेधो भवति । कदाचित्तानि पात्राण्युपात्तानि भवेयुः । अथ मरणं कस्यचिद् यजमानस्यापद्येत, तत्र विप्रतिषेधः स्यात् । आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति । यदि तं तैर्दहेयुः, इतरेषां यज्ञो विरुध्येत । अथ तैर्यज्ञं समापयेयु-

रितरस्य शरीरसंस्कारा: परिलुप्येरन् । अन्येषु पुन: साधारणेषूपा-दीयमानेषु न किञ्चिदपि विरुद्ध्येत । तस्मात् तथा कार्य्यमिति ॥ ॥ ३४ ॥ सि० ॥

## प्रायश्चित्तमापदि स्यात् ॥ ३५ ॥

अथेदानीं पूर्वोक्तस्य लिङ्गस्य परिहार उच्यते । प्रायश्चित्तमस्म-त्पक्षे परिकल्पिष्यते । कथम् । अरण्ये कान्तारे गच्छतां स्थितानां वा दस्युभयात्, श्वापदभयाद् वा त्रासे जाते दावाग्निना वा संसृज्येरन् मिथो वा स विषय: प्रायश्चित्तस्य भविष्यतीति ॥ ३५ ॥ आ० नि० ॥
जुह्वादीनां साधारण्याधिकरणम् ॥ ६ ॥

## पुरुषकल्पेन वा विकृतौ कर्तृनियम: स्याद्यज्ञस्य तद्गुणत्वादभावादितरान् प्रत्येकस्मिन्नधि-कार: स्यात् ॥ ३६ ॥

अध्वरकल्पा उदाहरणम् । आग्रयणेष्टि: पशुरित्येवँल्लक्षणकानि कर्माणि । येषु सप्तदश सामिधेन्यस्तेषु सन्देह: । किं त्रयाणामपि वर्णानामेभि: कर्मभिरधिकार:, उत वैश्यस्यैवेति । किं प्राप्तम् । एत-स्यां विकृतौ पुरुषकल्पेन कर्त्ता नियम्येत । कुत: । यज्ञोऽयमध्वरक-ल्पादिरेतत्सङ्ख्यागुणक: । इयं च सङ्ख्या वैश्यस्योक्ता । तेन वैश्य एव एतत् कर्म कृत्स्नं कर्त्तुं समर्थ: । सप्तदशगुणकमेतत् कर्म । तच्च साप्तदश्यमवैश्येन क्रियमाणमसाधु । इतरान् प्रति हि तन्न चोद्यते। तेन यजेतेत्यसामर्थ्याद् ब्राह्मणक्षत्रियान्नाधिकरिष्यतीति ॥३६॥ पूर्व०॥

## लिङ्गाच्चेज्याविशेषवत् ॥ ३७ ॥

लिङ्गं च भवति यथा वैश्यस्य साप्तदश्यमिति, सप्तदशो वैश्य इति । तेन वैश्यस्य साप्तदश्यमतो वैश्यस्यैवज्ञातीयकानि कर्माणि । यथा इज्याविशेषा वैश्यस्य भवन्ति । वैश्यो वैश्यस्तोमेन यजेतेति । वैश्यसम्बन्धात् । एवं साप्तदश्यं तस्यैवेति ॥ ३७ ॥ युक्ति: ॥

## न वा संयोगपृथक्त्वाद्गुणस्येज्याप्रधानत्वादसंयुक्ता हि चोदना ॥ ३८ ॥

न चैतदस्ति । पृथगेतौ संयोगौ । एकं वाक्यं सप्तदश वैश्यस्या-नुब्रूयादिति वाक्यान्तरम् । अध्वरकल्पादिषु सप्तदशानुब्रूयादिति ।

स च गुण इज्याप्रधानो भवति, न इज्या गुणार्था । किमतः ? । यद्येवं यत्रेज्या, तत्र तद्गुणेन भवितव्यम् । न यत्र गुणस्तत्र इज्या वैश्यस्य गुणानुरोधेन इज्यापि । त्रयाणां वर्णानामिज्या । सा तत्र गुणमाकाङ्क्षतीति । अपिचेज्या गुणभूतस्यापरा चोदना । न सा वैश्यसंयुक्ता । सा त्ववैश्यकं गुणं प्रत्याययति । प्रथमं सवैश्यकमिति चेन्न । वैश्यस्य प्रधानत्वात् । प्रधानभूतस्तत्र वैश्यः श्रूयते । तस्मात् सर्वाधिकारः ॥ ३८ ॥

## इज्यायां तद्गुणत्वाद्विशेषेण नियम्येत ॥ ३९ ॥

अथ यदुक्तं, वैश्यस्तोमे यथा तथेहापीति । युक्तं तत्र । इज्या वैश्यस्य श्रूयते । तत्र वाचनिकेनैव विशेषेण नियम्येत । तस्मात् तत्रादोष इति ॥ ३९ ॥ युक्तिः ॥ विकृतसप्तदशसामिधेनीषु वर्णत्रयाऽधिकाराधिकरणम् ॥७॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्य षष्ठः पादः ॥ ६ ॥ ६ ॥

अथ षष्ठे अध्याये सप्तमः पादः ॥ ६ ॥ ७ ॥

## स्वदाने सर्वमविशेषात् ॥ १ ॥

इदमामनन्ति विश्वजिति, सर्वस्वं ददातीति । तत्र सन्देहः । किं यावत् किंञ्चित् स्वशब्देनोच्यते, यथा माता पिता इत्येवमाद्यपि सर्वं देयम् ? उत यत्र प्रभुत्वयोगेन स्वशब्दस्तदेव देयमिति । किं प्राप्तम् । अविशेषात् । माता पिता इत्येवमाद्यपि दातव्यम् । ननु दानमित्युच्यते स्वस्वत्वनिवृत्तिः, परस्वत्वापादनं च । तत्र पित्रादीनामशक्यं स्वत्वं निवर्त्तयितुम् । न हि कथञ्चित् पिता न पिता भवति । उच्यते । सत्यं न असौ न पिता भवति । शक्यते तु परविधेयः कर्त्तुम् । परस्वत्वापादनं च दानम् । अर्थाच्च स्वत्वत्यागः । तस्मात् सर्वं देयमिति ॥ १ ॥ पूर्व० ॥

## यस्य वा प्रभुः स्यादितरस्याशक्यत्वात् ॥ २ ॥

वाशब्देन पक्षो विपरिवर्त्तते । यस्य प्रभुत्वयोगेन स्वत्वं तदेव देयं नेतरत् । कस्मात् । प्रभुत्वयोगिनः शक्यत्वात् । इतरस्य चाशक्यत्वात् । न हि पित्रादीनां शक्यते स्वत्वं परित्यक्तुम् ॥ ननु चोक्तं, पराविधेयीकरणं तस्य शक्यमिति । उच्यते । प्रभुत्वयोगिनः स्वस्या-

ऽत्र दीयमानस्य सर्वत्वमुच्यते। नाऽप्रभुत्वयोगिनः स्वस्य दानम्।न चैतन्न्याय्यं, यत् पित्रादीनां परिचारकत्वम्। यस्य चैतन्न्याय्यमपि भवेत्, स दद्यादपि। अत्राह। ननु यत्र स्वशब्दो वर्त्तते, तद्देयमित्युक्ते पित्रादयो दातव्या गम्यन्ते। तस्मात् तान् प्रति प्रभुत्वाय स्मृतिं बाधित्वापि यतितव्यमिति। अत्रोच्यते। स्वशब्दोऽयमात्मीयधनज्ञातीनां प्रत्येकं वाचको, न समुदायस्य। तत्रात्मीये सर्वतायां कृतायां कृते शास्त्रार्थे न अशक्येषु ज्ञातिषु सर्वता कल्पनीया, नापि स्मृतिर्बाधितव्या। अपि च गवादीनामात्मीयानां चोदकेन प्राप्तौ सत्यामवश्यमात्मीयगता सर्वता उपादेया। तस्याश्चोपात्तायां कृतः शास्त्रार्थ इति ज्ञातीनामुपादाने न किञ्चित् कारणमस्ति। तस्माच्च पित्रादयो देयाः। तस्माद्यत्रैव प्रभुत्वयोगेन स्वत्वं, तदेव देयमिति ॥ २ ॥ सिद्धान्तः ॥ विश्वजिति पित्रादीनामदेयत्वाधिकरणम् ॥ १ ॥

## न भूमिः स्यात् सर्वान् प्रत्यविशिष्टत्वात् ॥ ३ ॥

अत्रैव सर्वदाने संशयः। किं भूमिर्देया ? नेति। का पुनर्भूमिरत्राभिप्रेता। यदेतन्मृदारब्धं द्रव्यान्तरं पृथिवीगोलकं, न क्षेत्रमात्रं मृत्तिका वा। तत्र किं प्राप्तम्। अविशेषाद्देया। प्रभुत्वसम्बन्धेन हि तत्र स्वशब्दो वर्त्तते। शक्यते च मानसेन व्यापारेण स्वस्य स्वता निवर्त्तयितुमिति। एवं प्राप्ते ब्रूमः। न भूमिर्देया इति। कुतः। क्षेत्राणामीशितारो मनुष्या दृश्यन्ते, न कृत्स्नस्य पृथिवीगोलकस्येति॥ आह। य इदानीं सार्वभौमः, स तर्हि दास्यति। सोऽपि नेति ब्रूमः। कुतः। यावता भोगेन सार्वभौमो भूमेरीष्टे, तावता अन्योऽपि। न तत्र कश्चिद्विशेषः। सार्वभौमत्वेऽस्य त्वेतदधिकं, यदसौ पृथिव्यां सम्भूतानां व्रीह्यादीनां रक्षणेन निर्विष्टस्य कस्यचिद् भागस्य ईष्टे, न भूमेः। तन्निर्विष्टाश्च ये मनुष्यास्तैरन्यत् सर्वप्राणिनां धारणविक्रमणादि यद् भूमिकृतं, तत्रेशित्वं प्रति न कश्चिद्विशेषः। तस्मान्न भूमिर्देया ॥ ३ ॥ विश्वजिति पृथिव्या अदेयत्वाधिकरणम् ॥ २ ॥

## अकार्य्यत्वाच्च ततः पुनर्विशेषः स्यात् ॥ ४ ॥

विश्वजित्येव सन्देहः। किमश्वादयो देयाः, न ? इति। किं प्राप्तम्। सर्वस्य विहितत्वाद्, देया अश्वा इति। एवं प्राप्ते ब्रूमः। यस्य च दानमकार्य्यं, तच्च न देयम्। यथा अश्वानाम्। तेषां हि दान-

प्रकार्य्यम् । एष हि विशेषोऽश्वानामन्येभ्यो द्रव्येभ्यो, यदेषां दानं प्रतिषिद्ध्यते, न केसरिणो ददाति, न उभयतोदतः प्रतिगृह्णातीति विश्वजिति एव समाम्नायते । तस्मान्न अश्वा देया इति ॥ ४ ॥ ॥ विश्वजिति अश्वादीनामदेयताधिकरणम् ॥ ३ ॥

## नित्यत्वाच्चानित्यैर्नास्ति सम्बन्धः ॥ ५ ॥

विश्वजित्येव सन्देहः । सर्वस्वं ददाति इति । किमर्ज्जयित्वोपकरणानि यावन्ति मनुष्यस्य, यावन्ति च शक्नोत्युपार्जयितुं, सर्वाणि तानि दद्यात् कृतभाण्डादीनि, उत यान्येवास्य विद्यन्ते, तानि सर्वाणि देयानि, न अविद्यमानानि कर्त्तव्यानि ? इति । कुतः संशयः । उभयथा वचनव्यक्तेः सम्भवात् । यदि वा एवं वचनं व्यज्ज्यते, यानि सर्वाणि स्वानि । कानि तानि । यानि पुरुषस्योपकारकाणि शयनादीनि । तानि सर्वाणि दद्यादिति विधीयते । यद्वा यानि स्वानि पुरुषस्य दाने शक्यानि, तानि सर्वाणीति सर्वत्वं विधीयते । यदि दानं विधीयते, ततोऽप्राप्तदानानां कृतभाण्डकानामपि दानम् । अथ सर्वता विधीयते, ततो विद्यमानानामेव ॥ किं तावत् प्राप्तम् । कृतभाण्डकानि देयानीति । तथा दानविधाने श्रुतिरनुगृह्यते, इतरथा वाक्यम् । तयोश्च श्रुतिर्बलीयसी । तस्मात् कृतभाण्डकानि देयानीति ॥ एवं प्राप्ते ब्रूमः । नित्यत्वाच्च अनित्यैर्नास्ति सम्बन्धः । चशब्दोऽन्वादेशे, न अश्वा दातव्या इत्युक्तम् । कृतभाण्डकानि च न देयानीति । नित्यं हि विश्वजिति दानं चोदकेन प्राप्तमनूद्यते । अनित्यानि च कृतभाण्डकानि न शक्यानि सर्वाणि विश्वजिति क्रियमाणे उपसंहर्तुम् । तत्र कृतभाण्डकानां केषाञ्चिदुत्पत्तिं विश्वजिति दानं प्रतीक्षेत । नैमित्तिकं तत् स्याद्, न नित्यम् । नित्यवच्च तत्, चोदकेन विधीयते, न निमित्तसंयोगेन । तस्मादवश्यमेतदभ्युपगन्तव्यम् । साकल्यं देयानां प्राप्तानां विधीयते इति श्रुत्यसम्भवे च वाक्यार्थो ग्रहीतव्य एव भवति । तस्मान्न कृतभाण्डकानि दातव्यानि ॥ ५ ॥ विश्वजिति विद्यमानानामेव सर्वस्वानां दानाधिकरणम् ॥ ४ ॥

## शूद्रश्च धर्मशास्त्रत्वात् ॥ ६ ॥

विश्वजित्येव सन्दिह्यते । किं परिचारकः शूद्रो देयः, न ? इति। किं प्राप्तम् । सर्वस्य स्वस्य विहितत्वाद्देय इति । एवं प्राप्ते ब्रूमः ।

शूद्रश्च न देय इत्यन्वादेशः । कुतः । धर्म्मशास्त्रत्वात् । धर्म्मशासनोपनतत्वात् तस्य । एवमसौ तस्मै त्रैवर्णिकायोपनत इमं शुश्रूषमाणो धर्मेण सम्भन्त्स्यते इति । सोऽन्यस्मै दीयमानो नेच्छेदपि । न चानिच्छतस्तस्य स प्रभवति । न च बलात् स्वीकर्त्तव्य । यस्त्वन्यायेन स्वीकुर्य्यात्, स दद्यादपि । धर्म्मोपनतमात्रेण तु न शक्यो दातुम् ॥६॥ विश्वजिति धर्मार्थसेवकशूद्रस्यादेयताधिकरणम् ॥ ५ ॥

**दक्षिणाकाले यत् स्वं तत्प्रतीयेत तद्दानसंयोगात् ॥७॥**

विश्वजित्येव सन्देहः । किं प्राग्दक्षिणाकालाद् विद्यमानं नियोगतो दक्षिणाकाले निधातव्यम्, ऊर्ध्वं च दक्षिणाकालाद् भविष्यदऽनागतमपि दक्षिणाकाले देयम् ? उत यदेव दक्षिणाकाले विद्यते तदेव देयमिति । किं प्राप्तम् । यस्यापि प्रागूर्ध्वं च स्वता, तदपि देयम् । स्वमात्रस्य दानविधानात् । एवं प्राप्ते ब्रूमः । दक्षिणाकाले यत् स्वं विद्यते तदेव देयं, न यत् प्रागूर्ध्वं च । कुतः । स्वस्यात्र दानमनूद्य साकल्यं विधीयते । तच्च दानं दक्षिणाकाले प्राप्तत्वात् तस्मिन्नेव कालेऽनूद्यते । तस्माद्दक्षिणाकाल एव विद्यमानं देयमिति ॥ ७ ॥ विश्वजिति दक्षिणाकाले विद्यमानानामेव सर्वस्वानां देयताधिकरणम् ॥ ६ ॥

**अशेषत्वात्तदन्तः स्यात् कर्म्मणो द्रव्यसिद्धित्वात् ॥८॥**

तस्मिन्नेव विश्वजिति सन्देहः । किं दक्षिणाकाले एव विश्वजिदुत्स्रष्टव्यः, उत न सर्वं दातव्यं, परिसमापनीयः ? इति । किं प्राप्तम् । उत्स्रष्टव्य इति । कुतः । अशेषत्वात् । कथमशेषता । विश्वजिति सर्वस्वं ददातीति । न च शक्यमन्तरेण द्रव्यं, परिसमापयितुम् । तस्मात्तदन्तः स्यात् ॥ ८ ॥

**अपि वा शेषकर्म स्यात् क्रतोः प्रत्यक्षशिष्टत्वात् ॥९॥**

अपि वेति पक्षव्यावृत्तिः । शेषकर्म्म स्यात् । न सर्वस्वं दक्षिणाकाले देयं, यावता तत् कर्म परिसमाप्यते, तावच्छेषयितव्यम् । कुतः । क्रतोः प्रत्यक्षशिष्टत्वात् । क्रतोः परिसमाप्तिः प्रत्यक्षशिष्टा । विश्वजिता यजेतेति विश्वजितमुपक्रम्य, परिसमापयेदित्यर्थः । परिसमापयता यच्छक्यते दातुं, तावत् सर्वमित्यर्थः । तस्मान्न तदन्तमुत्स्रष्टव्यमिति ॥ ९ ॥ पूर्व० ॥

**तथा चान्यार्थदर्शनम् ॥ १० ॥**

एवञ्च कृत्वाऽन्यार्थदर्शनमुपपद्यते । अवभृथादुदेत्य वत्सत्वचमाच्छादयतीति शेषे सति अवकल्पते ॥ १० ॥ युक्तिः ॥

**अशेषं तु समञ्जसादानेन शेषकर्म स्यात् ॥ ११ ॥**

तुशब्दः पक्षं व्यावर्त्तयति । एतत् समञ्जसाभूतं, यद् अशेषं प्रदीयते इति । एवं सर्वस्वं ददातीति शब्द उपपन्नो भवतीति । यत्तु प्रत्यक्षा समाप्तिरिति । तत्र ब्रूमः।आदानेन शेषकर्म्म भविष्यतीति॥११॥

उच्यते—

**नादानस्य नित्यत्वात् ॥ १२ ॥**

आदानं त्वनित्यम् । नित्यं च शेषकर्म । न हि तयोः सम्बन्धोऽवकल्पते । तस्माच्छेषयितव्यं किञ्चिदिति ॥ १२ ॥ आ० नि० ॥

**दीक्षासु तु विनिर्देशादक्रत्वर्थेन संयोगस्तस्माद् अविरोधः स्यात् ॥ १३ ॥**

तुशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति किञ्चिच्छेषयितव्यमिति । दीक्षासु तु विनिर्देशो भवति, प्रकृतौ एव ज्योतिष्टोमे । स इह चोदकेन प्राप्तः । इदं क्रत्वर्थमिदं भक्ष्यार्थमिदम् आनमनायेति । तदिह यद् आनमनाय दातव्यं, तस्यायं विकारः सर्वता नाम । कुत एतत् । यतः स्वं ददातीत्यनूद्यते, सर्वतैव विधीयते । तेन, न अदातव्यस्य दानं विधीयते । न च भक्ष्यार्थं क्रत्वर्थं च दातव्यम् । तस्मादविरोधो भविष्यतीति ॥ १३ ॥ सिद्धान्तः ॥ विश्वजिति दक्षिणादानोत्तराङ्गानामनुष्ठानाधिकरणम् ॥ ७ ॥

**अहर्गणे च तद्धर्मा स्यात् सर्वेषामविशेषात् ॥ १४ ॥**

अस्त्यहर्गणोऽष्टरात्रः । अथैतस्याष्टरात्रस्य विश्वजिदभिजितौ एकाहावभितः, उभयतो ज्योतिर्मध्ये षडहः, पशुकामो हि एतेन यजेतेति । तत्र सन्देहः । किमहर्गणस्थस्यापि सर्वस्वमेव दक्षिणा स्याद् ? आहो द्वादशं शतमिति । किं प्राप्तम् । सर्वस्वम् । कुतः । सर्वेषां विश्वजितामविशेषाद् य एव प्रकृतौ विश्वजितो धर्म्मः, स एव चास्य चोदकेन भविष्यति । तस्मात् सर्वस्वं देयमिति॥१४॥ सि०

**द्वादशशतं वा प्रकृतिवत् ॥ १५ ॥**

द्वादशशतं वा देयमिति । प्रकृतिवत् कर्त्तव्यम् । ज्योतिष्टोमश्च प्रकृतिः । तत्र धर्मा विहिताः, न विश्वजिति कृत्स्नाः प्रतीयन्ते । तस्माद् द्वादशशतमत्र देयमिति ॥ १५ ॥ पूर्व० ॥

अतद्गुणत्वात्तु नैवं स्यात् ॥ १६ ॥

तुशब्दः पक्षं व्यावर्त्तयति । नैवं भवितुमर्हति । कुतः । नैव यतो विश्वजितो गुणो द्वादशशतम् । नामधेयेन हि अत्र धर्मग्रहणम् । तस्माद् विश्वजितो भविष्यति, न ज्योतिष्टोमादिति ॥ १६ ॥

लिङ्गदर्शनाच्च ॥ १७ ॥

लिङ्गं खल्वपि दर्शयति । किं लिङ्गं भवतीति । एवमाह । हीयते वा एष पशुभिर्यो विश्वजिति सर्वं न ददातीति नियतं सर्वस्वदानं दर्शयत्यहर्गणे ॥ १७ ॥ ॥ युक्तिः ॥ अहगर्णस्थेऽपि विश्वजिति सर्वस्वदानाधिकरणम् ॥ ८ ॥

विकारः सन्नुभयतोऽविशेषात् ॥ १८ ॥

विश्वजिति सर्वस्वं ददातीति । तत्रैषोऽर्थः सांशयिकः । किं यस्य द्वादशशतम् अधिकम्, ऊनं वा विद्यते तस्यापि विश्वजिता अधिकारः ? उत यस्य सकलमधिकं वा तस्यैवेति । किं प्राप्तम् । विकारः सन्नुभयतोऽविशेषात् । न विशेषः कश्चिदाश्रीयते । यस्य द्वादशशतमधिकम्, ऊनं वाऽस्तीति । तस्मात् सर्वस्य विश्वजिता अधिकार इति ॥ १८ ॥ पूर्व० ॥

अधिकं वा प्रतिप्रसवात् ॥ १९ ॥

न चैतदस्ति, सर्वस्य विश्वजिता अधिकार इति । कस्य तर्हि । यस्य द्वादशशतमस्ति, अधिकं वेति । कुतः । प्रतिप्रसवात् । प्रतिप्रसवो हि ज्योतिष्टोमे सर्वस्वस्योच्यते । द्वादशशतं विधाय आह, एतावता वा व ऋत्विज आनेया अपि वा सर्वस्वेनेति । यद्येतावता नेच्छेयुः, सर्वस्वेनाप्यानमयितव्या इति । तद्यदि द्वादशेन शतेन नेच्छन्ति नेच्छान्तितरां ततो न्यूनेन । तस्माद् द्वादशशतं ज्योतिष्टोमे । यद्वा सर्वस्वम् । तदिहोभयमपि प्राप्तम् । तत्रैकः पक्षो नियम्यते, सर्वस्वं देयमिति । स एष न विधिः । प्राप्तत्वात् । अनियतप्राप्तस्तु नियम्यते। स चेन्नियम्यते, यादृशस्तत्र, तादृश एवेह । तत्र च द्वादशशतमधिकं वा सर्वस्वम् । इहापि तद्वदेव । तस्मान्न न्यूनधनस्य अधिकार

इति ॥ १९ ॥ सि० ॥

## अनुग्रहाच्च पादवत् ॥ २० ॥

चशब्देन अन्वाचयः । इतश्च अधिकं सर्वस्वम् । अधिके हि दीयमाने तदन्तर्गतत्वाद् द्वादशशतमपि दत्तं भवति । पादवत् । यथा, कार्षापणे दीयमाने पादोऽपि दत्तो भवति । एवमिहापीति ॥ ॥ २० ॥ युक्तिः ॥ विश्वजिति द्वादशशतन्यूनधनस्यानधिकाराऽधिकरणम् ॥ ९ ॥

## अपरिमिते शिष्टस्य सङ्ख्याप्रतिषेधस्तच्छ्रुतित्वात् ॥ २१ ॥

आधाने श्रूयते— एका देया, षड् देयाः, द्वादश देयाश्चतुर्विंशतिर्देयाः, शतं देयं, सहस्रं देयम्, अपरिमितं देयमिति । तत्र सन्देहः । किं यत् परिमितमेका देयेत्येवमादि, तन्न दातव्यमिति प्रतिषेधो विधीयते ? उत अपरिमितं नाम किञ्चित् तस्य दानं विधीयते इति । किं प्राप्तम् । अपरिमिते श्रूयमाणे ब्रूमः । शिष्टस्यैकादेः सङ्ख्येयस्य या सङ्ख्या, सा प्रतिषिध्यते । कुतः । तच्छ्रुतित्वात् परिमितशब्दश्रवणाद् गणितमवगम्यते । तच्चैकादिकम् । तस्य नशब्देन प्रतिषेधः क्रियते । तत्र श्रुतोऽर्थः कृतो भवति । इतरथा अपरिमितशब्दे प्रसिद्धिस्त्यज्येत । लक्षणया बहुत्वमस्यार्थः कल्प्येत । तस्मात् परिमितस्य प्रतिषेध इति ॥ २१ ॥ पूर्व० ॥

## कल्पान्तरं वा तुल्यवत् प्रसङ्ख्यानात् ॥ २२ ॥

कल्पान्तरं वा स्यात् । अपरो दानकल्पो विधीयते । यथा एका देयेति दानविधिकल्पः । एवम् एषोऽपि दानविधिकल्प एव स्यात् । तेन हि पूर्वेण, तुल्यमेव इदं प्रसङ्ख्यायते । का अस्य पूर्वेण तुल्यता । प्रतिज्ञातस्यार्थस्यावगमिका श्रुतिरस्तीति । पूर्वत्र हि देयशब्दश्रुत्या दानं विधीयते इति । इहापि देयशब्दश्रुतिः । सा श्रूयमाणा शक्नोति दानं विधातुम् । प्रतिषेधे हि विधीयमाने वाक्यस्य व्यापारः । तच्च दुर्बलं श्रुतिं प्रति । तस्मात् कल्पान्तरम् । यच्चापरिमितशब्दे प्रसिद्धिर्बाध्यते इति, समुदायप्रसिद्धिरवयवप्रसिद्धेर्बाधिकैव समधिगता ॥ ननु नात्र प्रसिद्धिः । लक्षणेयम् । यद् बहु, तद् न शक्यं परिमातुम् । तस्मादपरिमितत्वेन लक्ष्यते बहुत्वमिति । तच्च नानेकस्मिन्नशक्य-

परिमाणे सति बहुषु रूढः । अपरिमितमस्य धनम् । बहु इति गम्यते । यथा, कुशलः, प्रवीण इति बहुषु कुशानां लातुर्गुणेषु सत्सु निपुणतायामेव कुशलशब्दो रोहाद्रूढिशब्द एव भवति । बहुषु च वीणावादस्य गुणेषु सत्सु निपुण एव प्रवीणशब्दो वर्त्तमानो रूढ इत्युच्यते । तस्मात् सत्यपि लक्षणात्वे श्रुतिसामर्थ्याद् रोहति शब्दः। तस्मात् समुदायप्रसिद्ध्या अपरिमितशब्देऽवयवप्रसिद्धिर्बाध्यते। अश्वकर्णशब्दवत् । अतः कल्पान्तरमिति ॥ २२ ॥ सिद्धान्तः ॥ आधानेऽपरिमितं देयमित्यनेन सङ्ख्यान्तरविधानाधिकरणम् ॥ १० ॥

## अनियमोऽविशेषात् ॥ २३ ॥

अपरिमिते कल्पान्तरमिति समधिगतम् । अथेदानीं सन्दिह्यते । किं सहस्रादूनमपरिमितम्, उत सहस्रादधिकमिति । किं तावत् प्राप्तम् । अनियमोऽविशेषात् । न कश्चिदिह बहुत्वे विशेषमाश्रीयते, सहस्रादूनमधिकं वेति । अनाश्रीयमाणे यथा कृतं तथा साधु । तस्मादनियमः ॥ २३ ॥ पूर्व० ॥

## अधिकं वा स्याद् बह्वर्थत्वादितरेषां सन्निधानात् ॥२४॥

वा इति पक्षव्यावृत्तिः । नैतदस्ति । अधिकम् ऊनं वा सहस्रादिति । किं तर्हि । अधिकमेवेति । कुतः । बह्वर्थत्वादपरिमितशब्दस्य । बहुषु हीनशब्दमुपचरन्तीत्येतदुक्तम् । बहुत्वं चाऽऽपेक्षिकं, किञ्चिदपेक्ष्य ततोऽधिकं बहु इत्युच्यते । असत्यामपेक्षायामपरिपूर्णमेतत् । यथा पुत्र इति किञ्चिदपेक्ष्य भवति, नान्यथा । तत्र प्रकृतं सन्निहितं चापेक्ष्य निर्णयः । सहस्रं च सन्निहितम् । तस्मात् ततोऽधिकमपरिमितमिति ॥ २४ ॥

## अर्थवादश्च तद्वत् ॥ २५ ॥

कथमेवम् । तत्रोत्कृष्टं वै अपरिमितमिति तदूनतां सहस्रस्य दर्शयति ॥ २५ ॥ युक्तिः ॥ अपरिमितशब्देन सहस्राऽधिकस्य ग्रहणाऽधिकरणम् ॥ ११ ॥

## परकृतिपुराकल्पं च मनुष्यधर्मः स्यादर्थाय ह्यनुकीर्त्तनम् ॥ २६ ॥

इह परकृतयः पुराकल्पाश्चोदाहरणम् । यथा, इति ह स्माह बर्कुर्वार्ष्णिर्माषान्मे पचत न वा एतेषां हविर्गृह्णन्तीति । पुराकल्पः,

उद्गमुकैर्हं स्म पूर्वे समाजग्मुस्तान् ह असुरा रक्षांसि निर्जघ्नुरित्येव- मादयः । तेषु सन्देहः । किमेते मनुष्यधर्मा विधयः, उत तद्गोत्राणा- म् । अथ वा अर्थवादा इति । किं तावत् प्राप्तम् । मनुष्यधर्मा विध- य इति । कुतः । अर्थाय प्रयोजनाय अनुकीर्त्तनमेतद् भवति । कर्तृ- मनुष्यसम्बन्धकीर्त्तनेन क्रिया प्रशस्ता भवति । प्रशस्तं च प्रति- पाद्यम् । स एष विधिरेव, अनेन प्रकारेण । अतः परैरपि मनुष्यैः कर्त्तव्य इति गम्यते ॥ २६ ॥

## तद्युक्ते च प्रतिषेधात् ॥ २७ ॥

एवञ्जातीयकस्य विधेः प्रतिषेधो भवति । तत्तु तथा न कुर्य्यादि- ति । प्रसक्तस्य च प्रतिषेधो न्याय्यः । तस्मादपि विधय इति ॥ २७ ॥

## निर्देशाद्वा तद्धर्मः स्यात् पञ्चावत्तवत् ॥ २८ ॥

मनुष्यधर्मोऽयं विधिरेवञ्जातीयक इति गृह्यते । तत्र तु विशिष्ट- गोत्राणां निर्देशात् तेषामेव धर्म्म इति गम्यते । स्तुत्या हि अयं कर्त्तव्य इति ज्ञायते । स च विशिष्टगोत्राणां श्रूयते । तस्मात् तद्गोत्राणा- मेव कर्त्तव्यः । पञ्चावत्तवत् । यथा, पञ्चावत्तं जमदग्नीनामिति तद्गोत्राणामेव भवति, एवमिहाऽपीति ॥ २८ ॥

## विधौ तु वेदसंयोगादुपदेशः स्यात् ॥ २९ ॥

तुशब्दादेषोऽपि पक्षो व्यावर्त्तते । विधौ एतेषामुपदेशः स्यात् । विधौ वेदेन स्तुतिनिर्देशः कृतः । न विध्याश्रये पुरुषे । पुरुषग्रहणं विधिप्रशंसार्थम् । विधिरिति क्रियामाह । एतस्याः क्रियाया भावो य- स्मादनेन पुरुषेण क्रियते तस्मात् साधुरिति । न त्वत्र पुरुषः क्रिया- सम्बन्धेन निर्दिश्यते, किन्तु स्तोतव्यत्वेन । कुत एतत् । स्तुतिपद- स्यान्यस्याभावात् । अपि च क्रियानिर्देशे श्रुत्या विधानम् । क्रिया- पुरुषसम्बन्धनिर्देशे वाक्येन । अतश्च दुर्बलम् । तस्मात् पुरुषमात्र- स्य विधानं प्राप्नोति, न तद्गोत्राणामिति ॥ २९ ॥ पूर्व० ॥

## अर्थवादो वा विधिशेषत्वात्तस्मान्नित्या- ऽनुवादः स्यात् ॥ ३० ॥

एषोऽपि पक्षो वाशब्दाद् विनिवृत्तः । नायं तद्गोत्राणां विधिः, न मनुष्यमात्रस्य वा विधिः, विधिरेव वेति । अयमर्थवादस्तु । कुतः ।

विधिशेषत्वात् । अन्यं त्वत्र विधिमामनन्ति । परकृत्युदाहरणे तावत्, तस्मादारण्यमेवाश्नीयादिति । पुराकल्पोदाहरणे, गृहपतेरेवाग्निषु निर्मथ्य निर्वपेरन्निति । न च द्वयोर्विध्योरेकवाक्यभावोऽस्ति । विधिना हि सम्बद्ध्यमानयोः परकृतिपुराकल्पवचनयोरन्या वचनव्यक्तिः । अन्या तु स्तुत्यर्थप्रवृत्तयोः । न चोभयं यौगपद्येन सम्भवति । तस्मादर्थवाद इति ॥ ३० ॥ सिद्धान्तः ॥ इति ह स्मेत्यादिपरकृतिपुराकल्पानामर्थवादताधिकरणम् ॥ १२ ॥

## सहस्रसंवत्सरं तदायुषामसम्भवान्मनुष्येषु ॥ ३१ ॥

अस्ति सहस्रसंवत्सरं, पञ्चपञ्चाशतस्त्रिवृतः संवत्सराः, पञ्चपञ्चाशतः पञ्चदशाः, पञ्चपञ्चाशतः सप्तदशाः, पञ्चपञ्चाशत एकविंशा विश्वसृजामयनं सहस्रसंवत्सरमिति । तत्र सन्देहः । किं ये सहस्राऽऽयुषस्तेषामनेन अधिकारः, उत मनुष्याणामिति । यदापि मनुष्याणां तदापि बहवो विकल्पाः वक्ष्यमाणाः, अथवा दिवसेषु संवत्सरशब्दः? इति । किं प्राप्तम् । सहस्रायुषां भवितुमर्हति । कुतः । असम्भवान्मनुष्येषु । न मनुष्याणामेतावदायुर्विद्यते । गन्धर्वादयस्त्वेतावदायुष इति भवति स्मृतिः । उपचारोऽन्यार्थदर्शनं च । प्रजापतिं वै प्रजाः सृजमानं पाप्मा मृत्युरभिजघान, स तपोऽतप्यत, सहस्रसंवत्सरान् पाप्मानं विजिहासन्निति । विस्पष्टं चेदं सहस्रसंवत्सरम् । तस्मान्न मनुष्याणामिति ॥ ३१ ॥

## अपि वा तदधिकारान्मनुष्यधर्मः स्यात् ॥ ३२ ॥

अपि वेति पक्षव्यावृत्तिः । न गन्धर्वादीनाम् । मनुष्याणामेव अधिकार इति । कुतः । तदधिकारात् । मनुष्याधिकारं शास्त्रं समधिगतमिति । ते हि शक्नुवन्ति कार्त्स्न्येन यथोदितं विधिमुपसंहर्तुमिति । आह । ननु नैतावदायुषो मनुष्याः । उच्यते । रसायनैरायुर्दीर्घं प्राप्स्यन्तीति ॥ ३२ ॥ पूर्व० ॥

## नासामर्थ्यात् ॥ ३३ ॥

न रसायनानामेतत् सामर्थ्यं दृष्टं, येन सहस्रसंवत्सरं जीवेयुः । एतानि हि अग्नेर्वर्द्धकानि, वलीपलितस्य नाशकानि स्वरवर्णप्रसादकानि, मेधाजननानि । नैतावदायुषो दातॄणि दृश्यन्ते । ननु स्वरवर्णप्रसादादिदर्शनादेव ज्योग्जीवनमप्यनुमास्यते । नेति ब्रूमः । शतायुर्वै

पुरुष इत्यनुवादः । स एवं ज्योग्जीवे न अवकल्पते । अत्रोच्यते। शतान्यायुरस्येति विग्रहीष्यामः। नैवं सङ्ख्याशब्दानां समास दृष्यते। न च गमकानि भवन्ति। द्विवचनबहुवचनान्तानामसमास इति चाभियुक्तवचनात् ॥ ३३ ॥

## सम्बन्धादर्शनात् ॥ ३४ ॥

न हि एतावदायुषा रसायनानां सम्बन्धो दृष्टपूर्वः। न च सम्बन्धादर्शनेऽनुमानमस्ति । ननु सामान्यतो दृष्टं भविष्यति । दृश्यन्ते तावद् अल्पस्य स्थिरभावस्य कारकाणि। एवमभ्यस्यमानानि वीर्यवत्तमानि स्थिरशरीरतामुत्पादयिष्यन्ति । शतायुः पुरुष इति सवत्यपि वचने, अधिकं जीवनं दृश्यते एवेति। अत्रोच्यते। न अयमेकान्तः। कदाचिद् याश्च यावन्तीश्च शरीरस्थिरतामुत्पादयेयुः, न प्रागप्यदृष्टकालाम् । यथा प्रक्रामन्तोऽभ्यासात् प्रक्रमाणां वृद्धेर्याश्च यावन्तीश्च मात्रां प्राप्नुवन्ति, न त्वभ्यस्यन्तः पुरुषायुषेणापि योजनमात्रं प्रक्रमेयुः । एवमिहापि सम्बन्धाभावात् सहस्रायुष्ट्वं प्राप्नुयुर्न वेति सन्दिग्धम् । सन्दिग्धं चेत्, सामान्यतो दृष्टं न प्रमाणम् । न चादृष्टोऽर्थः प्रमाणमन्तरेण, शक्योऽभ्युपगन्तुम् । तस्मादसंशयं, नैतावदायुषः सन्तीति पुरुषवचनेनोक्तम्। कथं तर्हि ? इति ॥ ३४ ॥ पूर्वपक्षनिरासः ॥

## स कुलकल्पः स्यादिति कार्ष्णाजिनिरेकस्मिन्नसम्भवात् ॥ ३५ ॥

स मनुष्याधिकारपक्षे कुलकल्पो भविष्यतीत्येवं कार्ष्णाजिनिराचार्यो मन्यते स्म । कुतः। एकस्मिन्नसम्भवात्। पुरुषाणामिदमनुशासनम्। न चैतदेकः शक्नोति पारयितुम्। यथा शक्यते, तथा पारयितव्यमिति गम्यमाने, बहवः शक्नुवन्तः प्रवर्त्तेरन् । अन्येऽपि तत्कुलीना अन्येनारब्धं समापयेयुरिति ॥ ३५ ॥ पूर्व० ॥

## अपि वा कृत्स्नसंयोगादेकस्यैव प्रयोगः स्यात् ॥ ३६ ॥

शास्त्रफलं हि प्रयोक्तरि समधिगतम् । यश्च कात्स्न्र्येन विधिमुपसंहर्त्तुं समर्थः स एव अधिक्रियते इति । तस्मान्न कुलकल्पोऽवकल्प्यते। कथं तर्हि । सम्प्रदायमात्रेण धर्म्म इत्यध्यवसीयते। एवं श्रूयते। स्वाध्यायोऽध्येतव्य इति। एवं तर्हि एतदध्यवसेयम्। वचन-

प्रामाण्यादेतत् कर्म्म कुर्वताम् आयुर्वर्द्धते इति । तच्च न । प्रमाणाभावात् । न हि एतस्मिन् अर्थे वाक्यमन्यद्वा प्रमाणमस्ति । नन्वर्थापत्तिः, अन्यथा आनर्थक्यं भविष्यतीति । उच्यते । न आनर्थक्यम् । अध्ययनादेव हि अदृष्टं भविष्यति । तथा हि सामान्येन अदृष्टं कल्पयितुं लघीयो, न तु कर्म्मणा आयुर्वर्द्धते इति विशेषादृष्टकल्पना। अथ वा आनर्थक्यमेव अभ्युपगम्येत, न अयुक्ति फलं कल्प्यम् । अथोच्येत— अर्द्धतृतीयानि दीक्षिष्यन्ते, चतुर्भिर्वर्षैः समाप्यन्ते इति । एवमपि नियतपरिमाणं हीयते, चतुर्विंशतिपरमाः सप्तदशावराः सत्रमासीरन्निति । वचनस्य तु आनर्थक्यपरिहाराय परिमाणं ह्रापयिष्यते इति चेत् । तदयुक्तम् । अध्ययनात् फलमस्ति । तस्मान्नैषा कल्पनेति ॥ ३६ ॥ पूर्वपक्षनिरासः ॥

कथं तर्हि ? । एवम्—

## विप्रतिषेधात्तु गुणान्यतरः स्यादिति लावुकायनः॥३७॥

अन्यतरोऽत्र गौणः शब्दः स्यात् । यदि वा असंवत्सरे संवत्सरशब्दः । यदि वा पञ्चपञ्चाशतः—इति शब्दो गौण इति । कुत एतत् । विप्रतिषेधात् । विप्रतिषेधो हि भवति, उभयस्मिन् विहिते । कथम् । वाक्यं हि भिद्येत । यदि पञ्चपञ्चाशतस्त्रिवृतः, न संवत्सराः । अथ संवत्सरास्त्रिवृतः, न पञ्चपञ्चाशतः । तस्माद् विरोधादन्यतरद् वचनं गौणमिति लावुकायन आचार्य्यो मन्यते स्म । आचार्य्यग्रहणं पूजार्थं, नात्मनः प्रतिषेधार्थम् ॥ ३७ ॥

## संवत्सरो विचालित्वात् ॥ ३८ ॥

एतदुक्तम्, अन्यतरद् गौणमिति । तदवधारयितव्यम् । तदुच्यते, संवत्सरवचनं गौणम् इति । कुतः ? । विचालित्वात् । विचाली हि संवत्सरशब्दः सावनोऽपि गणितदिवसकः, शीतोष्णवर्षालक्षणोऽपि, चान्द्रमसोऽपि । स एवंलक्षणकोऽनुवादः शक्यते कल्पयितुम् । पञ्चपञ्चाशत इत्ययन्तु व्यक्तपरिमाणस्यार्थस्य वाचकः, एकेनाऽप्यूने न भवति ॥ ३८ ॥ सिद्धान्ते उपक्रमः ॥

## सा प्रकृतिः स्यादधिकारात् ॥ ३९ ॥

गवामयने मासाः प्रकृताः, मासेषु च संवत्सरशब्द उक्तः । यो वै मासः संवत्सर इति । तस्मात् पञ्चपञ्चाशतो मासा इति । ननु

एतस्मिन् पक्षे सहस्रसंवत्सरशब्दो न अवकल्पते । उच्यते । नामधेयमेतत् सहस्रसंवत्सरशब्द इति, न गुणविधिः । नामधेयं च न विधीयते । अविधीयमानश्च येन केनचिद् अवकल्प्यते ॥

नैषोऽपि पक्षो युज्यते । अत्रापि हि स एव दोषः । न तावज्जीवनमस्ति, यावतैतद् अवकल्प्येत, दाराग्निकालसोमपूर्वत्वापेक्षयेति । तेनैतस्मिंश्च क्रियमाणेऽपरिसमाप्ते एवायुः पर्य्युपयुक्तं स्यात् । तथाच अध्ययनादेव अदृष्टं कल्प्येत । एवं तर्हि, द्वादशाहः प्रकृतिरिति पञ्चपञ्चाशतो द्वादशाहा भविष्यन्ति इति । तथाच दृश्यते, द्वादश वै रात्रयः संवत्सरस्य प्रतिमा इति । तत्र स दोषो न भविष्यति । नैवम् । तत्र संवत्सरशब्दस्य साक्षात् प्रतिमाशब्देन संयोगात् । अपि च, पञ्चपञ्चाशतस्त्रिवृत इत्युक्तम् । त्रिवृच्छन्दश्च द्वादशाहे दिवसे दृष्टः, न द्वादशरात्रे । तस्माद् नैवम् ॥ ३९ ॥ पूर्व० ॥

## अहानि वाभिसङ्ख्यत्वात् ॥ ४० ॥

वाशब्दः पक्षं व्यावर्त्तयति । न चैतदस्ति । पञ्चपञ्चाशतो द्वादशरात्रा इति । अहान्येव त्रिवृच्छन्देनाख्यायन्ते । तस्मादहःसु संवत्सरशब्द इति । अथवा, वाशब्दः पक्षान्तरं व्यावर्त्तयति । न पञ्चपञ्चाशतो मासाः, किन्तर्हि दिवसाः । द्वादशाहे त्रिवृद् अहः प्रकृतम् । तत्र संवत्सरशब्दो दृश्यते । आदित्यो वा सर्व ऋतवः, स यदैवोदेत्यथ वसन्तो, यदा सङ्गवोऽथ ग्रीष्मो, यदा मध्यन्दिनोऽथ वर्षा, यदाऽपराह्णोऽथ शरत्, यदाऽस्तमेत्ययं हेमन्तशिशिरौ इति सर्वान् ऋतून् अहनि सम्पादयति । सर्वे च ऋतवः संवत्सरः । तस्माद् अहः संवत्सरशब्देनोच्यते । अपिच पञ्चपञ्चाशास्त्रिवृत इति त्रिवृतां पञ्चपञ्चाशत्त्वम् । न च द्वादशरात्रस्त्रिवृत् । एकं हि द्वादशाहे त्रिवृद् अहः । न तत्र त्रिवृत्सङ्ख्याया द्वादशरात्रेण मुख्यया वृत्त्या सामानाधिकरण्यम् । त्रिवृदहःसम्बन्धलक्षणया स्याद् अभिसङ्ख्यं त्रिवृदहः । तेन श्रुत्यैव सामानाधिकरण्यम् । श्रुतिश्च लक्षणाया ज्यायसी । तस्मात् पञ्चपञ्चाशदहानि संवत्सरः स्यादिति ॥ ४० ॥ सिद्धान्तः ॥ सहस्रसंवत्सरशब्दस्य सहस्रदिनपरताऽधिकरणम् ॥ १३ ॥ इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्य अध्यायस्य सप्तमः पादः संपूर्णः ॥ ६ ॥ ७ ॥

अथ षष्ठे अध्याये अष्टमः पादः ॥ ६ ॥ ८ ॥

**इष्टिपूर्वत्वादक्रतुशेषो होमः संस्कृतेष्वग्निषु स्यादपूर्वोऽप्याधानस्य सर्वशेषत्वात् ॥ १ ॥**

इह चतुर्होतृष्वाम्नायते, प्रजाकामं चतुर्होत्रा याजयेच्चतुर्गृहीतमाज्यं गृहीत्वा चतुर्होतारं व्याचक्षीत पूर्वेण ग्रहेणार्द्धं जुहुयात्, तदुत्तरेणार्द्धम् इति । तत्र संदेहः । किं पवमानेष्टिसंस्कृतेषु अग्निषु एवमादयः, उत असंस्कृतेष्वपि ? । तथा पक्षान्तराश्रयणमपि वक्ष्यमाणं विचारयिष्यते । किं तावत् प्राप्तम् ? संस्कृतेषु अग्निषु एवञ्जातीयकोऽक्रतुशेषोऽपि होमः स्यात् । यद्यप्यपूर्वा दर्विहोमा न कुतश्चिद्धर्मान् आकाङ्क्षन्ति, तथाप्याहवनीयादयो होमादीन् आकाङ्क्षन्ति, यदाहवनीये जुहोति, तेन सोऽस्याभीष्टः प्रीतो भवति इत्येवमादिभिः श्रुतिभिः । एवमिष्टिपूर्वत्वात् सर्वहोमानां, संस्कृताग्निवृत्तित्वम् एवञ्जातीयकानाम् इति ॥ १ ॥ पूर्व० ॥

**इष्टित्वेन तु संस्तवश्चतुर्होतॄनसंस्कृतेषु दर्शयति ॥२॥**

तुशब्दात् पक्षो विपरिवर्त्तते । चतुर्होतृहोमा असंस्कृतेषु अग्निषु भवेयुः । तथा हि दर्शयति । एषा वा अनाहिताग्नेरिष्टिर्यच्चतुर्होतार इति । अनाहिताग्नेरिष्टयो न विद्यन्ते । ये त्वेते चतुर्होतारस्तस्यैव इष्टिरिति । अनाहिताग्नेरेवञ्जातीयकान् दर्शयति । तस्माद् असंस्कृतेषु भवेयुः ॥ २ ॥ उत्तरम् ॥

ननु लिङ्गमसाधकं, प्राप्तिर्वक्तव्येति । तदुच्यते—

**उपदेशस्त्वपूर्वत्वात् ॥ ३ ॥**

एवं तर्हि, अक्रतुशेषाणां विधिरेषा भविष्यति । एषा अनाहिताऽग्नेः क्रिया इति । एवमर्थवद्वचनं भविष्यति । वादमात्रमनर्थकं भवति । अस्य चास्ति विधिसामर्थ्यम् । तस्माद् विधिरसंस्कृतेष्विति ॥ ॥ ३ ॥ युक्तिः ॥

**स सर्वेषामविशेषात् ॥ ४ ॥**

आह । एतद् गृह्यते विधिरिति । यत्तु, अक्रतुशेषाणामिति । तन्न । सर्वेषां क्रतुशेषाणामक्रतुशेषाणां च चतुर्होतृहोमानाम् । कुतः । अविशेषात् । न क्रतुशेषाणामेवायं धर्म उच्यते । न अक्रतुशेषाणामिति । तस्मात् सर्वेषाम् ॥ ४ ॥ पूर्व० ॥

**अपि वा क्रत्वभावादनाहिताग्नेरशेषभूतनिर्देशः ॥५॥**

अपि वेति पक्षव्यावृत्तिः। अक्रतुशेषाणामेवायं धर्मो, न क्रतुशेषाणाम्। कुतः। अनाहिताग्नेः क्रत्वभावात्। न हि अनाहिताग्नेः क्रतवः सन्ति। न च क्रत्वङ्गं केवलं प्रयुज्यमानं कस्मैचित् प्रयोजनाय स्यात्। न च अस्य अन्यत् फलं प्रकल्प्येत। प्रमाणाभावात्। वचनस्य हि अन्यदपि प्रयोजनमस्ति। न च, अनेन वचनेन शक्यतेऽनाहिताग्नेः क्रतुः कल्पयितुम्। तस्माद् अक्रतुशेषाणाम् अयं धर्म इति ॥ ५ ॥ सि० ॥

**जपो वानग्निसंयोगात् ॥ ६ ॥**

वाशब्दात् पक्षो विपरिवर्त्तते। न असंस्कृतेषु अग्निषु एवञ्जातीयका होमाः स्युः। कुतः ?। आधानस्य सर्वशेषत्वात्। ननु वचनमिदम्, एषा अनाहिताग्नेरिष्टिरिति। न इति ब्रूमः। जपार्थवाद एष भविष्यति। ये जपरूपास्तेषाम् अर्थवादो न सर्वेषां चतुर्होतॄणाम्। एवं यदाहवनीये जुहोति इत्येवमादीनां वचनानाम् अर्थवत्ता भविष्यति ॥ ६ ॥ आ० ॥

**इष्टित्वेन तु संस्तुते होमः स्यादनारभ्याग्निसंयोगादितरेषामवाच्यत्वात् ॥ ७ ॥**

यदुक्तम् एषा वा अनाहिताग्नेः क्रिया इष्टितुल्या इति जपानाम् एष वाद इति। तन्न। नैषा वचनव्यक्तिः। यैषा अनाहिताग्नेः क्रिया, सा इष्टितुल्या इति। किङ्कारणम् ?। सादृश्यमात्रानुवादोऽनर्थकः स्यात्। इतरस्मिन् पक्षे विधिरर्थवान्। येयम् इष्टिः, एषा अनाहिताग्नेरिति, तदिष्टिसंस्तवाद्धोमानामेव वादः। कथम् ?। इष्टियागः, स एवासेचनाधिको होमः। यदुक्तं, सर्वहोमार्थ आहवनीय इति। तन्न चतुर्होतॄनेवाधिकृत्य उच्यते, किन्त्वविशेषेण होमान्। स चतुर्होतृष्वसम्भवादन्येषु भविष्यति। चतुर्होतृषु चानाहिताग्नेरुच्यमानेऽष्वाहवनीयो नाङ्गमिति ॥ ७ ॥ उत्तरम् ॥

**उभयोः पितृयज्ञवत् ॥ ८ ॥**

नैतदस्ति, अनाहिताग्नेरेव चतुर्होतार इति। उभयोः स्युः। पितृयज्ञवत्। यथा पितृयज्ञ आहिताग्नेरनाहिताग्नेश्च। एवं चतुर्होतारोऽपि। कथमवगम्यते। वर्णितमेतत्। यदा अनुवादपक्षस्तदा आहि-

ताग्नेः । यदा विधिपक्षः, तदा अनाहिताग्नेः । उभयथा वचनव्यक्तिः प्रतीयते । न च प्रतीयमानोऽर्थः शक्यतेऽपह्नोतुम् । तस्मादुभयोश्चतुर्होतार इति ॥ ८ ॥ आ० ॥

## निर्देशो वानाहिताग्नेरनारभ्याग्निसंयोगात् ॥ ९ ॥

न चैतदस्ति, उभयोश्चतुर्होतारो भवेयुरिति । कथम् । एष ह्यनाहिताग्निनिर्देशः । एषा वा इष्टिरनाहिताग्नेरिति वचनेन अधिकृतः, न आहिताग्निः । निर्देशसामर्थ्यात् । अर्थवादे चोपक्षीणं तत्रैव न विरुद्ध्यते इति । यदाहवनीये जुहोतीति वचनं न चतुर्होतॄनेव अधिकृत्य उच्यते इत्युक्तम् । तस्मादनाहिताग्नेरेवञ्जातीयका होमाः ॥ ॥ ९ ॥ उत्तरम् ॥

## पितृयज्ञे संयुक्तस्य पुनर्वचनम् ॥ १० ॥

अथ यदुक्तं, पितृयज्ञवदिति । युक्तं पितृयज्ञे । तत्र आहिताग्निसंयुक्तस्य पुनरेतद्वचनं भवति । अप्यनाहिताग्निना कार्य्य इति । एतद्वचनमनाहिताग्नेरपीति । अनाहिताग्नौ अन्वाहार्य्यकं करोति । इह तथा नास्ति वचनम् । नियोगत एको निर्देशः । एषा वा अनाहिताग्नेरिति । नात्र अपिशब्दोऽस्ति । तस्मात् पितृयज्ञेन अतुल्यमेतत् ॥ १० ॥ आ० नि० ॥ अनाहिताग्नेरेव चतुर्होतृहोमाधिकाराधिकरणम् ॥ १ ॥

## उपनयन्नादधीत होमसंयोगात् ॥ ११ ॥

इदमामनन्ति, उपनयँस्तिसृभिर्जुहुयादिति । तत्र सन्देहः । किमयं होम आधानसंस्कृतेष्वग्निषु, उतासंस्कृतेषु ? । इति । किं प्राप्तम् । उपनयन्नादधीतेति । कुतः । होमसंयोगाद् आहवनीयस्य । यदाहवनीये जुहोति, तेन सोऽस्याभीष्टः प्रीतो भवतीति । तस्माद् आधानोत्तरकाला एते होमा इति स्थितिः ॥ १ ॥ पूर्व० ॥

## स्थपतीष्टिवल्लौकिके वा विद्याकर्मानुपूर्वत्वात् ॥ १२ ॥

न चैतदस्ति, आधायैवञ्जातीयकं होतव्यमिति । किं तर्हि । लौकिके एव प्रवर्त्तेतेति । कुतः । विद्याकर्मानुपूर्वत्वात् । विद्याग्रहणार्था इमे होमाः । विद्यावतश्च आधानेन अधिकारः । सामर्थ्यात् । अत आधानोत्तरकालता नैषामवकल्पते । यथा स्थपतीष्ट्याम् ॥ १२ ॥ सि० ॥

## आधानञ्च भार्य्यासंयुक्तम् ॥ १३ ॥

आधानं च भार्य्यासंयुक्तं श्रूयते । विद्याग्रहणोत्तरकालश्च दार-

संग्रहः। तस्मादपि नावकल्पते पूर्वकालता आधानस्य ॥१३॥ युक्तिः ॥

**अकर्म चोर्ध्वमाधानात्तत्समवायो हि कर्मभिः॥१४॥**

अत्राह । या पूर्वमाधानाद् दारक्रिया. सा कर्मार्था भविष्यति। वचनाच्चोर्ध्वमाधानादपत्यार्था । द्वयोरपि कालयोः, पिण्डपितृयज्ञवन्नैष दोषो भविष्यतीति । अत्रोच्यते । अकर्म्म च दारक्रिया, या आधानोत्तरकाले। कुतः। आहवनीयादिसमवायो हि कर्म्मभिर्भवति। स्वार्थं चाग्नय आधातव्या इति नियमः । तस्मादुभयस्मिन्नपि काले दारसंग्रह इत्येतन्नास्ति ॥ १४ ॥ आ० नि० ॥

**श्राद्धवदितिचेत् ॥ १५ ॥**

अत्राह। यथा पिण्डपितृयज्ञ आहिताग्नेरनाहिताग्नेश्च भवति, एवं दारसंग्रहोऽपीति यदुक्तं, तत् परिहर्त्तव्यम् ॥ १५ ॥ आ० ॥

**न श्रुतिविप्रतिषेधात् ॥ १६ ॥**

नैवम्। श्रुतिविप्रतिषेधो हि भवति। एवं क्रियमाणे दारकर्मणि विद्याग्रहणोत्तरकालं श्रूयमाणं पूर्वं क्रियत इति विप्रतिषिद्धम्। अर्थादन्यदेवेदमितिचेत् । न अर्थप्राप्तस्यैव कालनियम एषः। उपनयनं च कर्मार्थम्। तद् द्वितीयस्यां विप्रतिषिध्येत ॥ १६ ॥ आ० नि० ॥

**सर्वार्थत्वाच्च पुत्त्रार्थो न प्रयोजयेत् ॥ १७ ॥**

अथोच्येत, प्रागाधानाच्च कर्मार्था एव, ऊर्ध्वं च अपत्यार्था एवास्य भविष्यति। तेनैवं सति अस्य न किञ्चिद् विरोत्स्यते इति । उच्यते। नैतदेवम् । सर्वार्था हि सा न केवलमपत्यार्थतामेष्यति। तदुक्तम् । फलोत्साहाविशेषादिति । तस्मादपि न द्विर्दारसंग्रहः। अपि चैवं स्मर्य्यते। धर्मे चार्थे च कामे च नातिचरितव्येति। एवं सति अतिचरिता स्यात् । अतो न द्विर्दारसंग्रहः। एकैव भार्य्या कर्मार्था अपत्यार्था च। तस्याश्च विद्याग्रहणोत्तरकालता । अतो न आधानसंस्कृतेष्वेते होमा इति ॥ १७ ॥ आ० नि० ॥ तथा, पूर्व० ॥

**सोमपानात्तु प्रापणं द्वितीयस्य तस्मादुपयच्छेत् ॥१८॥**

गृह्यते एतत् । प्रागुपनयनाद् नास्ति पत्नीति। यदुक्तम्- एकैव पत्नीति। तन्न मृष्यते। यथैव स्मृतिः, धर्मे च अर्थे च कामे च नातिचरितव्येति। कर्म्मप्रजासम्पन्ने दारे नान्यां कुर्वीतेति च। एव-

मिदमपि स्मर्य्यते एव । अन्यतरापाये अन्यां कुर्वीतेति । तस्माद् यस्य न धर्मसम्पन्ना, न प्रजासम्पन्ना वा पत्नी, सोऽन्यां कुर्वीतेति । सोमपानादिति चार्थवादं व्यपदिशति स्म । सोमपो न द्वितीयां जायामभ्यषूयते इति द्वितीयामपि जायां दर्शयति ॥१८॥ पूर्वपक्षनिरासः ॥

**पितृयज्ञे तु दर्शनात् प्रागाधानात् प्रतीयेत ॥ १९ ॥**

अथ कथं पितृयज्ञस्य द्वौ कालौ ? इति । उच्यते । वचनं हि तत्र दृश्यते । अप्यनाहिताग्निना कार्य्य इति । तस्मात् प्रागाधानात् पितृयज्ञ इति ॥१९॥ आ० नि० ॥अनाहिताग्निषूपनयनहोमाधिकरणम्॥२॥

**स्थपतीष्टिः प्रयाजवदग्न्याधेयं प्रयोजयेत्तादर्थ्याच्चापवृज्ज्येत ॥ २० ॥**

अस्ति स्थपतीष्टिः । एतया निषादस्थपतिं याजयेदिति । तत्र सन्देहः । किमाधानसंस्कृतेष्वग्निषु स्याद्, उत लौकिकेष्विति । किं प्राप्तम् । संस्कृतेष्विति । कथम् । यदाहवनीये जुहोतीत्येवमादिवचनात् । ननु शूद्रस्य आहवनीयाभावान्नास्ति तस्य श्रुतिरिति । उच्यते । सा हि आहवनीयं प्रयोजयेत् । यथा प्रयाजान् अश्रुतान् प्रयोजयति । एवं चोदकसामर्थ्यादिति । तादर्थ्याच्चापवृज्ज्येत । स्थपतीष्ट्यर्थं च आहिता अग्नयः । तस्यामपवृक्तायामपवृज्ज्येरन् । धारणं हि तेषां दृष्टकार्य्यमाम्नातम् । अतिक्रान्ते कार्य्ये न स्यादिति ॥ २० ॥ पूर्व०

**अपि वा लौकिकेऽग्नौ स्यादाधानस्यासर्वशेषत्वात् ॥ २१ ॥**

अपि वेति पक्षव्यावृत्तिः । लौकिकेष्वग्निषु स्याद्, न संस्कृतेषु । कुतः । आधानस्यासर्वशेषत्वात् । सर्वकर्मशेषभूता अग्नयः । तदङ्गमाधानं, न कर्माङ्गम् । श्रुत्यादीनामभावान्न कर्मप्रयुक्तता आधानस्य वाक्यसामर्थ्याच्च अग्निप्रयुक्तत्वम् । यच्च दर्शपूर्णमासप्रयुक्तं, तच्चोदकेन प्राप्यते, न द्रव्यप्रयुक्तम् । तस्माल्लौकिकेष्वग्निषु स्थपतीष्टिरिति ॥ २१ ॥ सिद्धान्तः ॥ अनाहितेऽग्नौ स्थपतीष्ट्यधिकरणम् ॥ ३ ॥

**अवकीर्णिपशुश्च तद्वदाधानस्याप्राप्तकालत्वात् ॥२२॥**

अस्त्यवकीर्णिपशुः । ब्रह्मचार्य्यवकीर्णी नैर्ऋतं गर्दभमालभेत-

ति । तत्र सन्देहः । किं तदर्थमाधानं कर्त्तव्यम्, उत लौकिकेष्वग्निषु तद्वर्त्तेतेति । अवकीर्णि-पशुश्च तद्वदित्यधिकरणातिदेशः । पूर्वस्य अधिकरणस्य यः पूर्वः पक्षः, सोऽत्र पूर्वः पक्षः । यः सिद्धान्तः, स सिद्धान्तः । सर्वार्थम् आधानम् । तस्माद् आहिताग्निष्विति पूर्वः पक्षः । आधानस्याप्राप्तकालत्वादिति सिद्धान्तः । अप्राप्तोऽयम् आधानस्य काल इत्येतदुक्तम् । तस्मादिदमपि कर्मलौकिकेष्विति ॥२२॥ अनाहितेऽग्नाववकीर्णिपश्वनुष्ठानाधिकरणम् ॥ ४ ॥

## उदगयनपूर्वपक्षाहःपुण्याहेषु दैवानि स्मृतिरूपान्यार्थदर्शनात् ॥ २३ ॥

दैवानि कर्माणि उदाहरणमुपनयनप्रभृतीनि । तत्र सन्देहः । किमनियते काले दैवानि कर्त्तव्यानि, उत उदगयन-पूर्वपक्षाहः-पुण्याहेष्विति । अनियते इति प्राप्ते उदगयनादिष्वित्युच्यते । कुतः । एवं स्मरन्ति, तेषु कालेषु दैवानीति । रूपार्थवादश्च । एतद्वै देवानां रूपं, यदुदगयनं, पूर्वपक्षोऽहरिति । न च वयं देवादीनां रूपं विद्मः । अथ त्वेषु कालेषु दैवानि क्रियन्ते, तत एतेन सम्बन्धेन रूपवचनमवकल्पते । अन्यार्थं च वाक्यमेतद् दर्शयति । पूर्वाह्णो वै देवानां, मध्यन्दिनो मनुष्याणाम्, अपराह्णः पितॄणामिति । तस्माद् एतेषु कालेषु दैवानि स्युरिति ॥ २३ ॥ सि० ॥

## अहनि च कर्म्मसाकल्यम् ॥ २४ ॥

अहनि च विशेषः । सकलं कर्म अहन्येव शक्यते कर्त्तुमिति, न रात्रौ करिष्यति ॥ २४ ॥ युक्तिः ॥ दैवकर्मणामुदगयनादिकालताऽधिकरणम् ॥ ५ ॥

## इतरेषु तु पित्र्याणि ॥ २५ ॥

श्राद्धादीनि अपरपक्षे अपराह्णे च । स्मृतिरूपान्यार्थदर्शनात् ॥ ॥ २५ ॥ पित्र्यकर्मणोऽपरपक्षादिकालताधिकरणम् ॥ ६ ॥

## याच्ञाक्रयणमविद्यमाने लोकवत् ॥ २६ ॥

इदं समाम्नायते ज्योतिष्टोमे, द्वादश रात्रीर्दीक्षितो भृतिं वन्वीतेति । तथा, सोमं क्रीणातीति । तत्र सन्देहः । किं यस्य न विद्यते भृतिः, तेन वनितव्या ? यस्य च न विद्यते सोमः, तेन क्रेतव्यः ?

उत उभथापि सति चासति च। किं प्राप्तम्। याच्ञाक्रयणमविद्यमाने भृतिधने सोमे च स्यात्। कस्मात्। द्रव्यसद्भावार्थं याच्ञाक्रयणम्। तद् विद्यमानेऽनर्थकम्। अनर्थकं चोक्तमपि न कर्त्तव्यम्। तस्माद्-ऽविद्यमाने भवेत्। लोकवत्। यथा यस्य लोके नास्ति द्रव्यं, स याचते क्रीणाति च। एवमिहापि द्रष्टव्यम् ॥ २६ ॥ पूर्व० ॥

## नियतं वार्थवत्त्वात् स्यात् ॥ २७ ॥

नियतं वा याच्ञाक्रयणं, तद्विद्यमाने अविद्यमाने च द्रव्ये स्यात्। एवं याच्ञाक्रयणमर्थवद् भवति। ज्योतिष्टोमप्रयुक्तं हि तच्छ्रूयते। न द्रव्यप्रयुक्तम्। तच्च नित्यं ज्योतिष्टोमस्य। नैवं वचनं भवति, यदा द्रव्यं नास्ति तदा कर्त्तव्यमिति। ज्योतिष्टोमस्य च नित्यमङ्गमुक्तं, द्रव्याभावो निमित्तमुक्तमिति परिकल्प्येत। कल्पनायां शब्दो बाध्येत। अतो याच्ञाक्रयणसंस्कृतं द्रव्यमिहोपयोक्तव्यम्। अन्यथा वैगुण्यं भवति। तस्मात् सति चासति च द्रव्ये याच्ञाक्रयणमनुष्ठातव्यमिति। अथ यदुक्तं, लोकवदिति। लोके कर्म्म अर्थलक्षणं भवति, न शब्दलक्षणम्। यथा अर्थस्तथा क्रियते, न यथा शब्दः। वेदे तु शब्देनैव अर्थोऽवगम्यते, तथैव अनुष्ठेयमिति। तस्माद् विद्यमानेऽपि कर्त्तव्यम् ॥ २७ ॥ सिद्धान्तः ॥ ज्योतिष्टोमाङ्गयाच्ञाक्रययोर्नित्यताधिकरणम् ॥ ७ ॥

## तथा भक्षप्रैषाच्छादनसंज्ञप्तहोमद्वेषम् ॥ २८ ॥

ज्योतिष्टोमे श्रूयते, पयो व्रतं ब्राह्मणस्य, यवागूराजन्यस्य आमिक्षा वैश्यस्येति। तथा दर्शपूर्णमासयोः प्रैषः प्रोक्षणीरासादय इध्मं बर्हिरुपसादय स्रुचः संमृड्ढि पत्नीं सन्नह्याज्येनोदेहि इति। तथा वाजपेये श्रूयते। दर्भमयं वासो भवतीति। पशौ संज्ञप्तहोमः। यत् पशुर्मायुमकृतोरो वा पद्भिराहत अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहस इति। तथा, योऽस्मान् द्वेष्टि यञ्च वयं द्विष्म इति वचनम्। एतानि उदाहरणवचनानि ॥ तेषु सन्देहः। किं यस्यापरं भोजनं न विद्यते, स पयो व्रतयेत्, यवागूमामिक्षां वा उत विद्यमानेऽपीति। तथा यो प्रेषितः प्रैषार्थं न प्रतिपद्यते, स प्रेषितव्यः ? उत प्रतिपद्यमानोऽपीति। तथा, यस्य सूत्रमयं वासो नास्ति, स दर्भमयं परिदधीत, उत विद्यमानेऽपीति। तथा यस्य पशुर्मायुं

कुर्यात्, उरो वा पादौ वा हन्यात्, स एतेन मन्त्रेण जुहुयात् ? उ-ताऽन्योऽपीति । तथा, यो द्वेष्टि कश्चिद् अन्येन च द्विष्यते स एव मन्त्रं ब्रूयात्, योऽस्मान् द्वेष्टीति? उत अद्विषन् अद्विष्यमाणश्चापीति॥

तत्र अधिकरणातिदेशोऽयम् । तत्र यः पूर्वस्मिन्नधिकरणे पूर्वः पक्षः, स इह पूर्वः पक्षः। यस्तत्र सिद्धान्तः स इह सिद्धान्तः। अविद्यमाने कुर्यादिति पूर्वः पक्षः । नियतं वार्थवत्त्वादित्युत्तरः । स एवात्र न्यायो, यः पूर्वत्र ॥ २८ ॥ ॥ ज्योतिष्टोमादिषु पयोव्रतादीनामपि नित्यताधिकरणम् ॥ ८ ॥

## अनर्थकं त्वनित्यं स्यात् ॥ २९ ॥

ज्योतिष्टोमे श्रूयते, मध्यन्दिनेऽपररात्रे वा व्रतं व्रतयतीति । तत्र संदेहः । किं नियतमपररात्रे व्रतम्, उतानियतमिति । किं प्राप्तम् । नियतं चार्थवत्त्वात् स्यादिति । तत्रैवं प्राप्ते ब्रूमः । अनर्थकं त्वनित्यं स्यात् । यदैवं मन्येत, अस्मिन् काले व्रतं मे जरिष्यतीति, तदा व्रतयेत् । यदा तु खलु मन्येत, न सम्यग् जरिष्यतीति, तदा तद् व्रतं क्रियमाणमनर्थकं स्यात् । यदि ह्यजीर्णेन यजमानो म्रियेत, तदा तन्त्रलोपः । तन्त्रलोपे च सर्वलोपः। तस्मादनियतं तस्मिन् काले व्रतं व्रतयितव्यमिति ॥ २९ ॥ अपररात्रे व्रतस्यानियमाधिकरणम् ॥ ९ ॥

## पशुचोदनायामनियमोऽविशेषात् ॥ ३०

ज्योतिष्टोमे पशुरग्नीषोमीयो, यो दीक्षितो यदग्नीषोमीयं पशुमालभते इति । तत्र सन्देहः । किं यः कश्चित् पशुरालम्भनीयः, उत छाग इति। वक्ष्यमाणेन अभिप्रायेण भवति संशयः । नन्वेकेषामाम्नायते, अजोऽग्नीषोमीय इति। सर्वशाखाप्रत्ययं चैकं कर्मेति । अत्रोच्यते ।प्रतिशाखं भिन्नानि कर्माणीति कृत्वा चिन्ता । किं तावत् प्राप्तम् । पशुचोदनायामनियमः । उत्सर्गे कर्त्तव्ये द्रव्यं शक्यते उत्स्रष्टुं, न पशुत्वम् । द्रव्यं हि साधकम् । अतोऽत्र द्रव्यमन्तरेण, उत्सर्गो न सम्भवतीति द्रव्यमुपादीयते । तस्मिन्नुपादीयमाने अनियमः । न हि पशुयत्किञ्चिदुत्स्रष्टव्यमिति । कुत एतत् । अविशेषात् । न हि पशुत्वसम्बद्धेषु कश्चिद्विशेष उपलभ्यते । तस्माद् यः कश्चित् पशुरिति ॥ ३० ॥ पूर्व० ॥

## छागो वा मन्त्रवर्णात् ॥ ३१ ॥

वाशब्दः पक्षं व्यावर्त्तयति । नैतदस्ति । यत्र क्वचन द्रव्ये पशुत्वमुपादेयमिति । अस्ति उत्स्रष्टव्यस्य नियमकारणं मन्त्रवर्णः । अग्नये छागस्य वपाया मेदसोऽनुब्रूहीति । छागप्रकाशनसमर्थो मन्त्रवर्णः समाम्नायते । यदि छागो नोपादेयस्ततस्तत्प्रकाशनसमर्थस्योपादानमनर्थवत् । तेनावगम्यते, छागमधिकृत्य उत्सर्गं विदधातीति । मान्त्रवर्णिको द्रव्यनियमविधिरिति ॥ ३१ ॥ सि० ॥

## न चोदनाविरोधात् ॥ ३२ ॥

नैतदेवम् । न शक्नोति मन्त्रवर्णश्चोदनायां प्रत्यर्थिन्यां द्रव्यं नियन्तुम् । यत्र हि द्रव्यस्य प्रकाशकं न श्रूयते, तत्राप्रकाशितमेव तत् कर्त्तव्यमिति । तस्मान्न मन्त्रवर्णात् प्रकाश्यनियमविधिः कल्प्यते । एवमत्र प्रकाश्यं प्रकाशयितव्यमिति । अत्र पुनः शब्देन अवगम्यते, पशुत्वेन प्रकाशयितव्यमिति । तस्मान्न मन्त्रवर्णस्तत्सद्भावे समर्थः । मन्त्रवर्णाद्धि कल्प्या प्रयोगवचनश्रुतिः । इह क्लृप्ता प्रयोगवचनेन उपसंहर्त्तव्या । अन्य एव पशुशब्दस्यार्थः पशुत्वम् । अन्यो मन्त्रवर्णेन नियम्यते छागः । तस्मान्न मन्त्रवर्णश्चोदनाविरोधेन नियन्तुमर्हतीति ॥ ३२ ॥ आ० ॥

## आर्षेयवदिति चेत् ॥ ३३ ॥

इति चेत् पश्यसि, न पशुत्वमन्येभ्यः पशुभ्य आच्छेतव्यमिति । यथा, आर्षेयं वृणीते, त्रीन् वृणीते इति । सामान्यश्रुतिस्त्रिष्वेवावतिष्ठते इति, त्रित्वं विशेषो विवक्षितो, नान्ये विवक्षिता इति । एवमिहापि पशुत्वं छागं प्रकल्पयितुं विवक्षितं, नाऽन्यान् विशेषानिति ॥ ३३ ॥ आ० नि० ॥

## न तत्र ह्यचोदितत्वात् ॥ ३४ ॥

नैतदेवम् । तत्र हि अचोदितं द्रव्यमुत्स्रष्टव्यं मन्त्रवर्णे । वरणे पुनश्चोदितम् । तत्र त्रित्वसङ्ख्यासम्बन्धस्य वरणे चोदितत्वान्नान्या सङ्ख्या क्रियते । आर्षेयशब्दादपि नाऽनार्षेयम् । त्रिशब्दस्य हि तत् सामर्थ्यं, येन आर्षेयशब्दो विशिष्टसङ्ख्याविषयो नियम्यते । इह न मन्त्रस्य सामर्थ्यम् । तस्मादनियम इति ॥ ३४ ॥ आ० ॥

## नियमो वैकार्थ्यं ह्यर्थभेदाद्भेदः पृथक्त्वेनाऽभिधानात् ॥ ३५ ॥

नियमो वा। ऐकार्थ्यं हि पशुच्छागशब्दयोः सामान्यं पशुरिति। छागादयो विशेषा उच्यन्ते । कथम्। तैः सामानाधिकरण्यात्। पशुश्छागः, पशुरुष्ट्रः, पशुर्मेषः, पशुरश्व इति । एवं सति न मन्त्रवर्णः पशुशब्देन विरुद्ध्यते । तेन छागोऽप्यालब्धव्यश्चोदितः। मन्त्रवर्णे उपादीयमाने इदमवगम्यते । छागं विवक्षित्वाऽयं पशुशब्द उच्चरित इति,नान्यान् विशेषानिति । छागोपकरणमस्योपदंशितम्। यदुपदंशने पशुशब्दश्छागाभिप्राय इति गम्यते। यथा युगवरत्रे उपदंशिते, ईषाचक्रादिसन्निधानेचेद् अक्षमानयत्युच्यते, तदा यानाऽक्षमधिकृत्य ब्रूते इति गम्यते, न तु विदेवनाक्षमिति। यदि हि अर्थभेदो भवेत् पशुच्छागशब्दयोः पृथक्त्वेनाभिधानं, ततो भेदः स्याद्, न छाग एव नियम्येत । अविहितश्छागार्थ इत्यश्वोपादानम् । अपि च, छागपक्षे तं मन्त्रवर्णः प्रकाशयेत् । छागार्थाऽभिधाने पुनः पशुशब्दस्य,छागप्राप्तावन्येषामप्राप्तिरित्यन्यस्मिन् प्राप्ते लिङ्गेन नियमः क्रियते इति ॥ ३५ ॥ आ० नि० ॥

## अनियमो वार्थान्तरत्वादन्यत्वं व्यतिरेकशब्दभेदाभ्याम् ॥ ३६ ॥

अनियमो वा। यः कश्चित् पशुरुपादेयः। अर्थान्तरत्वात्। अर्थान्तरं पशुत्वम्। अर्थान्तरं छागत्वम् । अर्थयोरत्र सामानाधिकरण्यं, न शब्दयोः । कथं पुनरर्थान्तरं गम्यते । व्यतिरेकाच्छब्दभेदाच्च। व्यतिरेको हि भवति। कश्चित् पशुर्न छागः। तथा, छागः पशुरिति शब्दभेदः। शब्दभेदादेवार्थभेदो न्याय्यः । एकस्मिन् वाक्ये समवायात्, पशुं छागमानयेति । इतरथा, अन्यतरेण कृतार्थत्वादन्यतरो वाक्ये न समवेयात् । समवैति च । तस्मादन्यत् पशुत्वम्, अन्यच्छागत्वम्। तस्मादनियमः। यः कश्चित् पशुरुपादेय इति ॥

तत्रोत्सूत्रिका पक्षव्यावृत्तिः । अन्यत्वेऽपि सति नियम एव। कुतः। मन्त्रस्य प्रयोगवचनेन गृहीतत्वात्। मन्त्रसाधनं हि कर्म्म इति गम्यते । यदि छागमुपादास्यामहे, सगुणं कर्म शक्ष्यामः कर्त्तुं मन्त्रमुपाददानाः। मन्त्रस्य अपाक्षिकत्वात् । अथान्यम् उपादास्यामहे।

मन्त्रस्य विषयाभावान्मन्त्रमपजहतो न सगुणं कर्म निर्वर्त्तयेम । अतो न च श्रुतिं बाधामहे । अन्यस्मिन् पशुशब्दो वर्त्तते इति । न चान्यमुपादास्यामहे वैगुण्याद्बिभ्यतः । तस्माच्छाग एवोपादातव्य इति ॥ अनु अश्वमुपाददाना नैव मन्त्रवर्णमपहास्यामः । स एवाश्वश्छागो भविष्यति । यश्छिन्नगमनोऽश्वः स छागः । छिदेर्गमेश्च छागशब्दः प्रसिद्धः ॥ ३६ ॥

## रूपाल्लिङ्गाच्च ॥ ३७ ॥

क्वचिन्मुष्करा भविष्यन्तीति श्रूयते । यद्यन्तरेण वचनममुष्करास्तदेदमुपपद्यते । तस्माच्छिन्नगमनोऽश्वोऽपि छाग इति कर्माख्या भविष्यति ॥ ३७ ॥ आ० ॥

अत्रोच्यते—

## छागे न कर्म्माख्या रूपलिङ्गाभ्याम् ॥ ३८ ॥

छागे कर्माख्या रूपलिङ्गाभ्यां नावकल्पते । न हि छागशब्दश्छिन्नगमनवचनः । समुदायो हि असौ पृथगर्थान्तरे प्रसिद्धो, नाऽसौ अवयवप्रसिद्ध्या बाधितव्यः । तस्मान्नाश्वश्छागः ॥ ३८ ॥

## रूपान्यत्वान्न जातिशब्दः स्यात् ॥ ३९ ॥

इदमन्यपदोत्तरं सूत्रम् । अथ कस्मान्न वयोवचनो भवति । वयोवचना ह्येते शब्दाः- छागश्छागलो बस्त इति । तेनाश्वोऽपि वयोवचनो भविष्यतीति । उच्यते । नैतदेवम् । सत्यं वयोवचनः । अजापतिगतं तु वयो वदितुं शक्नोति । यथा, शोण इति वर्णवचनोऽश्वजातिगतं वर्णं वदति, न अन्यम् । तस्माद् रूपान्यत्वान्नवयोमात्रवचनः, किन्तु जातिशब्दः स्यात् । जात्याश्रयं वयो वदेत् । अतश्छाग एव नियम्यते ॥ ३९ ॥

## विकारो नौत्पत्तिकत्वात् ॥ ४० ॥

इदमपि पदोत्तरम् । इह अश्वादीनां विकारश्छागशब्दः । किञ्चिदत्राश्वादीनामुच्चार्य्यते, न किञ्चिद् अन्यदेव । तस्माद् अश्वोऽपि छाग इति । न औत्पत्तिकत्वात् । औत्पत्तिको हि नामिनाम्नोः सम्बन्ध इत्युक्तम् । न आख्याविकारः सम्भवतीति । तस्मान्नाश्वश्छागः । अतश्छाग एवोपादातव्य इति ॥ ४० ॥

## स नैमित्तिकः पशोर्गुणस्याचोदितत्वात् ॥ ४१ ॥

पदोत्तरमेवेदं सूत्रम् । अथ कस्मान्न छिद्रनिमित्तश्छागशब्दो भवति । एवं श्रूयते । शुषिरो वा एतर्हि पशुः । यर्हि वपामुत्खिदन्तीति । नेत्युच्यते । छिद्रत्वस्य गुणस्य पशोरचोदितत्वात् । अव्यङ्गं पशुमालभेतेति हि चोद्यते । तस्मादच्छिद्रः पशुः । न च अवयवप्रसिद्ध्या समुदायप्रसिद्धिर्बाध्यत इत्युक्तमेव । तस्माच्छाग एवोपादेयो नाश्वादय इति ॥ ४१ ॥ ॥ आ० नि० ॥

## जातेर्वा तत्प्रायवचनार्थवत्त्वाभ्याम् ॥ ४२ ॥

वाशब्दः अवधारणायाम् । यस्माद् अवयवप्रसिद्ध्या समुदायप्रसिद्धिर्न बाध्यते । तस्माज्जातेरेव छागशब्दो वाचकः । एवं समुदायस्यार्थवत्ता अनुगृहीता भविष्यतीति तत्प्रायवचनमुपपद्यते । विश्वेषां देवानामुस्त्राणां छागानां मेषाणां वपानां मेदसोऽनुब्रूहीति जातिप्राये वचनमुपपद्यते । प्रायेणापि हि नियमः क्रियते । यथा अग्न्यप्राये लिखितं दृष्ट्वा अग्न्योऽयमिति बुद्धिर्भवति । तस्माच्छाग एवो पादातव्य इति । कृत्वा चिन्तायां प्रयोजनं न वक्तव्यम् ॥ ४२ ॥ सिद्धान्तः ॥ छागस्यैवाग्नीषोमीयपशुताधिकरणम् ॥१०॥ कृत्वाचिन्तारूपमिदम् ॥

इति श्रीशबरस्वामिनः कृतौ मीमांसाभाष्ये षष्ठस्याध्यायस्य अष्टमः पादः ॥ ६ ॥ ८ ॥ अध्यायश्च समाप्तः ॥ ६ ॥

संपूर्णोऽयं पूर्वः षट्कः ॥